महर्षि श्रीकृष्णद्वैपायन वेदव्यास-प्रणीत—

श्रीमद्भागवत महापुराण

[पदच्छेद, अन्वय, हिन्दी शब्दार्थ सहित]

षष्ठ खण्ड

नवम स्कन्ध

श्रीकृष्ण-जन्मस्थान सेवा-संस्थान
मथुरा—२८१००१

श्रीमद्भागवत महापुराण

(नवम स्कन्ध)

षष्ठ खण्ड



सम्पादक :
सुदर्शनसिंह 'चक्र'

★

श्रीकृष्ण-जन्मस्थान सेवा-संस्थान
मथुरा–२८१००१

प्रकाशक :
सत्-शास्त्र प्रकाशन
श्रीकृष्ण-जन्मस्थान सेवा-संस्थान
मथुरा—२८१००१

मूल्य :
रु० चालीस मात्र।

प्रथम संस्करण :
श्रीकृष्ण-जन्माष्टमी, सं०-२०५१

मुद्रक :
मयूर प्रेस
सरस्वती कुण्ड, मसानी, मथुरा
फोन-408587

श्रीमद्भागवत महापुराण

नवम स्कन्ध

क्र०		पृ०
१. प्रथमोऽध्यायः	....	३
२. द्वितीयोऽध्यायः	....	१६
३. तृतीयोऽध्यायः	....	३३
४. चतुर्थोऽध्यायः	....	४७
५. पञ्चमोऽध्यायः	....	७६
६. षष्ठोऽध्यायः	....	८८
७ सप्तमोऽध्यायः	....	१०६
८. अष्टमोऽध्यायः	....	१२०
६. नवमोऽध्यायः	....	१३३
१०. दशमोऽध्यायः	....	१५३
११. एकादशोऽध्यायः	....	१८०
१२. द्वादशोऽध्यायः	....	१६५
१३. त्रयोदशोऽध्यायः	....	२०१
१४. चतुर्दशोऽध्यायः	....	२१२
१५. पञ्चदशोऽध्यायः	....	२३१
१६. षोडशोऽध्यायः	....	२४८
१७. सप्तदशोऽध्यायः	....	२६२
१८. अष्टदशोऽध्यायः	....	२६६
१६. एकोनविंशोऽध्यायः	....	२८६
२०. विंशोऽध्यायः	....	३०१
२१. एकविंशोऽध्यायः	....	३१६
२२. द्वाविंशोऽध्यायः	....	३३०
२३. त्रयोविंशोऽध्यायः	....	३४६
२४. चतुर्विंशोऽध्यायः	....	३६४

—: ●● :—

श्रीमद्भागवत महापुराण

[पदच्छेद, अन्वय, शब्दार्थ टीका सहित]

षष्ठ खण्ड

नवम स्कन्ध



सम्पादक
सुदर्शनसिंह 'चक्र'

श्रीकृष्ण-जन्मस्थान, सेवासंस्थान मथुरा-२८१००१

नवम स्कन्ध

अथ प्रथमोऽध्यायः

राजोवाच

मन्वन्तराणि सर्वाणि त्वयोक्तानि श्रुतानि मे ।
वीर्याण्यनन्तवीर्यस्य हरेस्तत्र कृतानि च ॥१॥

मन्वन्तराणि सर्वाणि त्वया उक्तानि श्रुतानि मे वीर्याणि अनन्त वीर्यस्य हरेः तत्र कृतानि च ॥१॥

त्वया उक्तानि	आपके कहे हुए
सर्वाणि	सब
मन्वन्तराणि	मन्वन्तरोंको
च तत्र कृतानि	और वहां किये
अनन्त वीर्यस्य हरेः वीर्याणि	अनन्त पराक्रम श्रीहरिके पराक्रमों-को
मे श्रुतानि	मैंने सुना ॥१॥

योऽसौ सत्यव्रतो नाम राजर्षिर्द्रविडेश्वरः ।
ज्ञानं योऽतीतकल्पान्ते लेभे पुरुषसेवया ॥२॥

यः असौ सत्यव्रतः नाम राजर्षिः द्रविड ईश्वरः ज्ञानं यः अतीत कल्प अन्ते लेभे पुरुष सेवया ॥२॥

असौ सत्यव्रतः	ये सत्यव्रत
नाम राजर्षिः	नामक राजर्षि
द्रविड ईश्वरः	द्रविडदेशके स्वामी थे
यः अतीत कल्प अन्ते	जो बीते कल्पके अन्तमें
यः पुरुष सेवया	जिन्होंने परम पुरुषीक सेवासे
ज्ञानं लेभे	ज्ञान प्राप्त किया ॥३॥

स वै विवस्वतः पुत्रो मनुरासीदिति श्रुतम् ।
त्वत्तस्तस्य सुताश्चोक्ता इक्ष्वाकुप्रमुखा नृपाः ॥३॥

स वै विवस्वतः पुत्रः मनुः आसीत् इति श्रुतं त्वत्तः तस्य सुताः च उक्ता इक्ष्वाकु प्रमुखा नृपाः ॥३॥

स वै	वही
विवस्वतः पुत्रः	सूर्यके पुत्र
मनुः आसीत्	मनु हुए
त्वत्तः	आपसे
इति श्रुतं	ऐसा (हमने) सुना
तस्य	उनके
इक्ष्वाकु प्रमुखा	इक्ष्वाकु प्रमुख
नृपाः च	राजा और
तस्य सुताः	उनके पुत्र
उक्ता	(आपने) बतलाये ॥३॥

तेषां वंशं पृथग् ब्रह्मन् वंश्यानुचरितानि च ।
कीर्तयस्व महाभाग नित्यं शुश्रूषतां हि नः ॥४॥

तेषां वंशं पृथक् ब्रह्मन् वंश्य अनुचरितानि च कीर्तयस्व महाभाग नित्यं शुश्रूषतां हि नः ॥४॥

महाभाग ब्रह्मन्	महाभाग ! ब्रह्मन् !
हि नित्यं	क्योंकि सदा
नः शुश्रूषतां	हम कथा-श्रवणको (उत्सुक) हैं
तेषां वंशं	उनका वंश
च वंशं	तथा वंशमें होने वालोंका
अनुचरितानि	चरित
कीर्तयस्व	सुनाइये ॥४॥

ये भूता ये भविष्याश्च भवन्त्यद्यतनाश्च ये ।
तेषां नः पुण्यकीर्तीनां सर्वेषां वद विक्रमान् ॥५॥

ये भूता ये भविष्याः च भवन्ति अद्यतनाः च ये तेषां नः पुण्यकीर्तीनां सर्वेषां वद विक्रमान् ॥५॥

ये भूता	जो हो गये
च ये भविष्याः	तथा जो भविष्यमें
भवन्ति	होंगे
च ये	एवं जो
अद्यतनाः	इस समय है
तेषां	उन
पुण्यकीर्तीनां	पवित्र कीर्ति लोगोंके
विक्रमान्	पराक्रम
नः वद	हमें बतलाइये ॥५॥

सूत उवाच

एवं परीक्षिता राज्ञा सदसि ब्रह्मवादिनाम् ।
पृष्टः प्रोवाच भगवाञ्छुकः परमधर्मवित् ॥६॥

एवं परीक्षिता राज्ञा सदसि ब्रह्मवादिनां पृष्टः प्रोवाच भगवान् शुकः परमधर्मवित् ॥६॥

ब्रह्मवादिनां	ब्रह्मवादी मुनियोंकी	एवं पृष्टः	इस प्रकार पूछे जानेपर
सदसि	सभामें	परमधर्मवित्	परमधर्मज्ञ
राज्ञा	राजा	भगवान् शुकः	भगवान् शुकदेवजी
परीक्षिता	परीक्षित द्वारा	प्रोवाच	बोले ॥६॥

श्रीशुक उवाच

श्रूयतां मानवो वंशः प्राचुर्येण परंतप ।
न शक्यते विस्तरतो वक्तुं वर्षशतैरपि ॥७॥

श्रूयतां मानवः वंशः प्राचुर्येण परंतप न शक्यते विस्तरतः वक्तुं वर्षशतैः अपि ॥७॥

परंतप	शत्रुसंतापी परीक्षित !	विस्तरतः	विस्तारसे
प्राचुर्येण	प्रधानतासे	वर्षशतैः अपि	सौ वर्षमें भी
मानवः वंशः	मनुवंशको	वक्तुं शक्यते	वर्णन सम्भव
श्रूयतां	सुनो	न	नहीं है ॥७॥

परावरेषां भूतानामात्मा यः पुरुषः परः ।
स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किञ्चन ॥८॥

पर अवरेषां भूतानां आत्मा यः पुरुषः परः स एव आसीत् इदं विश्वं कल्पान्ते अन्यत् न किञ्चन ॥८॥

यः पुरुषः परः	जो परम पुरुष	इदं विश्वं	यह विश्व भी हैं
पर अवरेषां	बड़े-छोटे	कल्पान्ते	कल्पके अन्तमें
भूतानां आत्मा	प्राणियोंके आत्मा हैं	अन्यत् किञ्चन	दूसरा कुछ
स एव	वही	न आसीत्	नहीं था ॥८॥

तस्य नाभेः समभवत् पद्मकोशो हिरण्मयः ।
तस्मिञ्जज्ञे महाराज स्वयंभूश्चतुराननः ॥९॥

तस्य नाभेः सम् अभवत् पद्म कोशः हिरण्मयः तस्मिन् जज्ञे महाराज स्वयं भूः चतुराननः ॥९॥

महाराज	महाराज !	सम् अभवत्	उत्पन्न हुआ
तस्य	उन (भगवान्) की	तस्मिन्	उसमें
नाभेः	नाभिसे	चतुराननः	चतुर्मुख
हिरण्मयः	स्वर्णमय	स्वयं भूः जज्ञे	ब्रह्माजी उत्पन्न
पद्मकोशः	कमल पुष्प		हुए ॥९॥

मरीचिर्मनसस्तस्य जज्ञे तस्यापि कश्यपः ।
दाक्षायण्यां ततोऽदित्यां विवस्वानभवत् सुतः ॥१०॥

मरीचिः मनसः तस्य जज्ञे तस्य अपि कश्यपः दाक्षायण्यां ततः अदित्यां विवस्वान् अभवत् सुतः ॥१०॥

तस्य	उन (ब्रह्मा) के	ततः	उनसे
मनसः	मनसे	दाक्षायण्यां	दक्ष-कन्या
मरीचिः जज्ञे	मरीचि उत्पन्न हुए	अदित्यां	अदितिसे
तस्य अपि	उनसे भी	विवस्वान्	विवस्वान नामक
कश्यपः	कश्यप हुए	सुतः अभवत्	पुत्र हुआ ॥१०॥

ततो मनुः श्राद्धदेवः संज्ञायामास भारत ।
श्रद्धायां जनयामास दश पुत्रान् स आत्मवान् ॥११॥

ततः मनुः श्राद्धदेवः संज्ञायां आस भारत श्रद्धायां जनयामास दश पुत्रान् स आत्मवान् ॥११॥

भारत	परीक्षित !	स आत्मवान्	उन धैर्यशालीने
ततः	उन (विवस्वान्) से	श्रद्धायां	श्रद्धा नामक पत्नीसे
संज्ञायां	संज्ञा नामक पत्नीसे	दश पुत्रान्	दस पुत्र
श्राद्धदेवः मनुः	श्राद्धदेव मनु हुए	जनयामास	उत्पन्न किये ॥११॥

इक्ष्वाकुनृगशर्यातिदिष्टधृष्टकरूषकान् ।
नरिष्यन्तं पृषध्रं च नभगं च कविं विभुः ॥१२॥

इक्ष्वाकुः, नृग, शर्यातिः, दिष्ट, धृष्ट, करूषकान्, नरिष्यन्तं, च (और) पृषध्रं, नभगं, च (और) कविं, विभुः (उन समर्थने) ॥१२॥*

अप्रजस्य मनोः पूर्वं वसिष्ठो भगवान् किल ।
मित्रावरुणयोरिष्टिं प्रजार्थमकरोत् प्रभुः ॥१३॥

अप्रजस्य मनोः पूर्वं वसिष्ठः भगवान् किल मित्रावरुणयोः इष्टिं प्रजार्थं अकरोत् प्रभुः ॥१३॥

किल प्रभुः	अरे, समर्थ	पूर्वं अप्रजस्य	पहिले सन्तानहीन
भगवान्	भगवान्	मनोः	मनुके
वशिष्ठः	वशिष्ठने	प्रजार्थं	सन्तानके लिए
मित्रावरुणयोः	मित्रावरुणका	इष्टिं अकरोत्	यज्ञ किया ॥१३॥

तत्र श्रद्धा मनोः पत्नी होतारं समयाचत ।
दुहित्रर्थमुपागम्य प्रणिपत्य पयोव्रता ॥१४॥

तत्र श्रद्धा मनोः पत्नी होतारं समयाचत दुहित्र अर्थं उपागम्य प्रणिपत्य पयः व्रता ॥१४॥

तत्र	उस (यज्ञ) में	होतारं	होताके
मनोः पत्नी	मनुकी पत्नी	उपागम्य	पास जाकर
पयः व्रता	दूध पीकर व्रत करने वाली	प्रणिपत्य	प्रणाम करके
		दुहित्र अर्थं	पुत्री (प्राप्ति) के लिए
श्रद्धा	श्रद्धा	समयाचत	याचना की ॥१४॥

* 'विभुः' समर्थ मनुके लिए आया है। शेष उनके दस पुत्रोंके नाम हैं।

प्रेषितोऽध्वर्युणा होता ध्यायंस्तत् सुसमाहितः ।
हविषि व्यचरत् तेन वषट्कारं गृणन्द्विजः ॥१५॥

प्रषितः अध्वर्युणा होता ध्यायन् तत् सुसमाहितः हविषि व्यचरत् तेन वषट्कारं गृणन् द्विजः ॥१५॥

अध्वर्युणा	अध्वर्यु के द्वारा	**सुसमाहितः**	अत्यन्त एकाग्र चित्त-से
प्रेषितः	प्रेरित होकर	**वषट्कारं**	'वषट्' कार
तेन द्विजः	उस ब्राह्मण	**गृणन्**	उच्चारण करते हुए
होता	होता ने	**हविषि व्यचरत्**	हवि छोड़ी ॥१५॥
तत् ध्यायन्	उस (मनु पत्नीकी प्रार्थना) का स्मरण करके		

होतुस्तद्व्यभिचारेण कन्येला नाम साभवत् ।
तां विलोक्य मनुः प्राह नातिहृष्टमना गुरुम् ॥१६॥

होतुः तत् व्यभिचारेण कन्या इला नाम सा अभवत् तां विलोक्य मनुः प्राह न अति हृष्टमना गुरुम् ॥१६॥

तत् होतुः	उस होताके	**न अति**	कुछ अधिक नहीं
व्यभिचारेण	विपरीत कर्ममें	**हृष्टमना**	प्रसन्न चित्त होकर
सा इला नाम	वह इला नामकी	**मनुः गुरुम्**	मनुने गुरु (वशिष्ठ) से
कन्या अभवत्	कन्या हुई,		
तां विलोक्य	उसे देखकर	**प्राह**	कहा ॥१६॥

भगवन् किमिदं जातं कर्म वो ब्रह्मवादिनाम् ।
विपर्ययमहो कष्टं मैवं स्याद् ब्रह्मविक्रिया ॥१७॥

भगवन् किं इदं जातं कर्म वः ब्रह्म वादिनां विपर्ययं अहो कष्टं मा एवं स्यात् ब्रह्मविक्रिया ॥१७॥

भगवन्	भगवन् !	**। वः ब्रह्म**	आप वेद

वादिनां	वादियोंका	एवं	इस प्रकार
इदं विपर्ययं	इस प्रकार उलटा फल देनेवाला	ब्रह्मविक्रिया	वैदिक कर्मका विपरीत फल
किं जातं	कैसे हो गया,	मा स्यात्	नहीं होना चाहिए ॥१७॥
अहो कष्टं	अहो, दुःखकी बात है,		

यूयं मन्त्रविदो युक्तास्तपसा दग्धकिल्बिषाः ।
कुतः संकल्पवैषम्यमनृतं विबुधेष्विव ॥१८॥

यूयं मन्त्रविदः युक्ताः तपसा दग्ध किल्बिषाः कुतः सङ्कल्प वैषम्यं अनृतं विबुधेषु इव ॥१८॥

यूयं मन्त्रविदः	आप लोग मन्त्र-वेत्ता हैं,	विबुधेषु	देवताओंमें
		अनृतं इव	असत्यकी भाँति
युक्ताः	जितेन्द्रिय हैं,	संकल्प	(आपके) संकल्पका
तपसा	तपस्यासे	वैषम्यं	उलटा फल
दग्ध किल्बिषाः	पापोंको जला चुके हैं,	कुतः	कैसे हो गया ॥१८॥

तन्निशम्य वचस्तस्य भगवान् प्रपितामहः ।
होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनन्दनम् ॥१९॥

तत् निशम्य वचः तस्य भगवान् प्रपितामहः होतुः व्यतिक्रमं सात्वा बभाषे रविनन्दनम् ॥१९॥

तस्य तत्	उन (मनु) की वह	होतुः व्यतिक्रमं	होताका उलटा काम
वचः निशम्य	बात सुनकर	ज्ञात्वा	जानकर
भगवान्	भगवान्	रविनन्दनं	सूर्यकुमार
प्रपितामहः	प्रपितामह वशिष्ठने*	बभाषे	मनुसे कहा ॥१९॥

---

* मनुके पिता सूर्य, उनके पिता कश्यप और कश्यपजीके पिता मरीचिके वशिष्ठजी भाई हैं; क्योंकि दोनों ब्रह्माजी के पुत्र हैं ।

एतत् संकल्पवैषम्यं होतुस्ते व्यभिचारतः ।
तथापि साधयिष्ये ते सुप्रजास्त्वं स्वतेजसा ॥२०॥

एतत् संकल्प वैषम्यं होतुः ते व्यभिचारतः तथा अपि साधयिष्ये ते सुप्रजाः त्वं स्व तेजसा ॥२०॥

ते होतुः	आपके होताके	तथा अपि	ऐसा होनेपर भी
व्यभिचारतः	उलटे कर्मसे	स्व तेजसा	अपने तेजसे
एतत्	यह	सुप्रजाः त्वं	श्रेष्ठ पुत्रवाला
संकल्प	संकल्पके	ते साधयिष्ये	आपको बनाऊँगा
वैषम्यं	विपरीत फल (हुआ)		॥२०॥

एवं व्यवसितो राजन् भगवान् स महायशाः ।
अस्तौषीदादिपुरुषमिलायाः पुंस्त्वकाम्यया ॥२१॥

एवं व्यवसितः राजन् भगवान् स महायशाः अस्तौषीत् आदि पुरुषं इलायाः पुंस्त्व काम्यया ॥२१॥

राजन्	राजन् !	पुंस्त्व	पुरुषत्वकी
स महायशाः	उन महायशस्वी	काम्यया	कामनासे
भगवान्	भगवान् वशिष्ठने	आदि पुरुषं	आदि पुरुष भगवान्-
एवं व्यवसितः	ऐसा निश्चय करके		की
इलायाः	इलाके	अस्तौषीत्	स्तुति की ॥२१॥

तस्मै कामवरं तुष्टो भगवान् हरिरीश्वरः ।
ददाविलाभवत् तेन सुद्युम्नः पुरुषर्षभः ॥२२॥

तस्मै काम वरः तुष्टः भगवान् हरिः ईश्वरः ददौ इला अभवत् तेन सुद्युम्नः पुरुष ऋषभः ॥२२॥

ईश्वरः भगवान्	सर्वसमर्थ भगवान्	वरः ददौ	वरदान दे दिया
हरिः	श्रीहरिने	तेन इला	उससे इला
तस्मै	उन (वशिष्ठजी) पर	पुरुष ऋषभः	पुरुषश्रेष्ठ
तुष्टः	सन्तुष्ट होकर	सुद्युम्नः अभवत्	सुद्युम्न हो गयी
काम	(उनकी) इच्छानुसार		॥२२॥

स एकदा महाराज विचरन् मृगयां वने ।
वृतः कतिपयामात्यैरश्वमारुह्य सैन्धवम् ॥२३॥

स एकदा महाराज विचरन् मृगयां वने वृतः कतिपय अमात्यैः अश्वं आरुह्य सैन्धवम् ॥२३॥

महाराज	महाराज !	सैन्धवं अश्वं	सिन्धु देशीय घोड़ों-पर
एकदा स	एक बार वह (सुद्यम्न)	आरुह्य वने	चढ़कर वनमें
कतिपय	कुछ	मृगयां विचरन्	आखेट करता घूम रहा था ॥२३॥
अमात्यैः	मन्त्रियोंके साथ		

प्रगृह्य रुचिरं चापं शरांश्च परमाद्भुतान् ।
दंशितोऽनुमृगं वीरो जगाम दिशमुत्तराम् ॥२४॥

प्रगृह्य रुचिरं चापं शरान् च परम अद्भुतान् दंशितः अनुमृगं वीरः जगाम दिशं उत्तराम् ॥२४॥

रुचिरं चापं	सुन्दर धनुष	दंशितः	कवच धारण करके
च परम	तथा अत्यन्त	वीरः अनुमृगं	वह वीर मृगके पीछे
अद्भुतान्	अद्भुत	उत्तरां दिशं	उत्तर दिशामें
शरान्	बाणोंके	जगाम	गया ॥२४॥
प्रगृह्य	लेकर		

स कुमारो वनं मेरोरधस्तात् प्रविवेश ह ।
यत्रास्ते भगवाञ्छर्वो रममाणः सहोमया ॥२५॥

स कुमारः वनं मेरोः अधस्तात् प्रविवेश ह यत्र आस्ते भगवान् शर्वः रममाणः सह उमया ॥२५॥

स कुमारः	वह राजकुमार	यत्र भगवान्	जहाँ भगवान
मेरोः	सुमेरुसे	शर्वः	शिव
अधस्तात्	नीचेके	उमया सह	देवी उमाके साथ
वनं ह	वनमें निश्चय	रममाणः आस्ते	रमण कर रहे थे ॥२५॥
प्रविवेश	प्रविष्ट हो गया		

तस्मिन् प्रविष्ट एवासौ सुद्युम्नः परवीरहा ।
अपश्यत् स्त्रियमात्मानमश्वं च वडवां नृप ॥२६॥

तस्मिन् प्रविष्ट एव असौ सुद्युम्नः परवीरहा अपश्यत् स्त्रियं आत्मानं अश्वं च वडवां नृप ॥२६॥

नृप	राजन् !	सुद्युम्नः	सुद्युम्नने
तस्मिन्	उस (वन) में	आत्मानं	अपनेको
प्रविष्ट एव	प्रवेश करते ही	स्त्रियं च अश्वं	स्त्री तथा घोड़ेको
असौ परवीरहा	यह शत्रुवीरोंका नाशक	वडवां अपश्यत्	घोड़ी हुआ देखा ॥२६॥

तथा तदनुगाः सर्वे आत्मलिङ्गविपर्ययम् ।
दृष्ट्वा विमनसोऽभूवन् वीक्षमाणाः परस्परम् ॥२७॥

तथा तत् अनुगाः सर्वे आत्मलिंग विपर्ययं दृष्ट्वा विमनसः अभूवन् वीक्षमाणाः परस्परम् ॥२७॥

तथा तत्	इसी प्रकार उसके	परस्परं	परस्पर एक दूसरेको
सर्वे अनुगाः	सब अनुचर भी	वीक्षमाणाः	देखते हुए
आत्मलिंग	अपने स्वरूपको	विमनसः	उदास
विपर्ययं	उलटा हुआ	अभूवन्	हो गये ॥२७॥
दृष्ट्वा	देखकर		

राजोवाच

कथमेवंगुणो देशः केन वा भगवन् कृतः ।
प्रश्नमेनं समाचक्ष्व परं कौतूहलं हि नः ॥२८॥

कथं एवं गुणः देशः केन वा भगवन् कृतः प्रश्नं एनं सम आचक्ष्व परं कौतूहलं हि नः ॥२८॥

भगवन्	भगवन् !
देशः एवं	यह स्थान इस प्रकारके
गुणः कथं	गुणवाला कैसे है
वा केन कृतः	अथवा किसने बना दिया,
हि नः	क्योंकि हमें
परं कौतूहलं	बहुत कुतूहल है
एनं प्रश्नं	इस प्रश्नका
सम आचक्ष्व	भली प्रकार उत्तर दीजिए ॥२८॥

श्रीशुक उवाच

एकदा गिरिशं द्रष्टुमृषयस्तत्र सुव्रताः ।
दिशो वितिमिराभासाः कुर्वन्तः समुपागमन् ॥२९॥

एकदा गिरिशं द्रष्टुं ऋषयः तत्र सुव्रताः दिशः वितिमिर आभासाः कुर्वन्तः समुपागमन् ॥२९॥

एकदा दिशः	एक बार दिशाओंको
आभासाः	अपने तेजसे
वितिमिर	अन्धकारहीन
कुर्वन्तः सुव्रताः	करते हुए उत्तम व्रत वाले
ऋषयः तत्र	ऋषि लोग वहां
गिरिशं द्रष्टु	शंकरजी का दर्शन करने
समुपागमन्	उनके समीप आये ॥२९॥

तान् विलोक्याम्बिका देवी विवासा व्रीडिता भृशम् ।
भर्तुरङ्कात् समुत्थाय नीवीमाश्वथ पर्यधात् ॥३०॥

तान् विलोक्य अम्बिका देवी विवासा व्रीडिता भृशं भर्तुः अङ्कात् समुत्थाय नीवीं आशु अथ पर्यधात् ॥३०॥

तान् विलोक्य	उनको देखकर
विवासा	वस्त्रहीना
अम्बिकादेवी	देवी अम्बिकाने
भृशं व्रीडिता	बहुत लज्जित होकर
भर्तुः अङ्कात्	पतिकी गोदसे
समुत्थाय	झट उठकर
आशु नीवीं	शीघ्र वस्त्र
पर्यधात्	पहिन लिया ॥३०॥

ऋषयोऽपि तयोर्वीक्ष्य प्रसङ्गं रममाणयोः ।
निवृत्ताः प्रययुस्तस्मान्नरनारायणाश्रमम् ॥३१॥

ऋषयः अपि तयोः वीक्ष्य प्रसंगं रममाणयोः निवृत्ताः प्रययुः तस्मात् नरनारायण आश्रमम् ॥३१॥

ऋषयः अपि	ऋषियोंने भी	निवृत्ताः	लौटकर
तयोः	उन (उमा महेश्वर)	नरनारायण	नर-नारायणके
रममाणयोः	रमणका	आश्रमं प्रययुः	आश्रम चले गये
प्रसंगं वीक्ष्य	प्रसंग देखकर		॥३१॥
तस्मात्	वहांसे		

तदिदं भगवानाह प्रियायाः प्रियकाम्यया ।
स्थानं यः प्रविशेदेतत् स वै योषिद् भवेदिति ॥३२॥

तत इदं भगवान् आह प्रियायाः प्रिय काम्यया स्थानं यः प्रविशेत् एतत् स वै योषित् भवेत् इति ॥३२॥

तत् प्रियायाः	तब अपनी प्रियाका	स्थानं प्रविशेत्	स्थानमें प्रवेश करेगा
प्रिय काम्यया	प्रिय करनेकी इच्छासे	स वै	वह निश्चय
भगवान्	भगवान् शिवने	योषित् भवेत्	स्त्री हो जायगा'
इदं इति आह	यह इस प्रकार कहा		॥३२॥
यः एतत्	जो इस		

तत ऊर्ध्वं वनं तद् वै पुरुषा वर्जयन्ति हि ।
सा चानुचरसंयुक्ता विचचार वनाद् वनम् ॥३३॥

तत् ऊर्ध्वं वनं तत् वै पुरुषा वर्जयन्ति हि सा च अनुचर संयुक्ता विचचार वनात् वनम् ॥३३॥

हि वै	क्योंकि निश्चय	सा च	वह भी
तत् ऊर्ध्वं	उसके बादसे	अनुचर संयुक्ता	अनुचरोंके साथ
पुरुषा	पुरुषोंने	वनात्	एक वनसे दूसरे
तत् वनं	उस वनको	वनं	वनमें
वर्जयन्ति	त्याज्य कर रखा था।	विचचार	घूमने लगी ॥३३॥

अथ तामाश्रमाभ्याशे चरन्तीं प्रमदोत्तमाम् ।
स्त्रीभिः परिवृतां वीक्ष्य चकमे भगवान् बुधः ॥३४॥

अथ तां आश्रम अभ्याशे चरतीं प्रमदा उत्तमां स्त्रीभिः परिवृतां वीक्ष्य चकमे भगवान् बुधः ॥३४॥

अथ	फिर अपने	परिवृतां	घिरी हुई
आश्रम अभ्याशे	आश्रमके समीप	वीक्ष्य	देखकर
तां प्रमदा	उस उत्तम	भगवान् बुधः	भगवान् बुध
उत्तमां	स्त्रीको	चकमे	चाहने लगे ॥३४॥
स्त्रिभिः	स्त्रियोंसे		

सापि तं चकमे सुभ्रूः सोमराजसुतं पतिम् ।
स तस्यां जनयामास पुरूरवसमात्मजम् ॥३५॥

सा अपि तं चकमे सुभ्रूः सोमराज सुतं पतिं स तस्यां जनयामास पुरूखसं आत्मजम् ॥३५॥

सः अपि	वह भी	स तस्यां	उन्होंने उससे
सुभ्रूः तं	सुन्दर भौंवाली उन्हें	आत्मजं	अपने पुत्र
पतिं चकमे	पतिरूपमें चाहने लगी,	पुरूरवसं	पुरूरवाको
		जनयामास	उत्पन्न किया ॥३५॥

एवं स्त्रीत्वमनुप्राप्तः सुद्युम्नो मानवो नृपः ।
सस्मार स्वकुलाचार्यं वसिष्ठमिति शुश्रुम ॥३६॥

एवं स्त्री त्वं अनुप्राप्तः सुद्युम्नः मानवः नृपः सस्मार स्वकुल आचार्यं वशिष्ठं इति शुश्रुम ॥३६॥

इति शुश्रुम	ऐसा (हमने) सुना है कि	अनुप्राप्तः	पानेपर
मानवः नृपः	मनु पुत्र राजा	स्वकुल	अपने कुलके
सुश्रुम्न एवं	सुद्युम्नने इस प्रकार	आचार्य	आचार्य
स्त्रीत्वं	स्त्रीत्वको	वशिष्ठं	वशिष्ठका
		सस्मार	स्मरण किया ॥३६॥

स तस्य तां दशां दृष्ट्वा कृपया भृशपीडितः ।
सुद्युम्नस्याशयन् पुंस्त्वमुपाधावत शंकरम् ॥३७॥

स तस्य तां दशां दृष्ट्वा कृपया भृश पीडितः सुद्युम्नस्य आशयन् पुंस्त्वं उपाधावत शङ्करम् ॥३७॥

स	उन (विशिष्ठजी) ने	सुद्युम्नस्य	सुद्युम्नके
तस्य	उसकी	पुंस्त्वं	पुरुषत्वको
तां दशां	वह दशा	आशयन्	चाहते हुए
दृष्ट्वा	देखकर	शंकरं	शंकरजी की
कृपया	कृपा द्वारा	उपाधावत्	उपासना करने लगे
भृश पीडितः	बहुत दुःखी होकर		॥३७॥

तुष्टस्तस्मै स भगवान् ऋषये प्रियमावहन् ।
स्वां च वाचमृतां कुर्वन्निदमाह विशांपते ॥३८॥

तुष्टः तस्मै स भगवान् ऋषये प्रियं आवहन् स्वां च वाचां ऋतां कुर्वन् इदं आह विशांपते ॥३८॥

विशांपते	राजन् !	प्रियं	प्रिय
स भगवान्	वे भगवान शिव	आवहन्	करते हुए
तस्मै	उनपर	स्वां वाचां च	अपनी बातको भी
तुष्टः	प्रसन्न हुए और	ऋतां कुर्वन्	सत्य करते
ऋषये	ऋषि (वशिष्ठ) का	इदं आह	यह बोले ॥३८॥

मासं पुमान् स भविता मासं स्त्री तव गोत्रजः ।
इत्थं व्यवस्थया कामं सुद्युम्नोऽवतु मेदिनीम् ॥३९॥

मासं पुमान् स भविता मासं स्त्री तव गोत्रजः इत्थं व्यवस्थया कामं सुद्युम्नः अवतु मेदिनीं ॥३९॥

तव गोत्रजः	'तुम्हारे गोत्रमें उत्पन्न	स मासं	वह एक महीना
		पुमान्	पुरुष और

मासं	एक महीना
स्त्री भविता	स्त्री रहेगा,
इत्थं व्यवस्थया	इस व्यवस्थासे
सुद्युम्नः	सुद्युम्न
कामं	इच्छानुसार
मेदिनीं अवतु	पृथ्वीकी रक्षा करे ॥३९॥

आचार्यानुग्रहात् कामं लब्ध्वा पुंस्त्वं व्यवस्थया ।
पालयामास जगतीं नाभ्यनन्दन् स्म तं प्रजाः ॥४०॥

आचार्य अनुग्रहात् कामं लब्ध्वा पुंस्त्वं व्यवस्थया पालयामास जगतीं न अभ्यनन्दन् स्म तं प्रजाः ॥४०॥

आचार्य	आचार्य (वशिष्ठ) की
अनुग्रहात्	कृपासे
व्यवस्थया	व्यवस्थाके अनुसार
कामं	अभीष्ट
पुंस्त्वं लब्ध्वा	पुरुषत्व पाकर
जगतीं	संसारका
पालयामास	पालन करने लगा किन्तु
प्रजाः तं	प्रजाने उसको
अभ्यनन्दन् न	पसन्द नहीं किया ॥४०॥

तस्योत्कलो गयो राजन् विमलश्च सुतास्त्रयः ।
दक्षिणापथराजानो बभूवुर्धर्मवत्सलाः ॥४१॥

तस्य उत्कलः गयः राजन् विमलः च सुताः त्रयः दक्षिणापथ राजानः बभूवुः धर्मवत्सलाः ॥४१॥

राजन्	राजन् !
तस्य उत्कलः	उसके उत्कल,
गयः च विमलः	गय तथा विमल
त्रयः सुताः	तीनों पुत्र
धर्मवत्सलाः	धर्म-प्रेमी और
दक्षिणापथ	दक्षिणा पथके
राजानः बभूवुः	राजा हुए ॥४१॥

ततः परिणते काले प्रतिष्ठानपतिः प्रभुः ।
पुरूरवस उत्सृज्य गां पुत्राय गतो वनम् ॥४२॥

ततः परिणते काले प्रतिष्ठान पतिः प्रभुः पुरूरवस उत्सृज्य गां पुत्राय गतः वनम् ॥४२॥

ततः काले	फिर समयके	पुत्राय	अपने पुत्र
परिणते	आनेपर (बुढ़ापेमें)	पुरूरवस	पुरूरवाको
प्रतिष्ठान	प्रतिष्ठानपुरके	गां उत्सृज्य	पृथ्वी सौंपकर
पतिः	स्वामी	वनं गतः	वन चले गये ॥४२॥
प्रभुः	राजा (सुद्युम्न)		

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे इलोपाख्याने प्रथमोऽध्यायः ॥१॥

अथ द्वितीयोऽध्यायः

श्रीशुक उवाच—

एवं गतेऽथ सुद्युम्ने मनुर्वैवस्वतः सुते ।
पुत्रकामस्तपस्तेपे यमुनायां शतं समाः ॥१॥

एवं गते अथ सुद्युम्ने मनुः वैवस्वतः सुते पुत्रकामः तपः तेपे यमुनायां शतं समाः ॥१॥

एवं सुते	इस प्रकार अपने पुत्र	पुत्रकामः	पुत्रकी कामनासे
सुद्युम्ने	सुद्युम्नके	यमुनायां	यमुना किनारे
गते अथ	चले जानेपर फिर	शतं समाः	सौ वर्ष तक
वैवस्वतः मनुः	वैवस्वत मनुने	तपः तेपे	तपस्या की ॥१॥

ततोऽयजन्मनुर्देवमपत्यार्थं हरिं प्रभुम् ।
इक्ष्वाकुपूर्वजान् पुत्रांल्लेभे स्वसदृशान् दश ॥२॥

ततः अयजन् मनुः देवं अपत्य अर्थं हरिं प्रभुं इक्ष्वाकु पूर्वजान् पुत्रान् लेभे स्वसदृशान् दश ॥२॥

ततः मनुः	फिर मनुने	स्वसदृशान्	(उससे) अपने समान
अपत्य अर्थं	पुत्र प्राप्तिके लिए	इक्ष्वाकु	जिनमें इक्ष्वाकु
देवं	देवाधिदेव	पूर्वजान्	पहिले उत्पन्न हुए
प्रभुं हरिं	सर्वेश्वर श्रीहरिकी	दश पुत्रान् लेभे	दस पुत्र प्राप्त किये ॥२॥
अयजन्	आराधना की		

पृषध्रस्तु मनोः पुत्रो गोपालो गुरुणा कृतः ।
पालयामास गा यत्तो रात्र्यां वीरासनव्रतः ॥३॥

पृषध्रः तु मनोः पुत्रः गोपालः गुरुणा कृतः पालयामास गा यत्तः रात्र्यां वीरासन व्रतः ॥३॥

मनोः पुत्रः	(उनमेंसे) मनुके पुत्र	यत्तः	सावधान होकर
पृषध्रः तु	पृषध्रको तो	वीरासन	वीरासनसे बैठनेका
गुरुणा	गुरु (वशिष्ठ) ने	व्रतः	नियम बनाकर
गोपालः	(अपना) गोरक्षक	गा	गायोंकी
कृतः	बनाया	पालयामास	रक्षा करने लगा
रात्र्यां	वह रात्रिको		॥३॥

एकदा प्राविशद् गोष्ठं शार्दूलो निशि वर्षति ।
शयाना गाव उत्थाय भीतास्ता बभ्रमुर्व्रजे ॥४॥

एकदा प्राविशत् गोष्ठं शार्दूलः निशि वर्षति शयाना गाव उत्थाय भीताः ता बभ्रमुः व्रजे ॥४॥

एकदा वर्षति	एक बार वर्षा होते समय	शयाना गाव	सोती गायें
निशि शार्दूलः	रातमें सिंह	भीताः उत्थाय	डरकर उठ गयीं और
गोष्ठं प्राविशत्	गोष्ठमें घुस आया	ता व्रजे	वे गोष्ठमें
		बभ्रमुः	घूमने लगीं ॥४॥

एकां जग्राह बलवान् सा चुक्रोश भयातुरा ।
तस्यास्तत् क्रन्दितं श्रुत्वा पृषध्रोऽभिससार ह ॥५॥

एकां जग्राह बलवान् सा चुक्रोश भय आतुरा तस्य आक्रन्दितं श्रुत्वा पृषध्रः अभिससार ह ॥५॥

बलवान्	उस बलवान (सिंह)ने	आक्रन्दितं	उच्च क्रन्दन
एकां	एकको	श्रुत्वा	सुनकर
जग्राह	पकड़ लिया	पृषध्रः	पृषध्र
भय आतुरा	भयसे व्याकुल होकर	ह	निश्चय पूर्वक
सा चुक्रोश	वह चिल्ला पड़ी	अभिससार	उसकी ओर गया
तस्य	उसका		॥५॥

खड्गमादाय तरसा प्रलीनोडुगणे निशि ।
अजानन्नहनद् बभ्रोः शिरः शार्दूलशङ्कया ॥६॥

खड्गं आदाय तरसा प्रलीनः उडुगणे निशि अजानन् अहनत् बभ्रोः शिरः शार्दूल शङ्कया ॥६॥

तरसा	वेग पूर्वक
खड्गं आदाय	तलवार लेकर गया
निशि उडुगणे	रात्रिमें तारोंके भी
प्रलीनः	(बादलोंमें) छिप जानेसे
शार्दूल	(घोर अन्धकारके कारण) सिंह
शंकया	समझकर
बभ्रोः शिरः	कपिला गायका सिर
अहनत्	काट डाला ॥६॥

व्याघ्रोऽपि वृक्णश्रवणो निस्त्रिंशाग्राहतस्ततः ।
निश्चक्राम भृशं भीतो रक्तं पथि समुत्सृजन् ॥७॥

व्याघ्रः अपि वृक्णश्रवणः निस्त्रिंश अग्राहतः ततः निः चक्राम भृशं भीतः रक्तं पथि समुत्सृजन् ॥७॥

निस्त्रिंश	तलवारके
अग्राहतः	अगले भागके आघातसे
वृक्णश्रवणः	कान कट जानेसे
भृशं भीतः	अत्यन्त डरकर
पथि रक्तं	मार्गमें रक्त
समुत्सृजन्	टपकाता हुआ
व्याघ्रः अपि	बाघ भी
ततः	वहांसे
निः चक्राम	निकल गया ॥७॥

मन्यमानो हतं व्याघ्रं पृषध्रः परवीरहा ।
अद्राक्षीत् स्वहतां बभ्रुं व्युष्टायां निशि दुःखितः ॥८॥

मन्यमानः हतं व्याघ्रं पृषध्रः परवीरहा अद्राक्षीत् स्वहतां बभ्रुं व्युष्टायां निशि दुःखितः ॥८॥

परवीरहा	शत्रु वीरोंको मारने-वाला
पृषध्रः	पृषध्र
व्याघ्रं हतं	बाघको मारा गया
मन्यमानः	मानता था; किन्तु
निशि व्युष्टायां	रात्रि बीत जानेपर
स्वहतां	अपने द्वारा मारी गयी
बभ्रुं अद्राक्षीत्	कपिला गौ को देखकर
दुःखितः	दुःखी हो गया ॥८॥

तं शशाप कुलाचार्यः कृतागसमकामतः ।
न क्षत्रबन्धुः शूद्रस्त्वं कर्मणा भविताऽमुना ॥९॥

तं शशाप कुल आचार्यः कृत आगसं अकामतः न क्षत्र बन्धुः शूद्रः त्वं कर्मणा भविता अमुना ॥९॥

अकामतः	अनिच्छासे	अमुना कर्मणा	'इस कर्मसे
कृत आगसं	अपराध करनेवाले	त्वं क्षत्र	तुम क्षत्रियोंके
तं कुल	उसे कुलगुरु	बन्धुः न	बन्धु भी नहीं रहे'
आचार्यः	वशिष्ठने	शूद्रः भविता	शूद्र हो जाओगे ॥९॥
शशाप	शाप दे दिया		

एवं शप्तस्तु गुरुणा प्रत्यगृह्णात् कृताञ्जलिः ।
अधारयद् व्रतं वीर ऊर्ध्वरेता मुनिप्रियम् ॥१०॥

एवं शप्तः तु गुरुणा प्रत्य गृह्णात् कृत अञ्जलिः अधारयत् व्रतं वीर ऊर्ध्वरेता मुनिप्रियम् ॥१०॥

एवं	इस प्रकार	गृह्णात्	ग्रहण कर
गुरुणा तु	गुरुके द्वारा तो		लिया और
शप्तः	शापित होकर उस	मुनिप्रियं	मुनियोंके प्रिय
वीर	वीरने	ऊर्ध्वरेता	ब्रह्मचर्य
कृत अञ्जलिः	हाथ जोड़कर	व्रतं अधारयत्	व्रत धारण कर
प्रत्य	(उस शापको) उलटे		लिया ॥१०॥

वासुदेवे भगवति सर्वात्मनि परेऽमले ।
एकान्तित्वं गतो भक्त्या सर्वभूतसुहृत् समः ॥११॥

वासुदेवे भगवति सर्व आत्मनि परे अमले एकान्ति त्वं गतः भक्त्या सर्वभूत सुहृत् समः ॥११॥

सर्वभूत	सब प्राणियोंके प्रति	भक्त्या	भक्तिके द्वारा
सुहृत्	सुहृद एवं	सर्व आत्मनि	सर्वात्मा
समः	समदर्शी होकर	परे अमले	परम निर्मल

भगवति	भगवान्	एकान्ति त्वं	अनन्य भावको
वासुदेवे	वासुदेवमें	गतः	प्राप्त हो गया ॥११॥

विमुक्तसङ्गः शान्तात्मा संयताक्षोऽपरिग्रहः ।
यदृच्छयोपपन्नेन कल्पयन् वृत्तिमात्मनः ॥१२॥

विमुक्त संगः शान्त आत्मा संयत अक्षः अपरिग्रहः यदृच्छया उपपन्नेन कल्पयन् वृत्तिं आत्मनः ॥१२॥

विमुक्त संगः	आसक्तिहीन,	उपपन्नेन	मिले हुए से
शान्त आत्मा	शान्त चित्त,	आत्मनः	अपना
संयत अक्षः	जितेन्द्रिय,	वृत्तिं	जीवन-निर्वाह
अपरिग्रहः	परिग्रह रहित,	कल्पयन्	करते हुए ॥१२॥
यदृच्छया	अपने आप		

आत्मन्यात्मानमाधाय ज्ञानतृप्तः समाहितः ।
विचचार महीमेतां जडान्धबधिराकृतिः ॥१३॥

आत्मनि आत्मानं आधाय ज्ञानतृप्तः समाहितः विचचार महीं एतां जड अन्ध बधिर आकृतिः ॥१३॥

आत्मनि	आत्मामें	जड अन्ध	मूर्ख, अन्धे,
आत्मानं	चित्तको	बधिर आकृतिः	बहिरेके समान रहते
आधाय	लगाकर	एतां महीं	इस पृथ्वीपर
ज्ञानतृप्तः	ज्ञानसे तृप्त	विचचार	विचरण करता
समाहितः	एकाग्रमन		रहा ॥१३॥

एवंवृत्तो वनं गत्वा दृष्ट्वा दावाग्निमुत्थितम् ।
तेनोपयुक्तकरणो ब्रह्म प्राप परं मुनिः ॥१४॥

एवं वृत्तः वनं गत्वा दृष्ट्वा दावाग्निम् उत्थितं तेन उपयुक्त करणः ब्रह्म प्राप परं मुनिः ॥१४॥

एवं वृत्तिः	इस वृत्तिसे	तेन उपयुक्त	उसमें इन्द्रियादिको
वनं गत्वा	वनमें जाकर	करणः	लगा (भस्म) करके
उत्थितं	उठे (जलते)	मुनिः	उस मुनिने
दावाग्नि	दावाग्निको	परं ब्रह्म	परम ब्रह्मको
दृष्ट्वा	देखकर	प्राप	प्राप्त किया ॥१४॥

कविः कनीयान् विषयेषु निःस्पृहो
विसृज्य राज्यं सह बन्धुभिर्वनम् ।
निवेश्य चित्ते पुरुषं स्वरोचिषं
विवेश कैशोरवयाः परं गतः ॥१५॥

कविः कनीयान् विषयेषु निःस्पृहः विसृज्य राज्यं सह बन्धुभिः वनं निवेश्य चित्ते पुरुषं स्वरोचिषं विवेश कैशोरवयाः परं गतः ॥१५॥

कनीयान्	(मनुका) छोटा पुत्र	स्वरोचिषं	स्वयं प्रकाश
कविः	कवि	पुरुषं	परम पुरुषमें
विषयेषु	भोगोंसे	चित्ते निवेश्य	चित्त प्रविष्ट करके
निःस्पृहः	उदासीन था	वनं विवेश	वनमें जाकर
बन्धुभिः सह	भाइयोंके साथ	परं गतः	परमात्माको प्राप्त
राज्यं विसृज्य	राज्यको छोड़कर		हो गया ॥१५॥
कैशोरवयाः	किशोरावस्थामें ही		

करूषान्मानवादासन् कारूषाः क्षत्रजातयः ।
उत्तरापथगोप्तारो ब्रह्मण्या धर्मवत्सलाः ॥१६॥

करूषात् मानवात् आसन् कारूषाः क्षत्रजातयः उत्तरा पथ गोप्तारः ब्रह्मण्या धर्मवत्सलाः ॥१६॥

मानवात्	मनु-पुत्र	धर्मवत्सलाः	धर्मप्रेमी
करूषात्	करूषसे	कारूषाः	कारूष नाम
उत्तरा पथ	उत्तरा-पथके	क्षत्रजातयः	क्षत्रिय जातिके लोग
गोप्तारः	रक्षक	आसन्	हुए ॥१६॥
ब्रह्मण्या	ब्राहमण भक्त,		

धृष्टाद् धार्ष्टमभूत् क्षत्रं ब्रह्मभूयं गतं क्षितौ ।
नृगस्य वंशः सुमतिर्भूतज्योतिस्ततो वसुः ॥१७॥

धृष्टात् धार्ष्टं अभूत् क्षत्रं ब्रह्मभूयं गतं क्षितौ नृगस्य वंशः सुमतिः भूतज्योतिः ततः वसुः ॥१७॥

धृष्टात् धार्ष्टं	धृष्टसे धार्ष्ट नामक	नृगस्य वंशः	नृगके वंशमें
क्षत्रं अभूत्	क्षत्रिय हुए जो	सुमतिः	सुमति उसका
क्षितौ	पृथ्वीपर पीछे	भूतज्योतिः	भूतज्योति
ब्रह्मभूयं	ब्राह्मणत्वको	ततः वसुः	उसका पुत्र वसु हुआ ॥१७॥
गतं	प्राप्त हो गये		

वसोः प्रतीकस्तत्पुत्र ओघवानोघवत्पिता ।
कन्या चौघवती नाम सुदर्शन उवाह ताम् ॥१८॥

वसोः प्रतीकः तत् पुत्रः ओघवान् ओघवत् पिता कन्या च ओघवती नाम सुदर्शन उवाह ताम् ॥१८॥

वसोः प्रतीकः	वसुसे प्रतीक हुआ,	कन्या	एक कन्या भी
तत् पुत्रः	उसका पुत्र ओघवान्	ओघवती नाम	ओघवती नामक हुई
ओघवत्	ओघवत्का	तां सुदर्शन	उससे सुदर्शनने
पिता	पिता हुआ	उवाह	विवाह कर लिया ॥१८॥
च	तथा उसके		

चित्रसेनो नरिष्यन्तादृक्षस्तस्य सुतोऽभवत् ।
तस्य मीढ्वांस्ततः कूर्च इन्द्रसेनस्तु तत्सुतः ॥१९॥

चित्रसेनः नरिष्यन्तात् ऋक्षः तस्य सुतः अभवत् तस्य मीढ्वान् ततः कूर्चः इन्द्रसेनः तु तत् सुतः ॥१९॥

नरिष्यन्तात्	(मनु पुत्र) नरिष्यन्तसे	तस्य सुतः	उसका पुत्र
		ऋक्षः अभवत्	ऋक्ष हुआ,
चित्रसेनः	चित्रसेन हुआ,	तस्य	उसका पुत्र

मीढ्वान्	मीढ्वान्,	**तत् सुतः तु**	उसका पुत्र तो
ततः कूर्चः	उससे कूर्च	**इन्द्रसेनः**	इन्द्रसेन था ॥१९॥

वीतिहोत्रस्त्विन्द्रसेनात् तस्य सत्यश्रवा अभूत् ।
उरुश्रवाः सुतस्तस्य देवदत्तस्ततोऽभवत् ॥२०॥

वीतिहोत्रः तु इन्द्रसेनात् तस्य सत्यश्रवा अभूत् उरुश्रवाः सुतः तस्य देवदत्तः ततः अभवत् ॥२०॥

इन्द्रसेनात् तु	इन्दसेनसे तो	**तस्य सुतः**	उसका पुत्र
वीतिहोत्रः	वीतिहोत्र	**उरुश्रवाः**	उरुश्रवा
तस्य सत्यश्रवा	उसके सत्यश्रवा	**ततः देवदत्तः**	उससे देवदत्त
अभूत्	हुआ,	**अभवत्**	उत्पन्न हुआ ॥२०॥

ततोऽग्निवेश्यो भगवानग्निः स्वयमभूत् सुतः ।
कानीन इति विख्यातो जातूकर्ण्यो महानृषिः ॥२१॥

ततः अग्निवेश्यः भगवान् अग्निः स्वयं अभूत् सुतः कानीन इति विख्यातः जातूकर्ण्यः महान् ऋषिः ॥२१॥

ततः	उससे	**कानीन**	कानीन और
अग्निवेश्यः	अग्निवेश्य नामसे	**जातूकर्ण्यः**	जातूकर्ण्य
स्वयं भगवान्	स्वयं भगवान्	**इति विख्यातः**	इन नामोंसे प्रसिद्ध
अग्निः सुतः	अग्नि पुत्र रूपमें	**महान् ऋषिः**	महर्षि हुए ॥२१॥
अभूत्	उत्पन्न हुए, जो		

ततो ब्रह्मकुलं जातमाग्निवेश्यायनं नृप ।
नरिष्यन्तान्वयः प्रोक्तो दिष्टवंशमतः शृणु ॥२२॥

ततः ब्रह्मकुलं जातं अग्निवेश्यायनं नृप नरिष्यन्त अन्वयः प्रोक्तः दिष्टवंशं अतः शृणु ॥२२॥

नृप	राजन्	**अग्निवेश्यायनं**	अग्निवेश्यायन
ततः	आगे उससे	**ब्रह्मकुलं**	नामक ब्राह्मण कुल

जातं	उत्पन्न हुआ।	अन्वयः प्रोक्तः	वंश सुना दिया,
नरिष्यन्त	(इस प्रकार) नरिष्यन्तका	अतः दिष्टवंशं	अब दिष्टका वंश
		शृणु	सुनो ॥२२॥

नाभागो दिष्टपुत्रोऽन्यः कर्मणा वैश्यतां गतः।
भलन्दनः सुतस्तस्य वत्सप्रीतिर्भलन्दनात् ॥२३॥

नाभागः दिष्टपुत्रः अन्यः कर्मणा वैश्यतां गतः भलनन्दन सुतः तस्य वत्सप्रीतिः भलनन्दनात् ॥२३॥

दिष्टपुत्रः	दिष्टका पुत्र	तस्य सुतः	उसका पुत्र
नाभागः	नाभाग (आगे नाभागका वर्णन होगा,	भलनन्दनः	भलनन्दन हुआ,
		भलनन्दनात्	भलनन्दनसे
अन्यः	उनसे) भिन्न है।	वत्सप्रीतिः	वत्सप्रीति हुआ
कर्मणा	अपने कर्मसे यह		॥२३॥
वैश्यतां गतः	वैश्यत्वको प्राप्त हो गया,		

वत्सप्रीतेः सुतः प्रांशुस्तत्सुतं प्रमतिं विदुः।
खनित्रः प्रमतेस्तस्माच्चक्षुषोऽथ विविंशतिः ॥२४॥

वत्सप्रीतेः सुतः प्रांशुः तत् सुतं प्रमतिं विदुः खनित्रः प्रमतेः तस्मात् चाक्षुषः अथ विविंशतिः ॥२४॥

वत्सप्रीतेः	वत्सप्रीतिका	प्रमतेः खनित्रः	प्रमतिके खनित्र,
सुतः	पुत्र	तस्मात् चाक्षुषः	उससे चाक्षुष
प्रांशुः तत् सुतं	प्रांशु और उसका पुत्र	अथ विविंशतिः	फिर उससे विविंशति हुआ ॥२४॥
प्रमतिं विदुः	प्रमति जाना जाता है,		

विविंशतिसुतो रम्भः खनिनेत्रोऽस्य धार्मिकः।
करन्धमो महाराज तस्यासीदात्मजो नृप ॥२५॥

विविंशति सुत; रम्भः खनिनेत्रः अस्य धार्मिकः करन्धमः महाराज तस्य आसीत आत्मजः नृप ॥२५॥

नृप	राजन् !	तस्य आत्मजः	उनके पुत्र
विविंशति सुतः	विविंशतिका पुत्र	महाराज	महाराज
रम्भः	रम्भ	करन्धम	करन्धम
अस्य धार्मिकः	इसके धार्मिक	आसीत	थे ॥२५॥
खनिनेत्रः	खनिनेत्र		

तस्यावीक्षित् सुतो यस्य मरुत्तश्चक्रवर्त्यभूत् ।
संवर्तोऽयाजयद् यं वै महायोग्यङ्गिरःसुतः ॥२६॥

तस्य अविक्षित् सुतः यस्य मरुतः चक्रवर्ति अभूत् संवर्त अयाजयत् यं वै महायोगि अंगिरः सुतः ॥२६॥

तस्य सुतः	उनके पुत्र	महायोगि	महायोगी
अवीक्षित्	अवीक्षित हुए	अंगिरः सुतः	महर्षि अंगिराके पुत्र
यस्य चक्रवर्ति	जिनके चक्रवर्ती	संवर्तः	संवर्तने
मरुतः अभूत्	मरुत् हुए,	अयाजयत्	यज्ञ कराया ॥२६॥
वै यं	निश्चय जिनसे		

मरुत्तस्य यथा यज्ञो न तथान्यस्य कश्चन ।
सर्वं हिरण्मयं त्वासीद् यत् किञ्चित्चास्य शोभनम् ॥२७॥

मरुत्तस्य यथा यज्ञः न तथा अन्यस्य कश्चन सर्वं हिरण्मयं तु आसीत् यत् किञ्चित् च अस्य शोभनम् ॥२७॥

यथा मरुत्तस्य	जैसा मरुत्का	अस्य शोभनं	इस यज्ञमें सजावट थी,
यज्ञः	यज्ञ हुआ	सर्वं तु	वह सब तो
अन्यस्य कश्चन	दूसरे किसीका	हिरण्मयं	स्वर्णमय
तथा न	वैसा नहीं हुआ	आसीत्	थी ॥२७॥
यत् किञ्चित्	जो कुछ		
च	भी		

अमाद्यदिन्द्रः सोमेन दक्षिणाभिर्द्विजातयः ।
मरुतः परिवेष्टारो विश्वेदेवाः सभासदः ॥२८॥

अमाद्यत् इन्द्रः सोमेन दक्षिणाभिः द्विजातयः मरुतः परिवेष्टारः विश्वेदेनाः सभासदः ॥२८॥

इन्द्रः सोमेन	इन्द्र सोमपानसे तथा	मरुतः	मरुद्गण
द्विजातयः	ब्राह्मण	परिवेष्टारः	परसनेवाले थे,
दक्षिणाभिः	दक्षिणासे	विश्वेदेवाः	विश्वेदेव
अमाद्यत्	मतवाले हो गये थे ।	सभासदः	सभासद थे ॥२८॥

मरुत्तस्य दमः पुत्रस्तस्यासीद् राज्यवर्धनः ।
सुधृतिस्तत्सुतो जज्ञे सौधृतेयो नरः सुतः ॥२९॥

मरुत्तस्य दमः पुत्रः तस्य आसीत् राज्यवर्धनः सुधृतिः तत् सुतः जज्ञे सौधृतेयः नरः सुतः ॥२९॥

मरुत्तस्य	मरुत्का	तत् सुतः	उसका पुत्र
पुत्रः दमः	पुत्र दम	सुधृतिः जज्ञे	सुधृति उत्पन्न हुआ
तस्य	उसका	सौधृतेयः सुतः	सुधृतिका पुत्र
राज्यवर्धनः	राज्यवर्धन	नरः	नर हुआ ॥२९॥
आसीत्	पुत्र था,		

तत्सुतः केवलस्तस्माद् बन्धुमान् वेगवांस्ततः ।
बन्धुस्तस्याभवद् यस्य तृणबिन्दुर्महीपतिः ॥३०॥

तत् सुतः केवलः तस्मात् बन्धुमान् वेगवान् ततः बन्धुः तस्य अभवत् यस्य तृणबिन्दुः महीपतिः ॥३०॥

तत सुतः	उसका पुत्र	अभवत् यस्य	उत्पन्न हुआ जिसके
केवलः तस्मात्	केवल था, उससे	महीपतिः	पृथ्वीपति
बन्धुमान्	बन्धुमान्	तृणबिन्दुः	तृणबिन्दु हुआ ॥३०॥
ततः वेगवान्	उससे वेगवान		
तस्य बन्धुः	उसके बन्धु		

तं भेजेऽलम्बुषा देवी भजनीयगुणालयम् ।
वराप्सरा यतः पुत्राः कन्या चेडविडाभवत् ॥३१॥

तं भेजे अलम्बुषा देवी भजनीयं गुण आलयं वर अप्सरा यतः पुत्राः कन्या च इडविडा अभवत् ॥३१॥

तं भजनीयं	उन सेवनीय	**यतः पुत्राः**	जिससे कई पुत्र
गुण आलयं	गुणागारको	**च इडविडा**	तथा इडविडा नाम-
वर अप्सरा	अप्सरा श्रेष्ठा		की
देवी अलम्बुषा	देवी अलम्बुषाने	**कन्या अभवत्**	कन्या उत्पन्न हुई
भेजे	सेवन (वरण) किया		॥३१॥

तस्यामुत्पादयामास विश्रवा धनदं सुतम् ।
प्रादाय विद्यां परमामृषिर्योगेश्वरात् पितुः ॥३२॥

तस्यां उत्पादयामास विश्रवा धनदं सुतं प्रादाय विद्यां परमां ऋषिः योगेश्वरात् पितुः ॥३२॥

पितुः	अपने	**प्रादाय तस्यां**	प्राप्त करके उस
योगेश्वरात्	योगेश्वर पिता		(इडविडा) में
	पुलस्त्यजी से	**ऋषिः विश्रवा**	विश्रवा ऋषिने
परमां विद्यां	उत्तम विद्या	**धनदं सुतं**	धनाधीश कुवेर पुत्र
		उत्पादयामास	उत्पन्न किया ॥३२॥

विशालः शून्यबन्धुश्च धूम्रकेतुश्च तत्सुताः ।
विशालो वंशकृद् राजा वैशालीं निर्ममे पुरीम् ॥३३॥

विशालः शून्यबन्धुः च धूम्रकेतुः च तत् सुताः विशालः वंश कृत् राजा वैशालीं निर्ममे पुरीम् ॥३३॥

विशालः च	विशाल और	**तत्**	उन (राजा तृण-
शून्य वन्धुः च	शून्य वन्धु तथा		विन्दु) के
धूम्रकेतुः	धूम्रकेतु	**सुताः**	पुत्र थे

वंश	(उनमें) वंश वृद्धि	वैशालीं पुरीं	वैशाली पुरीका
कृत्	करनेवाले	निर्ममे	निर्माण किया ॥३३॥
राजा विशालः	राजा विशालने		

हेमचन्द्रः सुतस्तस्य धूम्राक्षस्तस्य चात्मजः ।
तत्पुत्रात् संयमादासीत् कृशाश्वः सहदेवजः ॥३४॥

हेमचन्द्रः सुतः तस्य धूम्राक्षः तस्य च आत्मजः तत् पुत्रात् संयमात् आसीत् कृशाश्वः सह देवजः ॥३४॥

तस्य सुतः	उनके पुत्र	तत् पुत्रात्	उनके पुत्र
हेमचन्द्रः	हेमचन्द्र	संयमात्	संयमसे
च तस्य	और उनके	कृशाश्वः सह	कृशाश्व तथा उसके साथ
आत्मजः	पुत्र		
धूम्राक्षः	धूम्राक्ष हुए ।	देवजः आसीत्	देवज थे ॥३४॥

कृशाश्वात् सोमदत्तोऽभूद् योऽश्वमेधैरिडस्पतिम् ।
इष्ट्वा पुरुषमापाग्र्यां गतिं योगेश्वराश्रितः ॥३५॥

कृशाश्वात् सोमदत्तः अभूत् यः अश्वमेधैः इडस्पतिं इष्ट्वा पुरुषं आप अग्र्यां गतिं योगेश्वर आश्रितः ॥३५॥

कृशाश्वात्	कृशाश्वसे	पुरुषं	परम पुरुषकी
सोमदत्तः	सोमदत्त	इष्ट्वा	आराधना करके
अभूत्	उत्पन्न हुआ	योगेश्वर	योगेश्वरोंका
यः	जिसने	आश्रितः	आश्रय लेकर
अश्वमेधैः	अश्वमेध यज्ञों द्वारा	अग्र्यां गतिं	उत्तम गति
इडस्पतिं	यज्ञपति	आप	प्राप्त की ॥३५॥

सौमदत्तिस्तु सुमतिस्तत्सुतो जनमेजयः ।
एते वैशालभूपालास्तृणबिन्दोर्यशोधराः ॥३६॥

सौमदत्तिः तु सुमतिः तत् सुतः जनमेजयः एते वैशाल भूपालाः तृणबिन्दोः यशः धराः ॥३६॥

सौमदत्तिः तु	सोमदत्तका पुत्र तो	तृणबिन्दोः	तृणविन्दुके
सुमतिः	सुमति था	यशः धराः	सुयश धारक
तत् सुतः	उसका पुत्र	वैशाल	वैशाली
जनमेजयः	जनमेजय हुआ,	भूपालाः	नरेश हुए ॥३६॥
एते	ये इतने		

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
नवमस्कन्धे द्वितीयोऽध्यायः ॥२॥

अथ तृतीयोऽध्यायः

श्रीशुक उवाच

शर्यातिर्मानवो राजा ब्रह्मिष्ठः स बभूव ह ।
यो वा अङ्गिरसां सत्रे द्वितीयमह ऊचिवान् ॥१॥

शर्यातिः मानवः राजा ब्रह्मिष्ठः स बभूव ह यः वा अंगिरसां सत्रे द्वितीयं अह ऊचिवान् ॥१॥

मानवः	मनुका पुत्र	अंगिरसां	अंगिरा गोत्रीय ब्राह्मणोंके
राजा शर्यातिः	राजा शर्याति	सत्रे	यज्ञमें
स ह वा	निश्चय ही वह	द्वितीयं अह	दूसरे दिनका कर्म
ब्रह्मिष्ठः बभूव	वेदोंका तत्त्वज्ञ हुआ	ऊचिवान्	बतलाया ॥१॥
यः	जिसने		

सुकन्या नाम तस्यासीत् कन्या कमललोचना ।
तया सार्धं वनगतो ह्यगमच्च्यवनाश्रमम् ॥२॥

सुकन्या नाम तस्य आसीत् कन्या कमललोचना तया सार्धं वनगतः हि अगमत् च्यवन आश्रमम् ॥२॥

तस्य	उसकी	वनगतः	वनमें जानेपर
सुकन्या नाम	सुकन्या नामकी	हि	क्योंकि
कमललोचना	पद्मनयनी	च्यवन	च्यवन ऋषियोंके
कन्या आसीत्	एक पुत्री थी,	आश्रमं	आश्रममें
तया सार्धं	उसके साथ	अगमत्	चला गया ॥२॥

सा सखीभिः परिवृता विचिन्वत्यंघ्रिपान् वने ।
वल्मीकरन्ध्रे ददृशे खद्योते इव ज्योतिषी ॥३॥

सा सखीभिः परिवृता विचिन्वती अंघ्रिपान् वने वल्मीक रन्ध्रे दद्दशे खद्योते इव ज्योतिषी ॥३॥

सा	वह (सुकन्या)	वल्मीक	दीमकोंकी बांबीके
सखीभिः	सखियोंसे	रन्ध्रे	छिद्रमें
परिवृता	घिरी हुई	खद्योत इव	जुगुनूकी भाँति
वने	वनमें	ज्योतिषी	दो चमकदार
अंघ्रिपान्	(विशेष) वृक्षोंको	दद्दशे	वस्तु देखीं ॥३॥
विचिन्वती	ढूंढ़ती हुई (एक जगह)		

ते दैवचोदिता बाला ज्योतिषी कण्टकेन वै ।
अविध्यन्मुग्धभावेन सुस्रावासृक ततो बहु ॥४॥

ते दैव चोदिते बाला ज्योतिषी कण्टकेन वै अविध्यत् मुग्ध भावेन सुस्राव असृक ततः बहु ॥४॥

दैव चोदिते	दैवकी प्रेरणासे	ज्योतिषी	उन ज्योतियोंको
ते बाला	उस कन्याने	अविध्यत्	बींध दिया
मुग्ध भावेन	बाल अज्ञान वश	ततः बहु	इससे उनसे बहुत
वै कण्टकेन	अरे, काँटेसे	असृक सुस्राव	रक्त बहने लगा ॥४॥

शकृन्मूत्रनिरोधोऽभूत् सैनिकानां च तत्क्षणात् ।
राजर्षिस्तमुपालक्ष्य पुरुषान् विस्मितोऽब्रवीत् ॥५॥

शकृन् मूत्र निरोधः अभूत् सैनिकानां च तत् क्षणात् राजर्षिः तं उपालक्ष्य पुरुषान् विस्मितः अब्रवीत् ॥५॥

तत् क्षणात्	उसी क्षणसे	विस्मितः	चकित
सैनिकानां च	सैनिकोंका तो	राजर्षिः	राजर्षि शर्यातिने
शकृन् मूत्र	मल-मूत्र	पुरुषान्	चकित सेवकोंसे
निरोधः अभूत्	निरोध हो गया,	अब्रवीत्	कहा ॥५॥
तं उपालक्ष्य	इसे देखकर		

अप्यभद्रं न युष्माभिर्भार्गवस्य विचेष्टितम् ।
व्यक्तं केनापि नस्तस्य कृतमाश्रमदूषणम् ॥६॥

अपि अभद्रं न युष्माभिः भार्गवस्य विचेष्टितं व्यक्तं केन अपि नः तस्य कृतं आश्रम दूषणम् ॥६॥

युष्माभिः	तुम लोगोंने	न विचेष्टितं	नहीं किया है ?
भार्गवस्य	भृगुनन्दन च्यवन ऋषिका	व्यक्तं नः	स्पष्ट है कि हममें से
		केन अपि	किसीने भी
अपि अभद्रं	कहीं कोई अमंगल तो	तस्य आश्रम	उनके आश्रमको
		दूषणं कृतम्	दूषित किया है ॥६॥

सुकन्या प्राह पितरं भीता किञ्चित् कृतं मया ।
द्वे ज्योतिषी अजानन्त्या निर्भिन्नेकण्टकेन वै ॥७॥

सुकन्या प्राह पितरं भीता किञ्चित् कृतं मया द्वे ज्योतिषी अजानन्त्या निर्भिन्ने कण्टकेन वै ॥७॥

भीता सुकन्या	डरकर सुकन्याने	अजानन्त्या	अनजानमें
पितरं प्राह	पितासे कहा	कण्टकेन	काँटोंसे
वै मया	निश्चय मैंने	द्वे ज्योतिषी	दो ज्योतियोंको
किञ्चित् कृत	कुछ किया है	निर्भिन्ने	बींध दिया है ॥७॥

दुहितुस्तद् वचः श्रुत्वा शर्यातिर्जातसाध्वसः ।
मुनिं प्रसादयामास वल्मीकान्तर्हितं शनैः ॥८॥

दुहितुः तत् वचः श्रुत्वा शर्यातिः जात साध्वसः मुनिं प्रसादयामास बल्मीक अन्तर्हितं शनैः ॥८॥

दुहितुः तत्	पुत्रीकी वह	बल्मीक	दीमकोंकी
वचः	बात	अन्तर्हितं	बांबीमें छिपे
श्रुत्वा	सुनकर	मुनिं	मुनि च्यवनको
शर्यातिः	राजा शर्यातिको	शनैः	धीरे-धीरे
साध्वसः जात	घबडाहट उत्पन्न हुई,	प्रसादयामास	(उन्होंने) प्रसन्न किया ॥८॥

तदभिप्रायमाज्ञाय प्रादाद् दुहितरं मुनेः ।
कृच्छ्रान्मुक्तस्तमामन्त्र्य पुरं प्रायात् समाहितः ॥९॥

तत् अभिप्रायं आज्ञाय प्रादात् दुहितरं मुनेः कृच्छ्रात् मुक्तः तं आमन्त्र्य पुरं प्रायात् समाहितः ॥९॥

तत् मुनेः	तब मुनिका	मुक्तः	छूटकर
अभिप्रायं	अभिप्राय	तं	उन (मुनि) से
आज्ञाय	जानकर	आमन्त्र्य	अनुमति लेकर
दुहितरं	(उन्हें) पुत्री	समाहितः	एकाग्रचित्तसे
प्रादात्	प्रदान कर दी	पुरं प्रायात्	अपने नगर चले गये
कृच्छ्रात्	(इस प्रकार) संकटसे		॥९॥

सुकन्या च्यवनं प्राप्य पतिं परमकोपनम् ।
प्रीणयामास चित्तज्ञा अप्रमत्तानुवृत्तिभिः ॥१०॥

सुकन्या च्यवनं प्राप्य पतिं परम कोपनं प्रीणयामास चित्तज्ञा अप्रमत्ता अनुवृत्तिभिः ॥१०॥

परम कोपनं	महाक्रोधी	सुकन्या	सुकन्याने
च्यवनं पतिं	च्यवनजीको पति रूपमें	अनुवृत्तिभिः	सेवा करके
		प्रीणयामास	(उन्हें) प्रसन्न कर लिया ॥११॥
प्राप्य	पाकर		
चित्तज्ञा	उनके चित्तका भाव जाननेवाली		

कस्यचित् त्वथ कालस्य नासत्यावाश्रमागतौ ।
तौ पूजयित्वा प्रोवाच वयो मे दत्तमीश्वरौ ॥११॥

कस्यचित् तु अथ कालस्य नासत्याः आश्रम आगतौ तौ पूजयित्वा प्रोवाच वयः मे दत्तं ईश्वरौ: ॥११॥

अथ तु	फिर तो	कालस्य	समय
कस्यचित्	किसी	नासत्याः	दोनों अश्विनी कुमार

आश्रम आगतौ	च्यवनाश्रम आये,	ईश्वरौ	आप दोनों समर्थ हैं
तौ पूजयित्वा	उनका सत्कार करके	मे वयः	मुझे युववस्था
प्रोवाच	(च्यवन ऋषिने) कहा	दत्तं	दीजिए ॥११॥

ग्रहं ग्रहीष्ये सोमस्य यज्ञे वामप्यसोमपोः ।
क्रियतां मे वयो रूपं प्रमदानां यदीप्सितम् ॥१२॥

ग्रहं ग्रहीष्ये सोमस्य यज्ञे वां अपि असोमपोः क्रियतां मे वयः रूपं प्रमदानां यत् ईप्सितम् ॥१२॥

यत् प्रमदानां	जो युवतियोंको	अपि	अधिकारी न होने पर भी
ईप्सितं	अभीष्ट हो		
मे वयः रूपं	मेरी आयु और रूप	यज्ञे वां	यज्ञमें आप दोनोंको
क्रियतां	वैसा बना दो,	सोमस्य ग्रहं	सोम ग्रहणका
असोमपोः	सोमपानका	ग्रहीष्ये	अधिकारी बनाऊँगा ॥१२॥

बाढमित्यूचतुर्विप्रमभिनन्द्य भिषक्तमौ ।
निमज्जतां भवानस्मिन् ह्रदे सिद्धविनिर्मिते ॥१३॥

बाढं इति ऊचतुः विप्रं अभिनन्द्य भिषक् तमौ निमज्जतां भवान् अस्मिन् ह्रदे सिद्ध विनिर्मिते ॥१३॥

भिषक् तमौ	उन श्रेष्ठ वैद्योंने	सिद्ध	सिद्धोंके
विप्रं	ब्राह्मण च्यवनका	विनिर्मिते	द्वारा बनाये*
अभिनन्द्य	अभिनन्दन करके	अस्मिन् ह्रदे	इस कुण्डमें
'बाढं' इति	'ठीक है' ऐसा	भवान्	आप
ऊचतुः	कहा	निमज्जतां	डुबकी लगायें ॥१३॥

*श्रीधर स्वामी आदि ने 'सिद्ध विनिर्मिते' का अर्थ तो सिद्धों द्वारा निर्मित ही दिया है; किन्तु सिद्धौषधियों द्वारा निर्मित अर्थ भी चिन्तनीय है।

इत्युक्त्वा जरया ग्रस्तदेहो धमनिसन्ततः ।
ह्रदं प्रवेशितोऽश्विभ्यां वलीपलितविप्रियः ॥१४॥

इति उक्त्वा जरया ग्रस्त देहः धमनि संततः ह्रदं प्रवेश्य अश्विभ्यां वलीपलित विप्रियः ॥१४॥

इति उक्त्वा	ऐसा कहकर	धमनि संततः	नसोंसे भरा हुआ
अश्विभ्यां	अश्विनी कुमारों द्वारा	विप्रियः देहः	अप्रिय शरीर
जरया ग्रस्त	बुढ़ापेसे आक्रान्त	ह्रदं प्रवेश्य	कुण्डमें प्रवेश कराया गया ॥१४॥

पुरुषास्त्रय उत्तस्थुरपीच्या वनिताप्रियाः ।
पद्मस्रजः कुण्डलिनस्तुल्यरूपाः सुवाससः ॥१५॥

पुरुषाः त्रय उत्तस्थुः अपीच्या वनिताप्रियाः पद्मस्रजः कुण्डलिनः तुल्यरूपाः सुवाससः ॥१५॥

अपीच्या	अत्यन्त सुन्दर	सुवाससः	उत्तम वस्त्रोंवाले
वनितप्रियाः	कामिनियोंको प्रिय लगनेवाले	तुल्य रूपा	समान रूपवाले
कुण्डलिनः	कुण्डलधारी	त्रयः पुरुषाः	तीन पुरुष
पद्मस्रजः	कमलोंकी माला पहिने	उत्तस्थुः	(उस कुण्डसे) ऊपर आये ॥१५॥

तान् निरीक्ष्य वरारोहा सरूपान् सूर्यवर्चसः ।
अजानती पतिं साध्वी अश्विनौ शरणं ययौ ॥१६॥

तान् निरीक्ष्य वरारोहा सरूपान् सूर्यवर्चसः अजानती पतिं साध्वी अश्विनौ शरणं ययौ ॥१६॥

सूर्यवर्चसः	सूर्यके समान कान्ति-वाले	सरूपान्	समान रूपका
तान्	उनको	निरीक्ष्य	देखकर
		वरारोहा	सुन्दरी पतिव्रता

साध्वी	सुकन्या	अश्विनौ	अश्विनी कुमारोंकी
पतिं	पतिको	शरणं ययौ	शरणमें गयी ॥१६॥
अजानती	न पहिचानकर		

दर्शयित्वा पतिं तस्यै पातिव्रत्येन तोषितौ ।
ऋषिमामन्त्र्य ययतुर्विमानेन त्रिविष्टपम् ॥१७॥

दर्शयित्वा पतिं तस्य पातिव्रत्येन तोषितौ ऋषिं आमन्त्र्य ययतुः विमानेन त्रिविष्टपम् ॥१७॥

तस्य	उसके	ऋषिं	ऋषिसे
पातिव्रत्येन	पतिव्रत-धर्मसे	अमन्त्र्य	अनुमति लेकर
तोषितौ	सन्तुष्ट होकर	विमानेन	विमान द्वारा
तस्यै पतिं	उसे उसके पतिको	त्रिविष्टपं	स्वर्ग
दर्शयित्वा	दिखलाकर	ययतुः	चले गये ॥१७॥

यक्ष्यमाणोऽथ शर्यातिश्च्यवनस्याश्रमं गतः ।
ददर्श दुहितुः पार्श्वे पुरुषं सूर्यवर्चसम् ॥१८॥

यक्ष्यमाणः अथ शर्यातिः च्यवनस्य आश्रमं गतः ददर्श दुहितुः पार्श्वे पुरुषं सूर्य वर्चसम् ॥१८॥

अथ	फिर जब	दुहितुः पार्श्वे	(वहां) पुत्रीकी बगलमें
शर्यातिः	राजा शर्याति	सूर्य	सूर्यके समान
यक्ष्यमाणः	यज्ञ करनेको उद्यत हुए तब	वर्चसं	कान्तिमान
च्यवनस्य	महर्षि च्यवनके	पुरुषं ददर्श	पुरुषको देखा ॥१८॥
आश्रमं गतः	आश्रम पहुँचे,		

राजा दुहितरं प्राह कृतपादाभिवन्दनाम् ।
आशिषश्चाप्रयुञ्जानो नातिप्रीतमना इव ॥१९॥

राजा दुहितरं प्राह कृत पाद अभिवन्दनां आशिषः च अप्रयुञ्जानः न अति प्रीतमना इव ॥१९॥

पाद	अपने	अति	बहुत
अभिवन्दनां	चरणोंमें प्रणाम	प्रीतमना न	प्रसन्न मन न
कृत दुहितरं	करनेपर पुत्रीको	इव	होनेकी भाँति
आशिषः च	आशीर्वाद भी	राजा	राजा शर्यातिने
अप्रयुञ्जानः	न देकर	दुहितरं प्राह	पुत्रीसे कहा ॥१९॥

चिकीर्षितं ते किमिदं पतिस्त्वया
प्रलम्भितो लोकनमस्कृतो मुनिः ।
यत् त्वं जराग्रस्तमसत्यसम्मतं
विहाय जारं भजसेऽमुमध्वगम् ॥२०॥

चिकीर्षितं ते किं इदं पतिः त्वया प्रलम्भितः लोक नमस्कृतः मुनिः यत् त्वं जराग्रस्तं असति असम्मतं विहाय जारं भजसे अमुं अध्वगम् ॥२०॥

ते इदं	तुम यह	यः त्वं असति	जो तू असती
किं चिकीर्षितं	क्या करना चाहती हो	जराग्रस्तं	बुढ़ापे ग्रस्त होनेसे
		असम्मतं	पसन्द न आनेवाले
लोक	सब लोक	पतिं विहाय	पतिको छोड़कर
नमस्कृतः	जिन्हें प्रणाम करते हैं	अमुं अध्वगं	इस राह चलते
मुनिः	ऐसे मुनिको	जारं	परपुरुषका
त्वया	तुमने	भजसे	सेवन कर रही है ॥२०॥
प्रलम्भितः	धोखा दिया		

कथं मतिस्तेऽवगतान्यथा सतां
कुलप्रसूते कुलदूषणं त्विदम् ।
बिभर्षि जारं यदपत्रपा कुलं
पितुश्च भर्तुश्च नयस्यधस्तमः ॥२१॥

कथं मतिः ते अवगता अन्यथा सतां कुल प्रसूते कुल दूषणं तु इदं विभर्षि जारं यत् अपत्रपा कुलं पितुः च भर्तुः च नयसि अधः तमः ॥२१॥

सतां कुल	सत् पुरुषोंके कुलमें	यत्	जो
प्रसूते	उत्पन्ने !	अपत्रपा	निर्लज्ज होकर
ते मतिः	तेरी बुद्धि	जारं	परपुरुषको
कथं अन्यथा	कैसे विपरीत	बिभर्षि	आश्रय दे रही है,
अवगता	हो गयी	पितुः च	पिताके और
इदं तु	यह (आचरण) तो	भर्तुः च कुलं	पतिके भी कुलको
कुल	कुलमें	अधः तमः	नीचे नरकमें
दूषणं	कलंक लगानेवाला है,	नयसि	ले जायगी ॥२१॥

एवं ब्रुवाणं पितरं स्मयमाना शुचिस्मिता ।
उवाच तात जामाता तवैष भृगुनन्दनः ॥२२॥

एवं ब्रुवाणं पितरं स्मयमाना शुचिस्मिता उवाच तात जामाता तव एष भृगुनन्दनः ॥२२॥

एवं ब्रुवाणं	इस प्रकार कहते हुए	उवाच	कहा
पितरं	पितासे	तात तव	'पिताजी ! आपके
स्मयमाना	मुस्कराती हुई	जामाता एव	जामाता यही
शुचिस्मिता	पवित्र मुस्कानवाली (सुकन्याने)	भृगुनन्दनः	भृगु-नन्दन हैं' ॥२२॥

शशंस पित्रे तत् सर्वं वयोरूपाभिलम्भनम् ।
विस्मितः परमप्रीतस्तनयां परिषस्वजे ॥२३॥

शशंस पित्रे तत् सर्वं वयः रूप अभिलम्भनं विस्मितः परम प्रीतः तनयां परिषस्वजे ॥२३॥

वयः रूप	अवस्था और सौन्दर्य	विस्मितः	(इससे राजा) चकित
अभिलम्भनं	प्राप्त होनेकी		हुए और
तत् सर्वं	वह सब (घटना)	परम प्रीतः	अत्यन्त प्रसन्न होकर
पित्रे शशंस	(उसने) पिताको बतलायी	तनयां	पुत्रीका
		परिषस्वजे	आलिंगन किया ॥२३॥

सोमेन याजयन् वीरं ग्रहं सोमस्य चाग्रहीत् ।
असोमपोरप्यश्विनोश्च्यवनः स्वेन तेजसा ॥२४॥

सोमेन याजयन् वीरं ग्रहं सोमस्य च अग्रहीत् असोमपोः अपि अश्विनोः च्यवनः स्वेन तेजसा ॥२४॥

वीरं	वीरवर (शर्माति) से	अश्विनोः	अश्विनी कुमारोंको
सोमेन	सोम	सोमस्य च	सोमका भी
याजयन्	यज्ञ करवाकर	ग्रहं	ग्रहण करनेके लिए
च्यवनः स्वेन	च्यन ऋषिने अपने	अग्रहीत्	(सोमकी) आहुति
तेजसा	तेजसे		उठायी ॥२४॥
असोमपोः	सोमपान न करनेवाले		

हन्तुं तमाददे वज्रं सद्योमन्युरमर्षितः ।
सवज्रं स्तम्भयामास भुजमिन्द्रस्य भार्गवः ॥२५॥

हन्तुं तं आददे वज्रं सद्यः मन्युः अमर्षितः सवज्रं स्तम्भयामास भुजं इन्द्रस्य भार्गवः ॥२५॥

सद्यः मन्युः	शीघ्र कुपित होनेवाले	भार्गवः	भृगु-नन्दन च्यवनने
अमर्षितः	(इन्द्रने) चिढ़कर	सवज्रं	वज्रके साथ
तं	उन (च्यवनजी) को	इन्द्रस्य भुजं	इन्द्रकी भुजाको
हन्तुं	मारनेके लिए	स्तम्भयामास	स्तम्भित (स्थिर)
वज्रं आददे	वज्र लिया; किन्तु		कर दिया ॥२५॥

अन्वजानंस्ततः सर्वे ग्रहं सोमस्य चाश्विनोः ।
भिषजाविति यत् पूर्वं सोमाहुत्या बहिष्कृतौ ॥२६॥

अन्वजानन् ततः सर्वे ग्रहं सोमस्य च अश्विनोः भिषजाः इति यत् पूर्वं सोम आहुत्या बहिष्कृतौ ॥२६॥

यत् पूर्वं	जिनका पहिले	सोम आहुत्या	सोमकी आहुतिसे
भिषजाः इति	'ये वैद्य हैं' यह कह-	बहिष्कृतौ	बहिष्कार कर दिया
	कर		था

ततः सर्वे	तबसे सब (देवताओं) ने	अश्विनोः	अश्विनी कुमारोंको
सोमस्य च ग्रहं	सोमके ग्रहणमें भी	अन्वजानन्	अनुमति दे दी।।२६।।

उत्तानबर्हिरानर्तो भूरिषेण इति त्रयः ।
शर्यातेरभवन् पुत्रा आनर्ताद् रेवतोऽभवत् ।।२७।।

उत्तानबर्हिः आनर्तः भूरिषेणः इति त्रयः शर्यातेः अभवन् पुत्रा आनर्तात् रेवतः अभवत् ।।२७।।

उत्तानबर्हिः	उत्तानबर्हि,	शर्यातेः पुत्रा	शर्यातिके पुत्र
आनर्तः	आनर्त,	अभवन्	हुए,
भूरिषेणः	भूरिषेण	आनर्तात्	(इनमें) आनर्तसे
इति त्रयः	इस प्रकार तीन	रेवतः अभवत्	रेवत हुए ।।२७।।

सोऽन्तः समुद्रे नगरीं विनिर्माय कुशस्थलीम् ।
आस्थितोऽभुङ्क्त विषयानानर्तादीनरिन्दम ।।२८।।

सः अन्तः समुद्रे नगरीं विनिर्माय कुशस्थलीं आस्थितः अभुङ्क्त विषयान् आनर्त आदीन् अरिन्दम ।।२८।।

अरिन्दम	शत्रुदमन परीक्षित !	आस्थितः	उसमें रहते हुए
सः	उन (रेवत) ने	आनर्त आदीन्	आनर्त आदि प्रदेशों-
समुद्रे अन्तः	समुद्रके बीचमें		का
कुशस्थलीं	कुशस्थली	विषयान्	राज्य
नगरीं	नगरीका	अभुङ्क्त	भोगते रहे ।।२८।।
विनिर्माय	निर्माण करके		

तस्य पुत्रशतं जज्ञे ककुद्म्यज्येष्ठमुत्तमम् ।
ककुद्मी रेवतीं कन्यां स्वामादाय विभुं गतः ।।२९।।

तस्य पुत्रशतं जज्ञे ककुद्मि ज्येष्ठं उत्तमं ककुद्मी रेवतीं कन्यां स्वां आदाय विभुं गतः ।।२९।।

तस्य पुत्रशतं	उनके सौ पुत्र	ककुद्मी स्वां	ककुद्मी अपनी
जज्ञे	उत्पन्न हुए	कन्यां रेवतीं	पुत्री रेवतीको
ककुद्मी ज्येष्ठ	उनमें ककुद्मी बड़ा और	आदाय	साथ लेकर
उत्तमं	श्रेष्ठ था	विभुं गतः	ब्रह्माजीके पास गये ॥२९॥

कन्यावरं परिप्रष्टुं ब्रह्मलोकमपावृतम् ।
आवर्तमाने गान्धर्वे स्थितोऽलब्धक्षणः क्षणम् ॥३०॥

कन्या वरं परिप्रष्टुं ब्रह्मलोकं अपावृतं आवर्तमाने गान्धर्वे स्थितः अलब्ध क्षणः क्षणम् ॥३०॥

कन्यां वरं	कन्याके लिए वर	तत्र गान्धर्वे	वहां गाना-बजाना
परि प्रष्टुं	पूछने	आवर्तमाने	चलता होनेके कारण
अपावृतं	(उनके लिए) रोक-टोक रहित	अलब्ध क्षणः	अवसर न मिलनेके कारण
ब्रह्मलोकं	ब्रह्म लोक गये; किन्तु	क्षणं स्थितः	क्षण भर खड़े रहे ॥३०॥

तदन्त आद्यमानम्य स्वाभिप्रायं न्यवेदयत् ।
तच्छ्रुत्वा भगवान् ब्रह्मा प्रहस्य तमुवाच ह ॥३१॥

तत् अन्त आद्यं आनम्य स्वं अभिप्रायं न्यवेदयत् तत् श्रुत्वा भगवान् ब्रह्मा प्रहस्य तं उवाच ह ॥३१॥

तत्	उस (गाने-बजाने) की	न्यवेदयत्	निवेदन किया
अन्त	समाप्ति होनेपर	तत् श्रुत्वा	उसे सुनकर
आद्यं	आदि पुरुष ब्रह्मा-जी को	प्रहस्य	हंसकर
आनम्य	प्रणाम करके	भगवान् ब्रह्मा	भगवान् ब्रह्माने
स्वं अभिप्रायं	अपने अभिप्राय	ह तं	निश्चय पूर्वक
		उवाच	उससे बोले ॥३१॥

अहो राजन् निरुद्धास्ते कालेन हृदि ये कृताः ।
तत्पुत्रपौत्रनप्तॄणां गोत्राणि च न शृण्महे ॥३२॥

अहो राजन् निरुद्धाः ते कालेन हृदि ये कृताः तत् पुत्र पौत्र नप्तृणां गोत्राणि च न शृण्महे ॥३२॥

अहो राजन्	अहो राजन् !	तत् पुत्र	उनके पुत्र,
ये	तुमने जिनके	पौत्र नप्तृणां	पौत्र, नातियोंके
हृदि कृताः	सम्बन्धमें मनमें सोचा था	गोत्राणि	वंशधरोंके
		च	विषयमें भी
ते काले न	वे कालके द्वारा	न शृण्महे	(हम) कुछ नहीं
निरुद्धाः	समाप्त कर दिये गये,		सुनते ॥३२॥

कालोऽभियातस्त्रिणवचतुर्युगविकल्पितः ।
तद् गच्छ देवदेवांशो बलदेवो महाबलः ॥३३॥

कालः अभियातः त्रिणव चतुर्युग विकल्पितः तत् गच्छ देवदेव अंशः बलदेवः महाबलः ॥३३॥

त्रिणव	(तीन नव) सत्ताइस	तत् गच्छ	अतः जाइये
चतुर्युग	चतुर्युगी	देवदेव	देवाधिदेव भगवानके
विकल्पितः	जितना	अंशः	अंश
कालः	काल	महाबलः	महाबली
अभियातः	अब तक बीत चुका है,	बलदेवः	बलरामजी हैं ॥३३॥

कन्यारत्नमिदं राजन् नररत्नाय देहि भोः ।
भुवो भारावताराय भगवान् भूतभावनः ॥३४॥

कन्या रत्नं इदं राजन् नररत्नाय देहि भोः भुवः भार अवताराय भगवान् भूतभावनः ॥३४॥

भोः राजन्	हे राजन् !	भुवः भार	पृथ्वीका भार
इदं कन्या	इस कन्या	अवतारम	उतारनेके लिए
रत्नं	रत्नको	भगवान्	भगवान्
नररत्नाय	उन मनुष्यरत्नको	भूतभावनः	मधुसूदन ॥३४॥
देहि	दे दीजिए,		

अवतीर्णो निजांशेन पुण्यश्रवणकीर्तनः ।
इत्यादिष्टोऽभिवन्द्याजं नृपः स्वपुरमागतः ।
त्यक्तं पुण्यजनत्रासाद् भ्रातृभिर्दिक्ष्ववस्थितैः ॥३५॥

अवतीर्णः निज अंशेन पुण्य श्रवण कीर्तनः इति आदिष्टः अभिवन्द्य अजं नृपः स्वपुरं आगतः त्यक्तं पुण्यजन त्रासात् भ्रातृभिः दिक्षु अवस्थितैः ॥३५॥

श्रवण	जिनका (नाम यशादि) सुनना
कीर्तनः पुण्य	तथा कीर्तन पवित्र है वे
निज अंशेन	अपने अंशसे
अवतीर्णः	अवतरित हुए हैं ।
इति आदिष्टः	ऐसा आदेश पाकर
अजं	ब्रह्माजी को
अभिवन्द्य	अभिवादन करके
नृपः स्वपुरं	राजा अपने नगर
आगतः	आ गये (जिसे)
पुण्यजन	यक्षोंके
त्रासात्	भयसे
दिक्षु अवस्थितैः	दिशाओं (जहां-तहां) रहनेवाले
भ्रातृभिः	उनके भाई-बन्धुओंने
त्यक्तं	त्याग दिया था ॥३५॥

सुतां दत्त्वानवद्याङ्गीं बलाय बलशालिने ।
बदर्याख्यं गतो राजा तप्तुं नारायणाश्रमम् ॥३६॥

सुतां दत्त्वा अनवद्य अङ्गीं बलाय बलशालिने बदरि आख्यं गतः राजा तप्तुं नारायण आश्रमम् ॥३६॥

बलशालिने	महा बलवान
बलाय	बलरामजीको
अनवद्य अङ्गीं	निर्दोष अंगोंवाली
सुतां दत्त्वा	(अपनी) पुत्री देकर
राजा तप्तुं	राजा तप करनेके लिए
बदरि आख्यं	बदरी नामवाले
नारायण	नारायण
आश्रमं	आश्रमको
गतः	चले गये ॥३६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
नवमस्कन्धे तृतीयोऽध्यायः ॥३॥

अथ चतुर्थोऽध्यायः

श्रीशुक उवाच—

नाभागो नभगापत्यं यं ततं भ्रातरः कविम् ।
यविष्ठं व्यभजन् दायं ब्रह्मचारिणमागतम् ॥१॥

नाभागः नभग अपत्यं यं ततं भ्रातरः कविं यविष्ठं व्यभजन् दायं ब्रह्मचारिणं आगतम् ॥१॥

नभग	(मनुपुत्र) नभगके
अपत्यं	पुत्र
नाभागः	नाभाग थे,
यं	जिनको
भ्रातरः	भाइयोंने
ब्रह्मचारिणं	ब्रह्मचर्य आश्रमसे
आगतं	आनेपर
कविं	विद्वान्
यविष्ठं भ्रातरं	छोटे भाईको
ततं दायं	(पिताको ही) दाय भागके रूपमें
व्यभजन्	बांटा था ॥१॥

भ्रातरोऽभाङ्क्त किं मह्यं भजाम पितरं तव ।
त्वां ममार्यास्तताभाङ्क्षुर्मा पुत्रक तदादृथाः ॥२॥

भ्रातरः अभांक्त किं मह्यं भजाम पितरं तव त्वां मम आर्याः तता भाङ्क्षुः मा पुत्रक तत् आदृथाः ॥२॥

भ्रातरः	(उसने आनेपर पूछा) भाइयो !
मह्यं किं	'मुझे क्या
अभांक्त	भाग दिया है ?'
तव	(उन्होंने उत्तर दिया) 'तुम्हें
पितरं	पिताजीको
भजाम	भागमें देते हैं ।'
तता	(उसने पितासे कहा) 'तात !
मम आर्याः	मेरे बड़े भाइयोंने
त्वां भाङ्क्षुः	आपको भागमें दिया है ।'
पुत्रक	(पिताने कहा) 'मेरे नन्हें बच्चे
तत् मा आदृथाः	उसको मत स्वीकार करो ॥२॥

इमे अङ्गिरसः सत्रमासतेऽद्य सुमेधसः ।
षष्ठं षष्ठमुपेत्याहः कवे मुह्यन्ति कर्मणि ॥३॥

इमे अंगिरसः सत्रं आसते अद्य सुमेधसः षष्ठं षष्ठं उपेत्य अहः कवे मुह्यन्ति कर्मणि ॥३॥

इमे सुमेधसः	ये परमबुद्धिमान	षष्ठं षष्ठं	छठवें-छठवें
अंगिरसः	अंगिरा गोत्रीय ब्राह्मण	अहः उपेत्य	दिन आनेपर
		कर्मणि	उस कर्ममें
अद्य सत्रं	इस समय यज्ञ	मुह्यन्ति	मोहित (भ्रान्त) हो जाते हैं ॥३॥
आसते	कर रहे हैं ।		
कवे	ये बुद्धिमान्		

तांस्त्वं शंसय सूक्ते द्वे वैश्यदेवे महात्मनः ।
ते स्वर्यन्तो धनं सत्रपरिशेषितमात्मनः ॥४॥

तान् त्वं शंसय सूक्ते द्वे वैश्वदेवे महात्मनः ते स्वः यन्तः धनं सत्र परिशेषितं आत्मनः ॥४॥

तान् महात्मनः	उन महात्माओंको	ते स्वः यन्तः	वे स्वर्ग जाते समय
त्वं द्वे	तुम दो	आत्मनः सत्र	अपने यज्ञका
वैश्वदेवे	विश्वेदेवा सम्बन्धी	परिशेषितं	बचा हुआ
सूक्ते शंसय	सूक्त सुनाओ	धनं	धन ॥४॥

दास्यन्ति तेऽथ तान् गच्छ तथा स कृतवान् यथा ।
तस्मै दत्वा ययुः स्वर्गं ते सत्रपरिशेषितम् ॥५॥

दास्यन्ति ते अथ तान् गच्छ तथा स कृतवान् यथा तस्मै दत्त्वा ययुः स्वर्गं ते सत्र परिशेषितम् ॥५॥

ते दास्यन्ति	वे (तुमको) दे देंगे,	ते सत्र	वे (ब्राह्मण)
अथ तान् गच्छ	अब वहां जाओ,	परिशेषितं	यज्ञसे बचा धन
यथा	जैसा (पिताने कहा)	तस्मै दत्त्वा	उसे देकर
तथा स	वैसा ही उसने	स्वर्गं ययुः	स्वर्ग चले गये ॥५॥
कृतवान्	किया		

तं कश्चित् स्वीकरिष्यन्तं पुरुषः कृष्णदर्शनः ।
उवाचोत्तरतोऽभ्येत्य ममेदं वास्तुकं वसु ॥६॥

तं कश्चित् स्वीकरिष्यन्तं पुरुषः कृष्णदर्शनः उवाच उत्तरतः अभिः एत्य मम इदं वास्तुकं वसु ॥६॥

तं	उस (धन) को	उत्तरतः	उत्तर दिशासे
स्वीकरिष्यन्तं	स्वीकार करते समय	अभि एत्य	वहां आकर
कश्चित्	किसी	उवाच	कहा
कृष्णदर्शनः	काले रंगके	इदं वास्तुकं	'यह यज्ञ भूमिका
पुरुषः	पुरुषने	वसु मम	धन मेरा है' ॥६॥

ममेदमृषिभिर्दत्तमिति तर्हि स्म मानवः ।
स्यान्नौ ते पितरि प्रश्नः पृष्टवान् पितरं तथा ॥७॥

मम इदं ऋषिभिः दत्तं इति तर्हि स्म मानवः स्यात् नौ ते पितरि प्रश्नः पृष्टवान् पितरं तथा ॥७॥

ऋषिभिः	(उसने कहा) ऋषियों का	मानवः	मनु-पुत्र
		ते पितरि	तुम्हारे पितासे
दत्तं	दिया हुआ	नौ	हम दोनोंको
इदं मम	यह मेरा है'	प्रश्नः स्यात्	पूछना चाहिए'
इति	(वह पुरुष बोला) 'ऐसा है	तथा पितरं	इसी प्रकार पितासे
		पृष्टवान्	(जाकर उसने) पूछा ॥७॥
तर्हि स्म	तब तो		

यज्ञवास्तुगतं सर्वमुच्छिष्टमृषयः क्वचित् ।
चक्रुर्विभागं रुद्राय स देवः सर्वमर्हति ॥८॥

यज्ञ वास्तु गतं सर्वं उच्छिष्टं ऋषयः क्वचित् चक्रुः विभागं रुद्राय स देवः सर्वं अर्हति ॥८॥

यज्ञ	(पिताने कहा) यज्ञ	गतं सर्वं	आयी सब वस्तु
वास्तु	मंडपमें	उच्छिष्टं	बच जानेपर

क्वचित्	कभी	स देवः	(अतः) वही देव
ऋषयः	ऋषियोंने	सर्वं अर्हति	सब पाने योग्य हैं
रुद्राय विभागं	रुद्रका भाग		॥८॥
चक्रुः	बना दिया था,		

नाभागस्तं प्रणम्याह तवेश किल वास्तुकम् ।
इत्याह मे पिता ब्रह्मञ्छिरसा त्वां प्रसादये ॥९॥

नाभागः तं प्रणम्य आह तव ईश किल वास्तुकं इति आह मे पिता ब्रह्मन् शिरसा त्वां प्रसादये ॥९॥

तं प्रणम्य	उनको प्रणाम करके	पिता आह	पिताने कहा है,
नाभागः आह	नाभागने कहा–	ब्रह्मन्	ब्रह्मन् !
ईश किल	'भगवन् ! निश्चय	शिरसा त्वां	मस्तक झुकाकर
वास्तुकं	यह यज्ञ शेष		आपको
तव	आपका है,	प्रसादये	मैं प्रसन्न करता हूँ'
इति मे	ऐसा मेरे		॥९॥

यत् ते पितावदद् धर्मं त्वं च सत्यं प्रभाषसे ।
ददामि ते मन्त्रदृशे ज्ञानं ब्रह्म सनातनम् ॥१०॥

यत् ते पिता अवदत् धर्मं त्वं च सत्यं प्रभाषसे ददामि ते मन्त्रदृशे ज्ञानं ब्रह्म सनातनम् ॥१०॥

यत् ते	(रुद्रने कहा) क्योंकि तुम्हारे	ते मन्त्रदृशे	तुम वेदार्थ जानने-वालेको
पिता	पिताने	सनातनं ब्रह्म	सनातन ब्रह्मका
धर्मं अवदत्	धर्म-सम्मत बात कही	ज्ञानं ददामि	मैं ज्ञान दे रहा हूँ
च त्वं	और तुम		॥१०॥
सत्यं प्रभाषसे	सच बोल रहे हो (अतः)		

गृहाण द्रविणं दत्तं मत्सत्रे परिशेषितम् ।
इत्युक्त्वान्तर्हितो रुद्रो भगवान् सत्यवत्सलः ॥११॥

गृहाण द्रविणं दत्तं मत् सत्रे परिशेषितं इति उक्त्वा अन्तर्हितः रुद्रः भगवान् सत्यवत्सलः ॥११॥

सत्रे परिशेषितं	यज्ञसे बचा हुआ
द्रविणं	यह धन
मत् दत्तं	मेरा दिया हुआ
गृहाण	ग्रहण करो।'
इति उक्त्वा	ऐसा कहकर
सत्यवत्सलः	सत्यवत्सल
भगवान् रुद्रः	भगवान् रुद्र
अन्तर्हितः	अन्तर्धान हो गये ॥११॥

य एतत् संस्मरेत् प्रातः सायं च सुसमाहितः ।
कविर्भवति मन्त्रज्ञो गतिं चैव तथाऽऽत्मनः ॥१२॥

य एतत् संस्मरेत् प्रातः सायं च सुसमाहितः कविः भवति मन्त्रज्ञः गतिं च एव तथा आत्मनः ॥१२॥

य सुसमाहितः	जो भली प्रकार एकाग्र चित्तसे
एतत् प्रातः	इसका सबेरे
च सायं	तथा शामको
संस्मरेत्	स्मरण करता है
कविः मन्त्रज्ञः	वह विद्वान और वेदज्ञ
भवति	हो जाता है,
तथा च	और
आत्मनः	आत्मस्वरूपको
गतिं	प्राप्त करता है ॥१२॥

नाभागादम्बरीषोऽभून्महाभागवतः कृती ।
नास्पृशद् ब्रह्मशापोऽपि यं न प्रतिहतः क्वचित् ॥१३॥

नाभागात् अम्बरीषः अभूत् महाभागवतः कृती न अस्पृशत् ब्रह्मशापः अपि यं न प्रतिहतः क्वचित् ॥१३॥

नाभागात्	नाभागसे
कृती	पुण्यात्मा
महाभागवतः	परम भगवद्भक्त
अम्बरीषः	अम्बरीष
अभूत्	उत्पन्न हुए
यं क्वचित्	जिन्हें कभी
न प्रतिहतः	व्यर्थ न होनेवाला
ब्रह्मशापः अपि	ब्राह्मणका शाप भी
न अस्पृशत्	नहीं छू सका ॥१३॥

राजोवाच

भगवञ्छ्रोतुमिच्छामि राजर्षेस्तस्य धीमतः ।
न प्राभूद् यत्र निर्मुक्तो ब्रह्मदण्डो दुरत्ययः ॥१४॥

भगवन् श्रोतुं इच्छामि राजर्षेः तस्य धीमतः न प्राभुः अभूत यत्र निर्मुक्तः ब्रह्मदण्डः दुः त्ययः ॥१४॥

भगवन् तस्य	भगवन् ! उन	**ब्रह्मदण्डः**	ब्रह्म दण्ड भी
धीमतः राजर्षेः	बुद्धिमान राजर्षिका	**प्राभुः**	प्रभाव
श्रोतुं	(चरित) सुनना	**अभूत् न**	नहीं डाल सका
इच्छामि	चाहता हूँ		॥१४॥
यत्र दुः त्ययः	जिनपर दुस्तर		

श्रीशुक उवाच

अम्बरीषो महाभागः सप्तद्वीपवतीं महीम् ।
अव्ययां च श्रियं लब्ध्वा विभवं चातुलं भुवि ॥१५॥

अम्बरीषः महाभागः सप्त द्वीपवतीं महीं अव्ययां च श्रियं लब्ध्वा विभवं च अतुलं भुवि ॥१५॥

महाभागः	महाभाग	**अव्ययां श्रियं**	अक्षय लक्ष्मी
अम्बरीषः	अम्बरीषने	**च भुवि**	एवं पृथ्वीपर
सप्त द्वीपवतीं	सातो द्वीपवाली	**अतुलं विभवं**	अतुलनीय वैभव
महीं च	पृथ्वी तथा	**लब्ध्वा**	पाकर ॥१५॥

मेनेऽतिदुर्लभं पुंसां सर्वं तत् स्वप्नसंस्तुतम् ।
विद्वान् विभवनिर्वाणं तमो विशति यत् पुमान् ॥१६॥

मेने अतिदुर्लभं पुंसां सर्वं तत् स्वप्न संस्तुतं विद्वान् विभव निर्वाणं तमः विशति यत् पुमान् ॥१६॥

यत्: पुमान्	जिससे पुरुष	**तमः विशति**	अज्ञानान्धकारमें डूब जाता है

विभव	उस वैभवकी	पुंसां	जो पुरुषके लिए
निर्वाणं	विनश्वरता	अतिदुर्लभं	अत्यन्त दुर्लभ है
विद्वान्	जानकर	स्वप्न संस्तुतं	स्वप्नके समान
तत् सर्वं	उस सब (वैभव) को	मेने	माना ॥१६॥

वासुदेवे भगवति तद्भक्तेषु च साधुषु ।
प्राप्तो भावं परं विश्वं येनेदं लोष्टवत् स्मृतम् ॥१७॥

वासुदेवे भगवति तद् भक्तेषु च साधुषु प्राप्तः भावं परं विश्वं येन इदं लोष्टवत् स्मृतम् ॥१७॥

भगवति	भगवान्	प्राप्तः	प्राप्त था
वासुदेवे	वासुदेवमें	येन इदं	जिससे यह जगत
च तद् भक्तेषु	तथा उनके भक्त	लोष्टवत्	मिट्टीके डलेके समान
साधुषु	सत्पुरुषोंमें	स्मृतं	समझा जाता है ॥१७॥
परं भावं	परम भक्तिभाव		

स वै मनः कृष्णपदारविन्दयो-
र्वचांसि वैकुण्ठगुणानुवर्णने ।
करौ हरेर्मन्दिरमार्जनादिषु
श्रुतिं चकाराच्युतसत्कथोदये ॥१८॥

स वै मनः कृष्ण पदारविन्दयोः वचांसि वैकुण्ठ गुण अनुवर्णने करौ हरेः मन्दिर मार्जन आदिषु श्रुतिं चकार अच्युत सत् कथा उदये ॥१८॥

वै स	निश्चय उन्होंने	मार्जन	मार्जन (पोंछा लगाना)
कृष्ण	श्रीकृष्णके	आदिषु	आदिमें
पदारविन्दयोः	चरण-कमलोंमें	करौ	हाथोंको,
मनः	अपने मनको,	अच्युत	श्रीअच्युतकी
वैकुण्ठ गुण अनुवर्णने	भगवान्के गुणोंका बार-बार वर्णन करनेमें	सत् कथा उदये	उत्तम कथाका अभ्युदय सुननेमें
वचांसि	वाणीको,	श्रुतिं	कानोंको
हरेः मन्दिर	श्रीहरिके मन्दिरकी	चकार	लगा दिया ॥१८॥

मुकुन्दलिंगालयदर्शने दृशौ
तद्भृत्यगात्रस्पर्शेऽङ्गसंगमम् ।
घ्राणं च तत्पादसरोजसौरभे
श्रीमत्तुलस्या रसनां तदर्पिते ॥१९॥

मुकुन्दलिंग आलय दर्शने दृशौ तत् भृत्य गात्रस्पर्शे अंग संगमं घ्राणं च तत् पाद सरोज सौरभे श्रीमत् तुलस्या रसनां तत् अर्पिते ॥१९॥

मुकुन्दलिंग आलय दर्शने	भगवन्मूर्ति तथा मन्दिरोंका दर्शन करनेमें	तत् पाद	उन भगवानके चरणों परकी
		श्रीमत् तुलस्या	श्रीमती तुलसीकी
दृशौ	नेत्रोंको,	सौरभे घ्राणं	सुगन्धि लेनेमें नासिकाको
तत् भृत्य	उनके सेवकों (भक्तों) के	च	तथा
गात्रस्पर्शे	शरीर स्पर्शमें	तत् अर्पिते	उन (भगवान) को अर्पित
अंग संगमं	अपने अंगोंको लगाया,	रसनां	(नैवेद्य-प्रसाद) में रसनाको ॥१९॥

पादौ हरेः क्षेत्रपदानुसर्पणे
शिरो हृषीकेशपदाभिवन्दने ।
कामं च दास्ये न तु कामकाम्यया
यथोत्तमश्लोकजनाश्रया रतिः ॥२०॥

पादौ हरेः क्षेत्र पद अनुसर्पणे शिरः हृषीकेश पद अभिवन्दने कामं च दास्ये न तु काम काम्यया यथा उत्तम श्लोक जन आश्रया रतिः ॥२०॥

हरेः	भगवानके	हृषीकेश	श्रीहृषीकेशके
क्षेत्र पद	पवित्र तीर्थोंकी	पद	चरणोंकी
अनुसर्पणे	यात्रा करनेमें	अभिवन्दने	वन्दना करनेमें
पादौ	पैरोंको,	शिरः	मस्तकको

च कामं	तथा भोग-सामग्रीको	उत्तम	पवित्र कीर्ति
दास्ये	भगवत् सेवामें,	श्लोक जन	भगवानके भक्तोंके
काम	अपने	आश्रया	आश्रममें
काम्यया न	उपभोगमें नहीं लगाया था,	रतिः	रहनेवाली भगवत् प्रीति प्राप्त हो ॥२०॥
यथा	जिससे		

एवं सदा कर्मकलापमात्मनः
परेऽधियज्ञे भगवत्यधोक्षजे ।
सर्वात्मभावं विदधन्महीमिमां
तन्निष्ठविप्राभिहितः शशास ह ॥२१॥

एवं सदा कर्म कलापं आत्मनः परे अधियज्ञे भगवति अधोक्षजे सर्व आत्मभावं विदधत् महीं इमां तत् निष्ठ विप्र अभिहितः शशासह ॥२१॥

अधियज्ञे	अधियज्ञ पुरुष	विदधत्	समर्पित करते हुए
भगवति	भगवान्	तत्	उन (भगवान) में
अधोक्षजे	हृषीकेश	निष्ठ	निष्ठा रखनेवाले
परे	परमात्मामें	विप्र	ब्राह्मणोंके
एवं सदा	इस प्रकार सदा	अभिहतः ह	आदेशानुसार ही
आत्मनः	अपना	महीं शशास	पृथ्वीपर शासन करते थे ॥२१॥
कर्म कलापं	सब कर्म		
सर्व आत्मभावं	सर्वात्म भावसे		

ईजेऽश्वमेधैरधियज्ञमीश्वरं
महाविभूत्योपचितांगदक्षिणैः ।
ततैर्वसिष्ठासितगौतमादिभि-
र्धन्वन्यभिस्रोतमसौ सरस्वतीम् ॥२२॥

ईजे अश्वमेधैः अधियज्ञं ईश्वरं महाविभूति उपचित अंग दक्षिणैः ततैः वसिष्ठ असित गौतम आदिभिः धन्वनि अभिस्रोतं असौ सरस्वतीम् ॥२२॥

धन्वनि	मरुधन्व (मारवाड़) में	अंग	अंग तथा*२
सरस्वतीं	सरस्वतीके	उपचित	बड़ी
अभिस्रोतं	प्रवाहकी सीधमें*१	दक्षिणैः	दक्षिणाओंवाले
वसिष्ठ असित	वसिष्ठ, असित,	अश्वमेधैः	अश्वमेधादि यज्ञोंसे
गौतम	गौतम	अधियज्ञं	यज्ञ-पुरुष
आदिभिः	आदि ऋषियों द्वारा	ईश्वरं	सर्वेश्वरकी
ततैः	विस्तारित किये गये	ईजे	आराधना की ॥२२॥
महाविभूति	महान ऐश्वर्यसे बढ़े		

यस्य क्रतुषु गीर्वाणैः सदस्या ऋत्विजो जनाः ।
तुल्यरूपाश्चानिमिषा व्यदृश्यन्त सुवाससः ॥२३॥

यस्य क्रतुषु गीर्वाणैः सदस्या ऋत्विजः जनाः तुल्य रूपाः च अनिमिषा व्यदृश्यन्त सुवाससः ॥२३॥

यस्य क्रतुषु	जिसके यज्ञमें	तुल्य	उन्हीं (सुरों) के
गीर्वाणैः	देवताओंके साथ	रूपाः	समान रूपवान
सदस्या	सदस्य एवं	च अनिमिषा	तथा निमेषहीन
ऋत्विजः जनाः	ऋत्विक् लोग	व्यदृश्यन्त	दीखते थे ॥२३॥
सुवाससः	उत्तम वस्त्रोंके कारण		

स्वर्गो न प्रार्थितो यस्य मनुजैरमरप्रियः ।
शृण्वद्भिरुपगायद्भिरुत्तमश्लोकचेष्टितम् ॥२४॥

स्वर्गः न प्रार्थितः यस्य मनुजैः अमरप्रियः शृण्वत् भिः उपगायत् भिः उत्तम श्लोक चेष्टितम् ॥२४॥

उत्तम श्नोक	पवित्र कीर्ति भगवान-की	मनुजैः	मनुष्यों (सेवकों) ने भी
चेष्टितं	लीलाओंको	अमरप्रियः	देवताओंके प्रिय
शृण्वत् भिः	सुनते हुए एवं	स्वर्ग	स्वर्गको
उपगायत् भिः	गाते हुए	न प्रार्थितः	नहीं पानाचाहा ॥२४॥
यस्य	जिनके		

१* क्योंकि मारवाड़में सरस्वतीका प्रवाह सूख जाता है ।

२* अनुयाज, प्रयाजादि अंग यज्ञमें बढ़ाये जा सकते हैं ।

समर्द्धयन्ति तान् कामाः स्वाराज्यपरिभाविताः ।
दुर्लभा नापि सिद्धानां मुकुन्दं हृदि पश्यतः ॥२५॥

सम अर्द्धयन्ति तान् कामाः स्वाराज्य परिभाविताः दुर्लभा न अपि सिद्धानां मुकुन्दं हृदि पश्यतः ॥२५॥

तान् कामाः	वे (स्वर्गीय) भोग	मुकुन्दं	(किन्तु) श्रीमुकुन्दको
स्वाराज्य	आत्मानन्द	हृदि	हृदयमें
परिभाविताः	प्राप्त	पश्यतः	दर्शन करनेवालोंको
सिद्धानां अपि	सिद्ध पुरुषोंको भी	दुर्लभा न	(वे) दुर्लभ नहीं हैं ॥२५॥
सम	अत्यन्त		
अर्द्धयन्ति	उल्लसित करते हैं,		

स इत्थं भक्तियोगेन तपोयुक्तेन पार्थिवः ।
स्वधर्मेण हरिं प्रीणन् संगान् सर्वाञ्छनैर्जहौ ॥२६॥

स इत्थं भक्तियोगेन तपः युक्तेन पार्थिवः स्वधर्मेण हरिं प्रीणन् सङ्गान् सर्वान् शनैः जहौ ॥२६॥

इत्थं	इस प्रकार	प्रीणन्	प्रसन्न करते हुए
स	उन अम्बरीषने	सर्वान्	समस्त
तपः युक्तेन	तपस्यायुक्त	संगान्	आसक्तियोंको
भक्तियोगेन	भक्तियोग तथा	शनैः जहौ	धीरे-धीरे त्याग दिया ॥२६॥
स्वधर्मेण	अपने धर्माचरण द्वारा		
हरिं	श्रीहरिको		

गृहेषु दारेषु सुतेषु बन्धुषु
द्विपोत्तमस्यन्दनवाजिपत्तिषु ।
अक्षय्यरत्नाभरणायुधादि-
ष्वनन्तकोशेष्वकरोदसन्मतिम् ॥२७॥

गृहेषु दारेषु सुतेषु बन्धुषु द्विप उत्तम स्यन्दन वाजि पत्तिषु अक्षय्य रत्न आभरण आयुध आदिषु अनन्त कोशेषु अकरोत् असत् मतिम् ॥२७॥

गृहेषु दारेषु	भवन, पत्नी,
सुतेषु बन्धुषु	पुत्र, सम्बन्धी,
उत्तम द्विप	उत्तम गजराज,
स्यन्दन वाजि	रथ, घोड़े वाली
पत्तिषु	सेना
अक्षय्य रत्न	अक्षय रत्न,
आभरण	आभूषण,
आयुध आदिषु	आयुध आदिके
अनन्त कोशेषु	अनन्त कोशमें
असत् मति	असत् बुद्धि
अकरोत्	कर ली ॥२७॥

तस्मा अदाद्धरिश्चक्रं प्रत्यनीकभयावहम् ।
एकान्तभक्तिभावेन प्रीतो भृत्याभिरक्षणम् ॥२८॥

तस्मा अदात् हरिः चक्रं प्रत्यनीक भय आवहं एकान्त भक्ति भावेन प्रीतः भृत्य अभिरक्षणम् ॥२८॥

एकान्त	अनन्य
भक्ति भावेन	भक्तिभावसे
प्रीतः	प्रसन्न होकर
हरिः	श्रीहरिने
भृत्य	उस अपने सेवककी
अभिरक्षणं	सम्पूर्ण रक्षाके लिए
तस्मा	उन (अम्बरीष) को
प्रत्यनीक	शत्रुसेनाको
भय आवहं	भयदायी
चक्रं	अपना सुदर्शन चक्र
अदात्	दे दिया ॥२८॥

आरिराधयिषुः कृष्णं महिष्या तुल्यशीलया ।
युक्तः सांवत्सरं वीरो दधार द्वादशीव्रतम् ॥२९॥

आरिराधयिषुः कृष्णं महिष्या तुल्य शीलया युक्तः सांवत्सरं वीरः दधार द्वादशीव्रतम्* ॥२९॥

---

*एकादशी-व्रत स्मार्त-वैष्णव भेदसे दो प्रकार का है। स्मार्त व्रतीको पारणके लिए द्वादशी अवश्य चाहिए, जैसा राजा अम्बरीषके लिए था। इसमें दशमी-विद्धा एकादशी व्रत करना दोष नहीं माना जाता। वैष्णव दशमी विद्धा एकादशी व्रत नहीं करते, भले व्रत द्वादशीमें करके त्रयोदशी-को पारण करना पड़े।

तुल्य	अपने समान	आरिराधयिषुः	आराधनाकी इच्छासे
शीलया	शीलवती	सांवत्सरं	एक वर्षके लिए
महिष्या युक्तः	महारानीके साथ	द्वादशीव्रतं	द्वादशीका व्रत
वीरः	वीरवर अम्बरीषने	दधार	धारण किया ॥२९॥
कृष्णं	श्रीहरिकी		

व्रतान्ते कार्तिके मासि त्रिरात्रं समुपोषितः ।
स्नातः कदाचित् कालिन्द्यां हरिं मधुवनेऽर्चयत् ॥३०॥

व्रत अन्ते कार्तिके मासि त्रिरात्रं सम् उपोषितः स्नातः कदाचित् कालिन्द्यां हरिं मधुवने अर्चयत् ॥३०॥

व्रत अन्ते	व्रतकी समाप्तिपर	कालिन्द्यां	यमुनामें
कार्तिके मासि	कार्तिक महीनेमें	स्नात्वा	स्नान करके
त्रिरात्रं	तीन रात-दिनका	मधुवने	मथुरामें
सम्	पूर्ण (निर्जल)	हरिं अर्चयत्	श्रीहरिकी पूजा की ॥३०॥
उपोषितः	उपवास करके		
कदाचित्	(उन तीनमें से) किसी दिन		

महाभिषेकविधिना सर्वोपस्करसम्पदा ।
अभिषिच्याम्बराकल्पैर्गन्धमाल्यार्हणादिभिः ॥३१॥

महा अभिषेक विधिना सर्व उपस्कर सम्पदा अभिषिच्य अम्बर आकल्पैः गन्ध माल्य अर्हण आदिभिः ॥३१॥

महा अभिषेक	महा अभिषेककी	अम्बर	वस्त्र,
विधिना	विधिसे	आकल्पैः	आभूषण
सर्व	सब प्रकारकी	गन्ध माल्य	चन्दन, माला आदि
उपस्कर	सामग्री एवं	अर्हण आदिभिः	पूजा द्रव्यों द्वारा ॥३१॥
सम्पदा	सम्पत्ति द्वारा		

तद्गतान्तरभावेन पूजयामास केशवम् ।
ब्राह्मणांश्च महाभागान् सिद्धार्थानपि भक्तितः ॥३२॥

तद्गत अन्तर भावेन पूजयामास केशवं ब्राह्मणान् च महाभागान् सिद्ध अर्थान् अपि भक्तितः ॥३२॥

तद्गत	उन्हींमें लगे
अन्तर भावेन	चित्तसे
केशवं	श्रीकेशवका
पूजयामास	पूजन किया
च महाभागान्	तथा महाभाग
सिद्ध अर्थान्	आप्तकाम
ब्राह्मणान् अपि	ब्राह्मणोंका भी
भक्तितः	भक्तिपूर्वक (सत्कार किया) ॥३२॥

गवां रुक्मविषाणीनां रूप्याङ्घ्रीणां सुवाससाम् ।
पयः शीलवयोरूपवत्सोपस्करसम्पदाम् ॥३३॥

गवां रुक्म विषाणीनां रूप्य अङ्घ्रीणां सुवाससां पयः शील वयः रूप वत्स उपस्कर सम्पदाम् ॥३३॥

रुक्म	सोनेसे
विषाणीनां	मढ़ी सींग,
रूप्य अङ्घ्रीणां	चांदीसे मढ़े खुर,
सुवाससां	उत्तम वस्त्रोंसे आच्छादित,
पयः शील	दूध देनेवाली, गुणवती,
वयः रूप	कम आयुकी, सुन्दर,
वत्स उपस्कर	बछड़े, सामग्री तथा
सम्पदां गवां	सम्पत्ति सहित गायें ॥३३॥

प्राहिणोत् साधु विप्रेभ्यो गृहेषु न्यर्बुदानिषट् ।
भोजयित्वा द्विजानग्रे स्वाद्वन्नं गुणवत्तमम् ॥३४॥

प्राहिणोत् साधु विप्रेभ्यः गृहेषु न्यर्बुदानि षट् भोजयित्वा द्विजान् अग्रे स्वादु अन्नं गुणवत्तमम् ॥३४॥

साधु विप्रेभ्यः	(उन) साधु ब्राह्मणोंके
गृहेषु	घरोंमें
षट् न्यर्बुदानि	साठ करोड़
प्राहिणोत्	भेज दीं
अग्रे	पहिले
द्विजान्	उन ब्राह्मणोंको
गुणवत्तमं	अत्यन्त गुणवान
स्वादु अन्नं	स्वादिष्ट अन्न
भोजयित्वा	भोजन करा के ॥३४॥

लब्धकामैरनुज्ञातः पारणायोपचक्रमे ।
तस्य तर्ह्यतिथिः साक्षाद् दुर्वासा भगवानभूत् ॥३५॥

लब्धकामैः अनुज्ञातः पारणाय उपचक्रमे तस्य तर्हि अतिथिः साक्षात् दुर्वासा भगवान् अभूत ॥३५॥

लब्धकामैः	इच्छित (पदार्थ) पाकर	तर्हि	उसी समय
अनुज्ञातः	(ब्राह्मणोंके) अनुमति देनेपर	साक्षात्	साक्षात्
पारणाम	(व्रतका) पारण करनेके लिए	भगवान्	भगवान
उपचक्रमे	उपक्रम करने लगे	दुर्वासा तस्य अतिथिः अभूत	दुर्वासा उनके अतिथि होकर आ गये ॥३५॥

तमानर्चातिथिं भूपः प्रत्युत्थानासनार्हणैः ।
यथाचेऽभ्यवहाराय पादमूलमुपागतः ॥३६॥

तं आनर्च अतिथिं भूपः प्रत्युत्थान आसन अर्हणैः ययाचे अभ्यवहाराय पादमूलं उपागतः ॥३६॥

भूपः	राजाने	आनर्च	पूजन किया
तं अतिथिं	उन अतिथिका	पादमूलं	(फिर उनके)चरणोंके
प्रत्युत्थान	स्वागतमें उठकर खड़े होना,	उपागतः	पास जाकर
आसन	आसन देना तथा	अभ्यवहाराय	भोजन ग्रहण करनेके लिए
अर्हणैः	पूजा द्रव्योंसे	ययाचे	प्रार्थना की ॥३६॥

प्रतिनन्द्य स तद्याच्ञां कर्तुमावश्यकं गतः ।
निममज्ज बृहद्ध्यायन् कालिन्दीसलिले शुभे ॥३७॥

प्रतिनन्द्य स तत् याञ्चां कर्तुं आवश्यकं गतः निममज्ज बृहत् ध्यायन् कालिन्दी सलिले शुभे ॥३७॥

स तत्	उन्होंने उस (राजा) की	गतः	चले गये तथा
		बृहत् ध्यायन्	परम ब्रह्मका ध्यान करते
याञ्चां	प्रार्थना		
प्रतिनन्द्य	स्वीकार करके	कालिन्दी	यमुनाके
आवश्यकं	आवश्यक	शुभे सलिले	पवित्र जलमें
कर्तुं	(दैनिक कृत्य) करने	निममज्ज	डुबकी लगायी ॥३७॥

मुहूर्तार्धावशिष्टायां द्वादश्यां पारणं प्रति ।
चिन्तयामास धर्मज्ञो द्विजैस्तद्धर्मसङ्कटे ॥३८॥

मुहूर्त अर्ध अवशिष्टायां द्वादश्यां पारणं प्रति चिन्तयामास धर्मज्ञः द्विजैः तत् धर्म सङ्कटे ॥३८॥

पारणं प्रति	पारणके लिए	सङ्कटे	संकटके विषयमें
मुहूर्त अर्धं	आधा मुहूर्त	धर्मज्ञः	धर्मज्ञ राजा
द्वादश्यां	द्वादशीके	द्विजैः	ब्राह्मणोंके साथ
अवशिष्टायां	बच रहनेपर	चिन्तयामास	विचार करने लगे ॥३८॥
तत् धर्म	उस धर्म		

ब्राह्मणातिक्रमे दोषो द्वादश्यां यदपारणे ।
यत् कृत्वा साधु मे भूयादधर्मो वान मां स्पृशेत् ॥३९॥

ब्राह्मण अतिक्रमे दोषः द्वादश्यां यत् अपारणे यत् कृत्वा साधु मे भूयात् अधर्मः वा न मां स्पृशेत् ॥३९॥

ब्राह्मण	ब्राह्मणका	दोषः	दोष है,
अतिक्रमे	अतिक्रमण (उससे पहिले भोजन करने) में	यत् कृत्वा	जो करनेसे
		मे साधु भूयात्	मेरा भला हो
द्वादश्यां	तथा द्वादशीमें	वा मां	तथा मुझे
अपारणे	पारण न करनेमें	अधर्मः न	अधर्म न
यत्	क्योंकि (दोनोंमें ही)	स्पृशेत्	लगे (वह बतलावें) ॥३९॥

अम्भसा केवलेनाथ करिष्ये व्रतपारणम् ।
प्राहुरब्भक्षणं विप्रा ह्यशितं नाशितं च तत् ॥४०॥

अम्भसा केवलेन अथ करिष्ये व्रत पारणं प्राहुः अप्भक्षणं विप्रा हि अशितं न अशितं च तत् ॥४०॥

विप्रा अथ	ब्राह्मणो ! अतः	हि तत्	क्योंकि उसे
केवलेन	केवल	अशितं च	भोजन करना तथा
अम्भसा	जलसे	अशितं न	भोजन न करना
व्रत पारणं	व्रतका पारण	प्राहुः	(श्रुतिने) कहा है ॥४०॥
करिष्ये	करूँगा		

इत्यपः प्राश्य राजर्षिश्चिन्तयन् मनसाच्युतम् ।
प्रत्यचष्ट कुरुश्रेष्ठ द्विजागमनमेव सः ॥४१॥

इति अपः प्राश्य राजर्षिः चिन्तयन् मनसा अच्युतं प्रति आचष्ट कुरु श्रेष्ठ द्विज आगमनं एव सः ॥४१॥

कुरु श्रेष्ठ	कुरुश्रेष्ठ परीक्षित !	चिन्तयन्	चिन्तन करते हुए
इति	इस प्रकार (कहकर)	द्विज	ब्राह्मण दुर्वासाके
सः राजर्षिः	वे राजर्षि	आगमनं एव	आनेकी ही
अपः प्राश्य	जल पीकर	प्रति आचष्ट	प्रतीक्षा करने लगे ॥४१॥
मनसा अच्युतं	मनसे अच्युत भगवान्‌का		

दुर्वासा यमुनाकूलात् कृतावश्यक आगतः ।
राज्ञाभिनन्दितस्तस्य बुबुधे चेष्टितं धिया ॥४२॥

दुर्वासा यमुना कूलात् कृत आवश्यक आगतः राज्ञः अभिनन्दितः तस्य बुबुधे चेष्टितं धिया ॥४२॥

यमुना कूलात्	यमुना किनारेसे	अभिनन्दितः	स्वागत किये जानेपर
कृत आवश्यक	आवश्यक कृत्य करके	धिया तस्य	बुद्धि द्वारा उनकी
आगतः दुर्वासा	आये दुर्वासाने	चेष्टितं बुबुधे	चेष्टा समझ ली ॥४२॥
राज्ञः	राजाके द्वारा		

मन्युना प्रचलद्गात्रो भ्रुकुटीकुटिलाननः ।
बुभुक्षितश्च सुतरां कृताञ्जलिमभाषत ॥४३॥

मन्युना प्रचलत् गात्रः भ्रुकुटी कुटिल आननः बुभुक्षितः च सुतरां कृताञ्जलिं अभाषत ॥४३॥

बुभुक्षितः च	भूखे होनेके कारण	आननः	मुख
सुतरां मन्युना	और भी आये क्रोधसे	कृताञ्जलिं	हाथ जोड़े (राजा) से
प्रचलत् गात्रः	काँपते शरीर		
भ्रुकुटी कुटिल	टेढ़ी भौंहोंवाले	अभाषत	बोले ॥४३॥

अहो अस्य नृशंसस्य श्रियोन्मत्तस्य पश्यत ।
धर्मव्यतिक्रमं विष्णोरभक्तस्येशमानिनः ॥४४॥

अहो अस्य नृशंसस्य श्रिय उन्मत्तस्य पश्यत धर्म व्यतिक्रमं विष्णोः अभक्तस्य ईश मानिनः ॥४४॥

अहो	'अरे,	अस्य	इस
विष्णोः	हरि-	श्रिय उन्मत्तस्य	धनोन्मत्तका
अभक्तस्य	भक्तिहीन	धर्म व्यतिक्रमं	धर्मोल्लंघन तो
ईश	अपनेको समर्थ	पश्यत	देखो ॥४४॥
मानिनः	माननेवाले		

यो मामतिथिमायातमातिथ्येन निमन्त्र्य च ।
अदत्त्वा भुक्तवांस्तस्य सद्यस्ते दर्शये फलम् ॥४५॥

यः मां अतिथिं आयातं आतिथ्येन निमन्त्र्य च अदत्त्वा भुक्तवान् तस्य सद्यः ते दर्शये फलम् ॥४५॥

मां अतिथिं	मेरे अतिथि रूपमें	भुक्तवान्	भोजन कर लिया
आयातं च	आनेपर तथा	तस्य ते सद्यः	उसका तुझे तत्काल
आतिथ्येन	आतिथ्य भावसे	फलं दर्शये	फल दिखलाता हूँ' ॥४५॥
निमन्त्र्य	निमन्त्रित करके		
यः अदत्त्वा	जिसने बिना दिये		

एवं ब्रुवाण उत्कृत्य जटां रोषविदीपितः ।
तया स निर्ममे तस्मै कृत्यां कालानलोपमाम् ॥४६॥

एवं ब्रुवाणं उत्कृत्य जटां रोष विदीपितः तया स निर्ममे तस्मै कृत्यां काल अनल उपमाम् ॥४६॥

एवं ब्रुवाणं	इस प्रकार कहते हुए	तस्मै	उस (राजा) के लिए
स रोष	उन्होंने क्रोधसे	काल अनल	कालाग्निके
विदीपितः	प्रज्वलित होकर	उपमां	समान
जटां उत्कृत्य	जटा उखाड़कर	कृत्यां	कृत्या (राक्षसी)
स तया	उन्होंने उससे	निर्ममे	बनायी ॥४६॥

तामापतन्तीं ज्वलतीमसिहस्तां पदा भुवम् ।
वेपयन्तीं समुद्वीक्ष्य न चचाल पदान्नृपः ॥४७॥

तां आपतन्तीं ज्वलतीं असिहस्तां पदा भुवं वेपयन्तीं समुद्वीक्ष्य न चचाल पदात् नृपः ॥४७॥

तां ज्वलतीं	उस प्रज्वलित	समुद्वीक्ष्य	ठीक-ठीक देखकर भी
असिहस्तां	हाथमें तलवार लिये	नृपः पदात्	राजा अपने स्थानसे
पदा भुवं	पैरोंसे पृथ्वीको	चचाल न	हिले नहीं ॥४७॥
वेपयन्तीं	कँपातीको		
आपतन्तीं	झपटती आती		

प्राग्दिष्टं भृत्यरक्षायां पुरुषेण महात्मना ।
ददाह कृत्यां तां चक्रं क्रुद्धाहिमिव पावकः ॥४८॥

प्राक् दिष्टं भृत्य रक्षायां पुरुषेण महात्मना ददाह कृत्यां तां चक्रं क्रुद्ध अहिं इव पावकः ॥४८॥

महात्मना	परमात्मा	तां कृत्यां	उस कृत्याको
पुरुषेण	परम पुरुष द्वारा	क्रुद्ध अहिं	क्रोधित सर्पको
भृत्य	अपने सेवककी	पावकः इव	दावाग्निके समान
रक्षायां	रक्षाके लिए	ददाह	भस्म कर दिया ॥४८॥
प्राक् दिष्टं	पहिलेसे निर्दिष्ट		
चक्रं	चक्रने		

तदभिद्रवदुद्वीक्ष्य स्वप्रयासं च निष्फलम् ।
दुर्वासा दुद्रुवे भीतो दिक्षु प्राणपरीप्सया ॥४६॥

तत् अभिद्रवत् उद्वीक्ष्य स्वप्रयासं च निष्फलं दुर्वासा दुद्रुवे भीतः दिक्षु प्राण परीप्सया ॥४६॥

तत् अभिद्रवत्	उसे अपनी ओर आते	भीतः	डरकर
च	तथा	प्राण परीप्सया	प्राण रक्षाके लिए
स्वप्रयासं	अपने प्रयत्नको	दुर्वासा दिक्षु	दुर्वासा दिशाओंमें
निष्फलं	व्यर्थ हुआ	दुद्रुवे	दौड़ने लगे ॥४६॥
उद्वीक्ष्य	देखकर		

तमन्वधावद् भगवद्रथाङ्गं
दावाग्निरुद्धूतशिखो यथाहिम् ।
तथानुषक्तं मुनिरीक्षमाणो
गुहां विविक्षुः प्रससार मेरोः ॥५०॥

तं अन्वधावत् भगवत् रथाङ्गं दाव अग्निः उद्धूत शिखः यथा अहिं तथा अनुषक्तं मुनिः ईक्षमाणः गुहां विविक्षुः प्रससार मेरोः ॥५०॥

यथा अहिं	जैसे सर्पके पीछे	अनुषक्तं	उसे पीछे लगा
उद्धूत शिखः	उठती लपटों वाला	ईक्षमाणः	देखकर
दाव अग्निः	दावानल (दौड़े)	मुनिः	दुर्वासा
भगवत्	भगवान्का	मेरोः गुहां	सुमेरुकी गुफामें
रथाङ्गं	चक्र	विविक्षुः	घुसनेकी
तं अन्वधावत्	उनके पीछे दौड़ पड़ा	प्रससार	इच्छासे दौड़े ॥५०॥
तथा	इस प्रकार		

दिशो नभः क्ष्मां विवरान् समुद्रां-
ल्लोकान् सपालांस्त्रिदिवं गतः सः ।
यतो यतो धावति तत्र तत्र
सुदर्शनं दुष्प्रसहं ददर्श ॥५१॥

दिशः नभः क्ष्मां विवरान् समुद्रान् लोकान् सपालान् त्रिदिवं गतः सः यतः यतः धावति तत्र तत्र सुदर्शनं दुःप्रसहं ददर्श ॥५१॥

दिशः	दिशाओंमें,	त्रिदिवं गतः	स्वर्ग गये; किन्तु
नभः	आकाशमें,	सः यतः	वे जहां
क्ष्मां	पृथ्वीपर,	यतः धावति	जहां दौड़े
विवरान्	पातालादिमें,	तत्र तत्र	वहां-वहां
समुद्रान्	समुद्रोंमें	दुःप्रसहं	दुःसह
सपालान्	लोकपालोंके	सुदर्शनं ददर्श	सुदर्शन-चक्रको
लोकान्	लोकोंमें,		देखा ॥५१॥

अलब्धनाथः स यदा कुतश्चित्
संत्रस्तचित्तोऽरणमेषमाणः ।
देवं विरिञ्चं समगाद् विधात-
स्त्राह्यात्मयोनेऽजिततेजसो माम् ॥५२॥

अलब्ध नाथः स यदा कुतश्चित् संत्रस्त चित्तः अरणं एषमाणः देवं विरिञ्चं सम अगात् विधातः त्राहि आत्मयोने अजित तेजसः माम् ॥५२॥

संत्रस्त चित्तः	भय विह्वल चित्त	सम अगात्	समीप गये,
स यदा	जब उन्हें	विधातः	(बोले) 'हे सृष्टि
अरणं	रक्षक		कर्ता !
एषमाणः	ढूंढ़ते हुए	आत्मयोने	स्वयंभू !
कुतश्चित्	कहीं भी	अजित	अजित श्रीहरिके
नाथः	रक्षक स्वामी	तेजसः	तेजसे
अलब्ध	नहीं मिला	मां त्राहि	मेरी रक्षा कीजिए'
देवं विरिञ्चं	ब्रह्मदेवके		॥५२॥

ब्रह्मोवाच

स्थानं मदीयं सहविश्वमेतत्
क्रीडावसाने द्विपरार्धसंज्ञे ।

भ्रूभङ्गमात्रेण हि संदिधक्षोः
कालात्मनो यस्य तिरोभविष्यति ॥५३॥

स्थानं मत् इयं सह विश्वं एतत् क्रीडा अवसाने द्विपरार्ध संज्ञे भ्रू भंग मात्रेण हि संदिधक्षोः काल आत्मनः यस्य तिरो भविष्यति ॥५३॥

द्विपरार्ध संज्ञे	द्विपरार्ध संज्ञक	यस्य	जिन
क्रीडा	भगवतल्लीला	काल आत्मनः	कालस्वरूपकी
अवसाने	समाप्तिके समय	भ्रू भंग	भ्रू संकेत
मत् इयं स्थानं	मेरा यह स्थान	मात्रेण हि	मात्रसे ही
सह एतत् विश्वं	इस विश्वके साथ	तिरो	तिरोहित
संदिधक्षोः	भस्म कर देनेकी इच्छा करनेपर	भविष्यति	हो जायगा ॥५३॥

अहं भवो दक्षभृगुप्रधानाः
प्रजेशभूतेशसुरेशमुख्याः ।
सर्वे वयं यन्नियमं प्रपन्ना
मूर्ध्न्यर्पितं लोकहितं वहामः ॥५४॥

अहं भवः दक्ष भृगु प्रधानाः प्रजेश भूतेश सुरेश मुख्याः सर्वे वयं यत् नियमं प्रपन्ना मूर्ध्नि अर्पितं लोकहितं वहामः ॥५४॥

अहं भवः	मैं, शंकरजी,	यत् नियमं	जिनके नियमोंकी
दक्ष भृगु	दक्ष, भृगु	प्रपन्ना	शरणमें रहकर
प्रधानाः	जिनमें प्रधान हैं वे	मूर्ध्नि अर्पितं	सिरपर दिये
प्रजेश, भूतेश	प्रजापति, भूतेश्वर,	लोकहितं	लोकहितको
सुरेश मुख्याः	सुरेश्वर प्रमुख	वहामः	ढोते हैं ॥५४॥
वयं सर्वे	हम सब		

श्रीशुक उवाच—*
प्रत्याख्यातो विरिञ्चेन विष्णुचक्रोपतापितः ।
दुर्वासाः शरणं यातः शर्वं कैलासवासिनम् ॥५५॥

*यह उवाच अन्य प्रतियोंमें नहीं है ।

प्रत्याख्यातः विरिञ्चेन विष्णु चक्र उपतापितः दुर्वासाः शरणं यातः शर्वं कैलास वासिनम् ॥५५॥

विरिञ्चेन	ब्रह्माजी द्वारा	दुर्वासाः	दुर्वासा
प्रत्याख्यातः	प्रत्युत्तर दे देनेपर	कैलास वासिनं	कैलासवासी
विष्णु	भगवान् बिष्णुके	शर्वं	शंकरजी की
चक्र	चक्रसे	शरणं यातः	शरण गये ॥५५॥
उपतापितः	संतप्त किये गये		

श्रीरुद्र उवाच

वयं न तात प्रभवाम भूम्नि
यस्मिन् परेऽन्येऽप्यजजीवकोशाः ।
भवन्ति काले न भवन्ति हीदृशाः
सहस्रशो यत्र वयं भ्रमामः ॥५६॥

वयं न तात प्रभवाम भूम्नि यस्मिन् परे अन्ये अपि अज जीवकोशाः भवन्ति काले न भवन्ति हि ईदृशाः सहस्रशः यत्र वयं भ्रमामः ॥५६॥

तात	तात !	यत्र वयं	जिनमें हम जैसे
यस्मिन् परे	जिन परम पुरुषमें	सहस्रशः	सहस्रों
अन्ये अपि	दूसरे भी	भ्रमामः	भटकते रहते हैं,
अज जीवकोशाः	ब्रह्मादिके ब्रह्मण्ड	भूम्नि	उन भूमाके सम्बन्धमें
काले भवन्ति	समयपर उत्पन्न होते	वयं न प्रभवाम	हम नहीं समर्थ हैं
न भवन्ति	तथा लीन हो जाते हैं		॥५६॥

अहं सनत्कुमारश्च नारदो भगवानजः ।
कपिलोऽपान्तरतमो देवलो धर्म आसुरिः ॥५७॥

अहं सनत् कुमारः च नारदः भगवान् अजः कपिलः अपान्तरतमः देवलः धर्म आसुरिः ॥५७॥

अहं	मै,	कपिलः	कपिल,
सनत् कुमारः	सनत्कुमारादि,	अपान्तरतमः	अपान्तरतम,
च नारदः	तथा नारदजी,	देवलः धर्म	देवल, धर्मराज,
भगवान् अजः	भगवान् ब्रह्मा,	आसुरिः	आसुरि ॥५७॥

मरीचिप्रमुखाश्चान्ये सिद्धेशाः पारदर्शनाः ।
विदाम न वयं सर्वे यन्मायां माययाऽऽवृताः ॥५८॥

मरीचि प्रमुखाः च अन्ये सिद्धेशाः पारदर्शनाः विदाम न वयं सर्वे यत् मायां मायया आवृताः ॥५८॥

मरीचि प्रमुखाः	मरीचि प्रधान	मायया आवृताः	मायासे आवृत होनेसे
अन्ये च	दूसरे भी	वयं सर्वे	हम सब
पारदर्शनाः	सर्वज्ञ	यत् मायां	जिनकी मायाको
सिद्धेशाः	सिद्धेश्वर गण	न विदाम	नहीं जानते ॥५८॥

तस्य विश्वेश्वरस्येदं शस्त्रं दुर्विषहं हि नः ।
तमेव शरणं याहि हरिस्ते शं विधास्यति ॥५९॥

तस्य विश्वेश्वरस्य इदं शस्त्रं दुर्विषहं हि नः तं एव शरणं याहि हरिः ते शं विधास्यति ॥५९॥

हि तस्य	क्योंकि उन	तं एव	उन्हींकी ही
विश्वेश्वरस्य	विश्वेश्वरका	शरणं याहि	शरणमें जाओ,
इदं शस्त्रं	यह शस्त्र है	हरिः ते	श्रीहरि तुम्हारा
नः	हम सबके लिए	शं विधास्यति	कल्याण करेंगे ॥५९॥
दुर्विषहं	दुस्सह है,		

श्रीशुक उवाच*

ततो निराशो दुर्वासाः पदं भगवतो ययौ ।
वैकुण्ठाख्यं यदध्यास्ते श्रीनिवासः श्रिया सह ॥६०॥

---

*यह उवाच अन्य प्रतियोंमें नहीं है ।

ततः निराशः दुर्वासाः पदं भगवतः ययौ वैकुण्ठ आख्यं यत् अध्यास्ते श्रीनिवासः श्रिया सह ॥६०॥

ततः निराशः	तब निराश होकर	श्रिया सह	लक्ष्मीजीके साथ
दुर्वासाः	दुर्वासाजी	श्रीनिवासः	भगवान श्रीनिवास
वैकुण्ठ आख्यं	वैकुण्ठ नामक	अध्यास्ते	विराजते हैं,
भगवतः पदं	भगवानके धाम	ययौ	गये ॥६०॥
यत्	जहां		

संदह्यमानोऽजितशस्त्रवह्निना
तत्पादमूले पतितः सवेपथुः ।
आहाच्युतानन्त सदीप्सित प्रभो
कृतागसं माव हि विश्वभावन ॥६१॥

सन्दह्यमानः अजित शस्त्र वह्निना तत् पादमूले पतितः स वेपथुः आह अच्युत अनन्त सत् ईप्सित प्रभो कृत आगसं मा अव हि विश्व भावन ॥६१॥

अजित शस्त्र	भगवान्के शस्त्रकी	सत् ईप्सित	भक्तप्रिय !
वह्निना	अग्निसे	प्रभो	प्रभो !
सन्दह्यमानः	जलते हुए	मा कृत आगसं	मुझ अपराधीकी
तत्	उन भगवानके	अव	रक्षा कीजिए
पादमूले	चरणोंपर	हि	क्योंकि आप
स वेपथुः	वे काँपते हुए	विश्वभावन	विश्वरक्षक हैं
पतितः आह	गिरकर बोले–		॥६१॥
अच्युत अनन्त	'अच्युत ! अनन्त !		

अजानता ते परमानुभावं
कृतं मयाघं भवतः प्रियाणाम् ।
विधेहि तस्यापचितिं विधात-
र्मुच्येत यन्नाम्न्युदिते नारकोऽपि ॥६२॥

अजानता ते परम अनुभावं कृतं मया अघं भवतः प्रियाणां विधेहि तस्य अपचितिं विधातः मुच्येत यत् नाम्नि उदिते नारकः अपि ॥६२॥

ते परम	आपका परम	विधातः	क्योंकि आप ही निर्माता है
अनुभावं	प्रभाव		
अजानता	न जाननेके कारण	यत् नाम्नि	और जिनके नामको
भवतः प्रियाणां	आपके प्रिय भक्तका	उदिते	उच्चारण करके
मया अघं कृतं	मैंने अपराध किया है,	नारक अपि	नारकीय जीव भी
		मुच्येत	(नरकसे) छूट जाता है' ॥६२॥
तस्य अपचितिं	उसका प्रतिकार		
विधेहि	कीजिए,		

श्रीभगवानुवाच

अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज ।
साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ॥६३॥

अहं भक्त पराधीनः हि अस्वतन्त्र इव द्विज साधुभिः ग्रस्त हृदयः भक्तैः भक्तजन प्रियः ॥६३॥

द्विज	ब्राह्मण !	पराधीनः	पराधीन हूँ,
हि	क्योंकि	साधुभिः भक्तैः	साधु भक्तों द्वारा
अस्वतन्त्र इव	अस्वतन्त्रके समान	ग्रस्त हृदयः	मेरा हृदय पकड़ लिया गया है ॥६३॥
भक्तजन प्रियः	भक्तोंका प्रिय		
अहं भक्त	मैं भक्तोंके		

नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना ।
श्रियं चात्यन्तिकीं ब्रह्मन् येषां गतिरहं परा ॥६४॥

न अहं आत्मानं आशासे मद् भक्तैः साधुभिः विना श्रियं च आत्यन्तिकीं ब्रह्मन् एषां गतिः अहं परा ॥६४॥

ब्रह्मन्	ब्रह्मन !	अहं	मैं ही हूँ उन
एषां परा गतिः	जिनकी परम गति	मद् भक्तैः	मेरे भक्त

साधुभिः विना	सत्पुरुषोंके बिना	श्रियं न	लक्ष्मीको भी नहीं
अहं आत्मानं	मैं अपना आत्मा	आशासे	चाहता ॥६४॥
च आत्यन्तिकीं	तथा अनपायिनी		

ये दारागारपुत्राप्तान् प्राणान् वित्तमिमं परम् ।
हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ॥६५॥

ये दारा आगार पुत्र आप्तान् प्राणान् वित्तं इमं परं हित्वा मां शरणं याताः कथं तान् त्यक्तुम् उत्सहे ॥६५॥

ये दारा	जो स्त्री,	हित्वा मां	(सब) छोड़कर मेरी
आगार	घर,	शरणं याताः	शरण आये हैं,
पुत्र आप्तान्	पुत्र, गुरुजन,	तान् त्यक्तुं	उन्हें त्यागनेका
प्राणान् वित्तं	प्राण, धन,	कथं उत्सहे	कैसे उत्साह कर
इमं परं	यह लोक, परलोक		सकता हूँ ॥६५॥

मयि निर्बद्धहृदयाः साधवः समदर्शनाः ।
वशीकुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा ॥६६॥

मयि निर्बद्ध हृदयाः साधवः समदर्शनाः वशीकुर्वन्ति मां भक्त्या सत् स्त्रियः सत् पतिं यथा ॥६६॥

मयि निर्बद्ध	मुझमें बँधे	वशीकुर्वन्ति	वशमें कर लेते हैं
हृदयाः	हृदयवाले	यथा सत्	जैसे सती
समदर्शनाः	समदर्शी	स्त्रियः	स्त्री
साधवः	सत्पुरुष	सत पतिं	सत्पुरुष पतिको
भक्त्या मां	भक्ति द्वारा मुझे		॥६६॥

मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयम् ।
नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत् कालविद्रुतम् ॥६७॥

मत् सेवया प्रतीतं च सालोक्य आदि च तुष्टयं न इच्छन्ति सेवया पूर्णाः कुतः अन्यत् कालविद्रुतम् ॥६७॥

मत् सेवया	मेरी सेवासे	च तुष्टयं	चारों प्रकारके (मोक्ष) भी
पूर्णाः	आप्तकाम	न इच्छन्ति	नहीं चाहते
सेवया	उस सेवासे	कालविद्रुतं	काल द्वारा नष्ट होने-वाले (इन्द्रादि पदों)
प्रतीतं	प्राप्त होनेवाले	अन्यत् कुतः	दूसरे (पदों) की चर्चा क्या ॥६७॥
सालोक्य	सालोक्य (सारूप्य, सामीप्य, सार्ष्टि)		
आदि	आदि		

साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् ।
मदन्यत् ते न जानन्ति नाहं तेभ्यो मनागपि ॥६८॥

साधवः हृदयं मह्यं साधूनां हृदयं तु अहं मत् अन्यत् ते न जानन्ति न अहं तेभ्यः मनाक् अपि ॥६८॥

साधवः मह्यं	साधु पुरुष मेरे	न जानन्ति	कुछ नहीं जानते,
हृदयं	हृदय हैं	अहं तेभ्यः	मैं उनसे
तु साधूनां	और साधुओंका	मनाक् अपि	तनिक भी
हृदयं अहं	हृदय मैं हूँ,	न	(पृथक प्रिय) नहीं है ॥६८॥
ते मत् अन्यत्	वे मुझसे भिन्न		

उपायं कथयिष्यामि तव विप्र शृणुष्व तत् ।
अयं ह्यात्माभिचारस्ते यतस्तं यातु वै भवान् ॥६९॥

उपायं कथयिष्यामि तव विप्र शृणुष्व तत् अयं हि आत्म अभिचारः ते यतः तं यातु वै भवान् ॥६९॥

विप्र तव	ब्रह्मन् ! तुमसे	अभिचारः	अभिचारका
उपायं	उपाय	अयं	यह फल मिला है
कथयिष्यामि	बतलाता हूँ	वै भवान्	निश्चय तुम
तत् शृणुष्व	उसे सुनो	तं यातु	उसीके पास जाओ ॥६९॥
हि यतः ते	क्योंकि जहाँसे तुम्हें		
आत्म	अपने		

तपो विद्या च विप्राणां निःश्रेयसकरे उभे ।
ते एव दुर्विनीतस्य कल्पेते कर्तुरन्यथा ॥७०॥

तपः विद्या च विप्राणां निःश्रेयसकरे उभे ते एव दुर्विनीतस्य कल्पेते कर्तुः अन्यथा ॥७०॥

तपः च विद्या	तपस्या तथा विद्या	दुर्विनीतस्य	अविनयी धृष्टके लिए
उभे विप्राणां	दोनों ब्राह्मणोंके लिए	कर्तुः	प्रयोग करनेवालेको
		अन्यथा कल्पेते	उलटा फल देते हैं ॥७०॥
निःश्रेयसकरे	परम कल्याणकारी हैं		
ते एव	किन्तु वही		

ब्रह्मंस्तद् गच्छ भद्रं ते नाभागतनयं नृपम् ।
क्षमापय महाभागं ततः शान्तिर्भविष्यति ॥७१॥

ब्रह्मन् तत् गच्छ भद्रं ते नाभाग तनयं नृपं क्षमापय महाभागं ततः शान्तिः भविष्यति ॥७१॥

ब्रह्मन्	ब्रह्मन् !	नृपं गच्छ	राजाके पास जाइये
ते भद्रं	तुम्हारा कल्याण हो	क्षमापय	उनसे क्षमा कराओ
तत् महाभाग	अतः महाभाग	ततः शान्तिः	इससे (तुम्हें) शान्ति
नाभाग तनयं	नाभागनन्दन	भविष्यति	होगी ॥७१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
नवमस्कन्धे चतुर्थोऽध्यायः ॥४॥

अथ पञ्चमोऽध्यायः

श्रीशुक उवाच

एवं भगवताऽऽदिष्टो दुर्वासाश्चक्रतापितः ।
अम्बरीषमुपावृत्य तत्पादौ दुःखितोऽग्रहीत् ॥१॥

एवं भगवता आदिष्टः दुर्वासाः चक्र तापितः अम्बरीषं उप आवृत्य तत् पादौ दुःखितः अग्रहीत् ॥१॥

एवं	इस प्रकार	अम्बरीषं	अम्बरीषके
भगवता	भगवानके	उप आवृत्य	समीप लौटकर
आदिष्टः	आदेश देनेपर	दुःखितः	दुःखी होकर
चक्र तापितः	चक्र द्वारा संतप्त किये गये	तत् पादौ	उनके पैर
		अग्रहीत्	पकड़ लिए ॥१॥
दुर्वासाः	दुर्वासाने		

तस्य सोद्यमनं वीक्ष्य पादस्पर्शविलज्जितः ।
अस्तावीत् तद्धरेरस्त्रं कृपया पीडितो भृशम् ॥२॥

तस्य स उद्यमनं वीक्ष्य पादस्पर्श विलज्जितः अस्तावीत् तत् हरेः अस्त्रं कृपया पीडितः भृशम् ॥२॥

तस्य स	उन (दुर्वासाजी) की वह	भृशं पीडितः	अत्यन्त पीड़ित होकर
उद्यमनं वीक्ष्य	चेष्टा देखकर	तत् हरेः	उस श्रीहरिके
पादस्पर्श	पैर छूनेसे	अस्त्रं	अस्त्रकी
विलज्जितः	बहुत लज्जित होकर	अस्तावीत्	स्तुति करने लगे ॥२॥
कृपया	कृपाके कारण		

अम्बरीष उवाच

त्वमग्निर्भगवान् सूर्यस्त्वं सोमो ज्योतिषां पतिः ।
त्वमापस्त्वं क्षितिर्व्योम वायुर्मात्रेन्द्रियाणि च ॥३॥

त्वं अग्निः भगवान् सूर्यः त्वं सोमः ज्योतिषां पतिः त्वं आपः त्वं क्षितिः व्योम वायुः मात्रा इन्द्रियाणि च ॥३॥

त्वं अग्निः	तुम अग्नि हो,	त्वं क्षितिः	तुम पृथ्वी,
भगवान् सूर्यः	भगवान् सूर्य हो,	व्योम वायुः	आकाश, वायु,
ज्योतिषां पतिः	तारागणोंके स्वामी	मात्रा च	तन्मात्राएँ तथा
सोमः त्वं	चन्द्रमा तुम्ही हो,	इन्द्रियाणि	इन्द्रियां हो ॥३॥
त्वं आपः	तुम जल हो,		

सुदर्शन नमस्तुभ्यं सहस्राराच्युतप्रिय ।
सर्वास्त्रघातिन् विप्राय स्वस्ति भूया इडस्पते ॥४॥

सुदर्शन नमः तुभ्यं सहस्र अर अच्युत प्रिय सर्व अस्त्रघातिन् विप्राय स्वस्ति भूया इडस्पते ॥४॥

सहस्र अर	सहस्र अरों वाले !	सुदर्शन	सुदर्शन !
अच्युत प्रिय	श्रीअच्युतके प्रिय !	तुभ्यं नमः	तुमको नमस्कार !
सर्व	सर्व	विप्राय	विप्रवरको
अस्त्रघातिन्	अस्त्र नाशक !	स्वस्ति भूया	शान्ति हो ॥४॥
इडस्पते	पृथ्वी रक्षक !		

त्वं धर्मस्त्वमृतं सत्यं त्वं यज्ञोऽखिलयज्ञभुक् ।
त्वं लोकपालः सर्वात्मा त्वं तेजः पौरुषं परम् ॥५॥

त्वं धर्मः त्वं ऋतं सत्यं त्वं यज्ञः अखिल यज्ञ भुक् त्वं लोकपालः सर्व आत्मा त्वं तेजः पौरुषं परम् ॥५॥

त्वं धर्मः	तुम धर्म हो,	त्वं लोकपालः	तुम लोकोंके पालक
त्वं ऋतं	तुम ऋत और	सर्व आत्मा	सबके आत्मा हो
सत्यं	सत्य हो,	त्वं परं पौरुषं	तुम परम पुरुषके
त्वं अखिल यज्ञ	तुम सब यज्ञोंके	तेजः	तेज हो ॥५॥
भुक् यज्ञः	भोक्ता यज्ञपुरुष हो,		

नमः सुनाभाखिलधर्मसेतवे
ह्यधर्मशीलासुरधूमकेतवे ।
त्रैलोक्यगोपाय विशुद्धवर्चसे
मनोजवायाद्भुतकर्मणे गृणे ॥६॥

नमः सुनाभ अखिल धर्म सेतवे हि अधर्मशील असुर धूमकेतवे त्रैलोक्य गोपाय विशुद्ध वर्चसे मनोजवाय अद्भुत कर्मणे गृणे ॥६॥

अखिल धर्म	समस्त धर्मोंकी	विशुद्ध वर्चसे	शुद्ध तेजोमय
सेतवे	मर्यादा स्वरूप	सुनाभ नमः	चक्रको नमस्कार,
हि	क्योंकि	मनोजवाय	मनके समान
अधर्मशील	अधर्माचारी		वेगवाले
असुर	असुरोंके लिए	अद्भुत कर्मणे	अद्भुतकर्मा
धूमकेतवे	धूमकेतु के समान,	गृणे	तुम्हारी स्तुति करता
त्रैलोक्य	त्रिलोकीकी		हूँ ॥६॥
गोपाय	रक्षाके लिए		

त्वत्तेजसा धर्ममयेन संहृतं
तमः प्रकाशश्च धृतो महात्मनाम् ।
दुरत्ययस्ते महिमा गिरां पते
त्वद्रूपमेतत् सदसत् परावरम् ॥७॥

त्वत् तेजसा धर्ममयेन संहृतं तमः प्रकाशः च धृतः महात्मनां दुरत्ययः ते महिमा गिरां पते त्वत् रूपं एतत् सत् असत् पर अवरम् ॥७॥

गिरां पते	वाणीके अधीश्वर !	धृतः	धारण किया है,
त्वत्	तुम्हारे	ते महिमा	तुम्हारी महिमा
धर्ममयेन	धर्ममय	दुरत्ययः	अपार है,
तेजसा	तेजने	एतत् सत्	यह कारण
महात्मनां	महात्माओंके	असत्	कार्य रूप
तमः	अज्ञानको (नष्ट करके)	पर अवरं	श्रेष्ठ-कनिष्ठ जगत्
		त्वत्	तुम्हारी ही
प्रकाशः च	ज्ञानको	रूपं	स्वरूप है ॥७॥

यदा विसृष्टस्त्वमनञ्जनेन वै
बलं प्रविष्टोऽजित दैत्यदानवम् ।
बाहूदरोर्वङ्घ्रिशिरोधराणि
वृक्णन्नजस्रं प्रधने विराजसे ॥८॥

यदा विसृष्टः त्वं अनञ्जनेन वै बलं प्रविष्टः अजित दैत्य दानवं बाहु उदर उरु अङ्घ्रि शिरः धराणि वृक्णन् अजस्रं प्रधने विराजसे ॥८॥

अजित त्वं	अजित ! तुम	उरु अङ्घ्रि	जांघें, पैर,
यदा	जब	शिरः धराणि	सिर, धड़
अनञ्जनेन	निरञ्जन प्रभु द्वारा	अजस्रं	निरन्तर
विसृष्टः	छोड़े जानेपर	वृक्णन्	काटने लगते हो
दैत्य दानवं	दैत्य-दानवोंकी	वै	तब
बलं	सेनामें	प्रधने	निश्चय रणभूमिमें
प्रविष्टः	प्रवेश करके	विराजसे	सुशोभित होते हो ॥८॥
बाहु उदर	भुजाएँ पेट,		

स त्वं जगत्त्राण खलप्रहाणये
निरूपितः सर्वसहो गदाभृता ।
विप्रस्य चास्मत्कुलदैवहेतवे
विधेहि भद्रं तदनुग्रहो हि नः ॥९॥

स त्वं जगत् त्राण खल प्रहाणये निरूपितः सर्व सहः गदाभृता विप्रस्य च अस्मत् कुलदैव हेतवे विधेहि भद्रं तत् अनुग्रहः हि नः ॥९॥

स त्वं	वह तुम	अस्मत्	हमारे
जगत् त्राण	जगत् रक्षक	कुलदैव	कुल-देवताके
सर्व	सब (प्रत्याघात)	हेतवे विप्रस्य	लिये ब्राह्मणका
सहः	सह लेनेवाले	भद्रं विधेहि	कल्याण कीजिये
गदाभृता	भगवान गदाधर द्वारा	हि तत्	क्योंकि वह
खल प्रहाणये	दुष्ट-दमनके लिए	नः	हमपर
निरूपितः च	नियुक्त हो और	अनुग्रहः	अनुग्रह होगा ॥९॥

यद्यस्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः ।
कुलं नो विप्रदैवं चेद् द्विजो भवतु विज्वरः ॥१०॥

यदि अस्ति दत्तं इष्टं वा स्वधर्मः वा स्व अनुष्ठितः कुलं नः विप्र दैवं चेत् द्विजः भवतु विज्वरः ॥१०॥

यदि दत्त	यदि दान	चेत् नः कुलं	यदि हमारे कुल
इष्टं वा	यज्ञ अथवा	विप्र दैवं	ब्राह्मणको देवता
स्वधर्मः वा	अपने धर्मका ही		मानता है तो
स्व	भली प्रकार	द्विजः	ये ब्राह्मणदेव
अनुष्ठितः	(हमने) पालन किया है,	विज्वरः भवतु	तापहीन हो जायँ ॥१०॥

यदि नो भगवान् प्रीत एकः सर्वगुणाश्रयः ।
सर्वभूतात्मभावेन द्विजो भवतु विज्वरः ॥११॥

यदि नः भगवान् प्रीत एकः सर्वगुण आश्रयः सर्वभूत आत्म भावेन द्विजः भवतु विज्वरः ॥११॥

सर्वभूत	सब प्राणियोंको	एकः भगवान्	अद्वितीय भगवान्
आत्म	आत्मरूपसे	यदि नः प्रीतः	यदि हमपर प्रसन्न हैं तो
भावेन	देखनेके कारण	द्विजः विज्वरः	विप्रवर तापहीन
सर्वगुण	सब गुणोंके	भवतु	हो जायँ ॥११॥
आश्रयः	आधार		

श्रीशुक उवाच—

इति संस्तुवतो राज्ञो विष्णुचक्रं सुदर्शनम् ।
अशाम्यत् सर्वतो विप्रं प्रदहद् राजयाच्ञया ॥१२॥

इति संस्तुवतः राज्ञः विष्णु चक्रं सुदर्शनं अशाम्यत् सर्वतः विप्रं प्रदहत् राजयाञ्चया ॥१२॥

इति राज्ञः	इस प्रकार राजाके	विप्रं	ब्राह्मणको
संस्तुवतः	स्तुति करनेपर	प्रदहत्	जला रहा था
विष्णु	भगवान विष्णुका	राजयाञ्चया	राजाकी प्रार्थनासे
चक्रं	चक्र	सर्वतः	सब ओरसे
सुदर्शनं	सुदर्शन जो	अशाम्यत्	शान्त हो गया ॥१२॥

स मुक्तोऽस्त्राग्नितापेन दुर्वासाः स्वस्तिमांस्ततः ।
प्रशशंस तमुर्वीशं युञ्जानः परमाशिषः ॥१३॥

स मुक्तः अस्त्र अग्नि तापेन दुर्वासाः स्वस्तिमान् ततः प्रशशंस तं उर्वी ईशं युञ्जानः परम आशिषः ॥१३॥

स दुर्वासाः	वे दुर्वासाजी	युञ्जानः	देते हुए
अस्त्र अग्नि	अस्त्रकी अग्निके	तं उर्वी ईशं	उन भूपति अम्बरीष की
तापेन मुक्तः	तापसे छूटकर	प्रशशंस	प्रशंसा करने लगे ॥१३॥
ततः	तब		
स्वस्तिमान्	स्वस्थ-चित्त होकर		
परम आशिषः	परम आशीर्वाद		

दुर्वासा उवाच

अहो अनन्तदासानां महत्वं दृष्टमद्य मे ।
कृतागसोऽपि यद् राजन् मङ्गलानि समीहसे ॥१४॥

अहो अनन्त दासानां महत्त्वं दृष्टं अद्य मे कृत आगसः अपि यत् राजन् मंगलानि सम ईहसे ॥१४॥

अहो राजन्	अहो, राजन् !	यत् आगसः	क्योंकि अपराध
अनन्त	भगवान्के	कृत अपि	करनेपर भी (मेरा)
दासानां	दासोंकी	मंगलानि	मंगल भली प्रकार
महत्त्वं अद्य	महिमा आज	सम ईहसे	चाहते हो ॥१४॥
मे दृष्टं	मैंने देखी,		

दुष्करः को नु साधूनां दुस्त्यजो वा महात्मनाम् ।
यैः संगृहीतो भगवान् सात्वतामृषभो हरिः ॥१५॥

दुष्करः कः नु साधूनां दुस्त्यजः वा महात्मनां यैः संगृहीतः भगवान् सात्वतां ऋषभः हरिः ॥१५॥

यैः	जिन्होंने	महात्मनां	महात्माओंके लिए
सात्वतां	भक्तोंके	नु कः दुष्करः	भला क्या कठिन कार्य है
ऋषभः	परमाराध्य		
हरिः	श्रीहरिको	वा दुस्त्यजः	अथवा क्या त्यागना कठिन है ॥१५॥
संगृहीतः	पकड़ लिया है, उन		
साधूनां	सत्पुरुष		

यन्नाम श्रुतिमात्रेण पुमान् भवति निर्मलः ।
तस्य तीर्थपदः किं वा दासानामवशिष्यते ॥१६॥

यत् नाम श्रुति मात्रेण पुमान् भवति निर्मलः तस्य तीर्थपदः किं वा दासानां अवशिष्यते ॥१६॥

यत् नाम	जिनका नाम	दासानां वा	दासोंके लिए भला
श्रुति मात्रेण	सुनने मात्रसे	किं	क्या
पुमान् निर्मलः	पुरुष निर्मल	अवशिष्यते	कर्तव्य शेष रहता है ॥१६॥
भवति	हो जाता है		
तस्य तीर्थपदः	उन पवित्र चरणके		

श्रीशुक उवाच*

राजन्ननुगृहीतोऽहं त्वयातिकरुणात्मना ।
मदघं पृष्ठतः कृत्वा प्राणा यन्मेऽभिरक्षिताः ॥१७॥

राजन् अनुगृहीतः अहं त्वया अति करुण आत्मना मत् अघं पृष्ठतः कृत्वा प्राणा यत् मे अभिरक्षिताः ॥१७॥

राजन्	राजन् !	पृष्ठतः कृत्वा	पीठ पीछे करके
अति करुण	अत्यन्त करुणामय	मे प्राणा	मेरे प्राणोंकी
आत्मना	स्वभावाले	अभिरक्षिताः	पूरी रक्षाः की है
त्वया यत्	आपने क्योंकि	अहं अनुगृहीतः	मैं उपकृत हुआ ॥१७॥
मत् अघं	मेरे अपराधको		

*यह उवाच अन्य प्रतियोंमें नहीं है ।

राजा तमकृताहारः प्रत्यागमनकाङ्क्षया ।
चरणावुपसंगृह्य प्रसाद्य समभोजयत् ॥१८॥

राजा तं अकृत आहारः प्रत्यागमन काङ्क्षया चरणाः उपसंगृह्य प्रसाद्य सम भोजयत् ॥१८॥

तं आहारः	उन भोजन	उपसंगृह्य	पकड़ कर
अकृत	किये बिनाके	प्रसाद्य	प्रसन्न करके
प्रत्यागमन	लौटनेकी	सम भोजयत्	भली प्रकार भोजन कराया ॥१८॥
काङ्क्षया	इच्छावाले		
राजा चरणाः	राजाने चरण		

सोऽशित्वाऽऽदृतमानीतमातिथ्यं सार्वकामिकम् ।
तृप्तात्मा नृपतिं प्राह भुज्यतामिति सादरम् ॥१९॥

सः अशित्वा आदृतं आनीतं आतिथ्यं सार्वकामिकं तृप्तात्मा नृपतिं प्राह भुज्यतां इति सादरम् ॥१९॥

आदृतं आनीतं	आदरपूर्वक लाये हुए	तृप्तात्मा	सन्तुष्ट चित्त होकर
सार्वकामिकं	सब कामनापूर्ण करनेवाले	नृपतिं सादरं	राजासे आदर पूर्वक
आतिथ्यं	अतिथि-सत्कारके अन्नको	इति प्राह	यह कहा
सः अशित्वा	उन दुर्वासाजी ने खाकर	भुज्यतां	आप भी भोजन करो ॥१९॥

दुर्वासा उवाच*

प्रीतोऽस्म्यनुगृहीतोऽस्मि तव भागवतस्य वै ।
दर्शनस्पर्शनालापैरातिथ्येनात्ममेधसा ॥२०॥

प्रीतः अस्मि अनुगृहीतः अस्मि तव भागवतस्य वै दर्शन स्पर्शन आलापैः आतिथ्येन आत्म मेधसा ॥२०॥

---

* यह उवाच अन्य प्रतियोंमें न होनेपर भी आगे 'श्रीशुक उवाच' होनेसे आवश्यक है ।

वै तव	निश्चय तुम जैसे	आतिथ्येन	अतिथि-सत्कारसे
भागवतस्य	भगवद्भक्तके	प्रीतः अस्मि	प्रसन्न हुआ और
दर्शन स्पर्श न	दर्शन, स्पर्श,	अनुगृहीतः	अनुगृहीत
आलापैः	बातचीत तथा	अस्मि	हूँ ॥२०॥
आत्म मेधसा	चित्त शुद्ध करने-वाले		

कर्मावदातमेतत् ते गायन्ति स्वःस्त्रियो मुहुः ।
कीर्तिं परमपुण्यां च कीर्तयिष्यति भूरियम् ॥२१॥

कर्म अवदातं एतत् ते गायन्ति स्वः स्त्रियः मुहुः कीर्तिं परम पुण्यां च कीर्तयिष्यति भूः इयम् ॥२१॥

ते एतत्	तुम्हारे इस	च परम	तथा परम
अवदातं कर्म	निर्मल कर्मको	पुण्यां	पवित्र (तुम्हारी)
स्वः स्त्रियः	स्वर्गीय देवियां	कीर्तिं इयं भूः	कीर्तिका यह पृथ्वी
मुहुः गायन्ति	बार-बार गायन करेंगी,	कीर्तयिष्यति	वर्णन करती रहेगी ॥२१॥

श्रीशुक उवाच

एवं संकीर्त्य राजानं दुर्वासाः परितोषितः ।
ययौ विहायसाऽऽमन्त्र्य ब्रह्मलोकमहैतुकम् ॥२२॥

एवं संकीर्त्य राजानं दुर्वासाः परितोषितः ययौ विहायसा आमन्त्र्य ब्रह्मलोकं अहैतुकम् ॥२२॥

परितोषितः	परम सन्तुष्ट हुए	अहैतुकं	निष्काम कर्मसे ही प्राप्त होनेवाले
दुर्वासाः एवं	दुर्वासाजी इस प्रकार	ब्रह्मलोकं	ब्रह्म लोक
राजानं	राजाकी	विहायसा ययौ	आकाश-मार्गसे चले गये ॥२२॥
संकीर्त्य	प्रशंसा करके		
आमन्त्र्य	उनसे अनुमति लेकर		

संवत्सरोऽत्यगात् तावद् यावता नागतो गतः ।
मुनिस्तद्दर्शनाकाङ्क्षो राजाऽभक्षो बभूव ह ॥२३॥

संवत्सरः अत्यगात् तावत् यावता न आगतः गतः मुनिः तत् दर्शन आकाङ्क्षः राजा अप् भक्षः बभूव ह ॥२३॥

यावता गतः	जब तक गये हुए	तत् दर्शन	उनके दर्शनकी
मुनिः	मुनि दुर्वासा	आकाङ्क्षः	इच्छासे
आगतः न	आ नहीं गये,	राजा ह	राजा निश्चय पूर्वक
तावत्	तब तक	अप् भक्षः	केवल जल पीकर
संवत्सरः	एक वर्ष	बभूव	रहे ॥२३॥
अत्यगात्	बीत गया,		

गते च दुर्वाससि सोऽम्बरीषो
द्विजोपयोगातिपवित्रमाहरत् ।
ऋषेर्विमोक्षं व्यसनं च बुद्ध्वा
मेने स्ववीर्यं च परानुभावम् ॥२४॥

गते च दुर्वाससि सः अम्बरीषः द्विज उपयोग अति पवित्रं आहरत् ऋषेः विमोक्षं व्यसनं च बुद्ध्वा मेने स्ववीर्यं च पर अनुभावम् ॥२४॥

दुर्वाससि	दुर्वासाजीके	ऋषेः व्यसनं	ऋषिके कष्ट
गते च	चले जानेपर	च विमोक्षं	तथा उससे छूटनेके
सः अम्बरीषः	उन अम्बरीषने	बुद्ध्वा	जानकर
द्विज	ब्राह्मणके	स्ववीर्यं च	अपने तेजको भी
उपयोग	उपयोगमें आये	पर	परम पुरुष ही का
अति पवित्रं	(बचे) अत्यन्त पवित्र	अनुभावं मेने	प्रभाव
आहरत्	(अन्नका) भोजन		माना ॥२४॥
	किया		

एवंविधानेकगुणः स राजा
परात्मनि ब्रह्मणि वासुदेवे ।

क्रियाकलापैः समुवाह भक्तिं
ययाऽऽविरिञ्च्यान् निरयांश्चकार ॥२५॥

एवं विधान् अनेक गुणः स राजा पर आत्मनि ब्रह्मणि वासुदेवे क्रिया कलापैः सम उवाह भक्तिं यया विरिञ्चात् निरयान् चकार ॥२५॥

एवं विधान्	इस प्रकारके	भक्तिं	भक्तिको
अनेक गुणः	अनेक गुणोंवाले	समुवाह	बढ़ाया
स राजा	उस राजाने	यया	जिससे
पर आत्मनि	परमात्मा	विरिञ्चात्	ब्रह्मलोकको भी
ब्रह्मणि	परम ब्रह्म	निरयान्	नरक
वासुदेवे	वासुदेवमें	चकार	समझने लगे ॥२५॥
क्रियाकलापैः	अपने कर्म कलापों द्वारा		

अथाम्बरीषस्तनयेषु राज्यं
समानशीलेषु विसृज्य धीरः ।
वनं विवेशात्मनि वासुदेवे
मनो दधद् ध्वस्तगुणप्रवाहः ॥२६॥

अथ अम्बरीषः तनयेषु राज्यं समान शीलेषु विसृज्य धीरः वनं विवेश आत्मनि वासुदेवे मनः दधत् ध्वस्त गुण प्रवाहः ॥२६॥

अथ धीरः	फिर धैर्यवान्	वासुदेवे	वहां भगवान वासुदेवमें
अम्बरीषः	अम्बरीषने	आत्मनि मनः	अपना चित्त
समान	समान	दधत्	लगाकर
शीलेषु	स्वभाववाले	गुण प्रवाहः	गुणोंके प्रवाहको
तनयेषु राज्यं	पुत्रोंको राज्य	ध्वस्त	नष्ट कर दिया (मुक्त हो गये) ॥२६॥
विसृज्य	सौंपकर		
वनं विवेश	वनमें प्रवेश किया		

इत्येतत् पुण्यमाख्यानमम्बरीषस्य भूपतेः ।
संकीर्तयन्ननुध्यायन् भक्तो भगवतो भवेत् ॥२७॥

इति एतत् पुण्यं आख्यानं अम्बरीषस्य भूपतेः संकीर्तयन् अनुध्यायन् भक्तः भगवतः भवेत् ॥२७॥

इति एतत्	इस प्रकारका यह	अनुध्यायन्	बार-बार चिन्तन करनेवाला
भूपतेः	राजा	भगवतः भक्तः	भगवानका भक्त
अम्बरीषस्य	अम्बरीषका	भवेत्	हो जाता है ॥२७॥
पुण्यं आख्यानं	पवित्र आख्यान		
संकीर्तयन	वर्णन करनेवाला तथा		

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे-अम्बरीषचरितं नाम पञ्चमोऽध्यायः ॥५॥

अथ षष्ठोऽध्यायः

श्रीशुक उवाच

विरूपः केतुमाञ्छम्भुरम्बरीषसुतास्त्रयः ।
विरूपात् पृषदश्वोऽभूत् तत्पुत्रस्तु रथीतरः ॥१॥

विरूपः केतुमान् शम्भुः अम्बरीष सुताः त्रयः विरूपात् पृषदश्वः अभूत् तत् पुत्रः तु रथीतरः ॥१॥

अम्बरीष	अम्बरीषके	विरूपात्	विरूपसे
त्रयः सुताः	तीन पुत्र थे,	पृषदश्वः	पृषदश्व
विरूपः	विरूप,	अभूत्	हुआ,
केतुमान्	केतुमान्	तत् पुत्रः तु	उसका पुत्र तो
शम्भुः	और शम्भु,	रथीतरः	रथीतर था ॥१॥

रथीतरस्याप्रजस्य भार्यायां तन्तवेऽर्थितः ।
अङ्गिरा जनयामास ब्रह्मवर्चस्विनः सुतान् ॥२॥

रथीतरस्य अप्रजस्य भार्यायां तन्तवे अर्थितः अङ्गिरा जनयामास ब्रह्म वर्चस्विनः सुतान् ॥२॥

अप्रजस्य	सन्तानहीन	अङ्गिरा	महर्षि अंगिराने
रथीतरस्य	रथीतरकी	ब्रह्म	ब्रह्म
भार्यायां	पत्नीसे	वर्चस्विनः	तेज सम्पन्न
तन्तवे	सन्तानके लिए	सुतान्	पुत्र
अर्थितः	प्रार्थना करनेपर	जनयामास	उत्पन्न किये ॥२॥

एते क्षेत्रे प्रसूता वै पुनस्त्वाङ्गिरसाः स्मृताः ।
रथीतराणां प्रवराः क्षत्रोपेता द्विजातयः ॥३॥

एते क्षेत्रे प्रसूता वै पुनः तु आङ्गिरसाः स्मृताः रथीतराणां प्रवराः क्षत्र उपेता द्विजातयः ॥३॥

एते	इस रथीतरकी	स्मृताः	कहलाये,
क्षेत्रे	भार्यासे	रथीतराणां	रथीतर वंशमें उत्पन्नोंमें
वै प्रसूता	निश्चय उत्पन्न हुए पर	प्रवराः	श्रेष्ठ
पुनः तु	फिर भी	क्षत्र उपेता	क्षत्रिय कर्मयुक्त
आंगिरसाः	अंगिरा गोत्रीय	द्विजातयः	ब्राह्मण हुए ॥३॥

क्षुवतस्तु मनोर्जज्ञे इक्ष्वाकुर्घ्राणतः सुतः ।
तस्य पुत्रशतज्येष्ठा विकुक्षिनिमिदण्डकाः ॥४॥

क्षुवतः तु मनोः जज्ञे इक्ष्वाकुः घ्राणतः सुतः तस्य पुत्रशत ज्येष्ठा विकुक्षिनिमि दण्डकाः ॥४॥

मनोः	मनुके	तस्य पुत्रशत	उनके सौ पुत्रोंमें
क्षुवतः तु	छींकते समय तो	विकुक्षिनिमि	विकुक्षि, निमि,
घ्राणतः	उनकी नासिकासे	दण्डकाः	दण्डक
इक्ष्वाकुः सुतः	इक्ष्वाकु नामका पुत्र	ज्येष्ठा	सबसे बड़े थे ॥४॥
जज्ञे	उत्पन्न हुआ		

तेषां पुरस्तादभवन्नार्यावर्ते नृपा नृप ।
पञ्चविंशतिः पश्चाच्च त्रयो मध्ये परेऽन्यतः ॥५॥

तेषां पुरस्तात् अभवन् आर्यावर्ते नृपा नृपा पञ्चविंशतिः पश्चात् च त्रयः मध्ये परे अन्यतः ॥५॥

नृप	राजन् !	च	भागके
तेषां	उनसे (छोटे)	त्रयः	(पूर्वोक्त) तीन
पञ्चविंशतिः	पच्चीस (पुत्र)	मध्ये	मध्य भागके
आर्यावर्ते	आर्यावर्तके	परे	शेष (सैंतालीस)
पुरस्तात्	पूर्वी भागके	अन्यतः	अन्य देशोंके
पश्चात्	(पच्चीस) पश्चिमी	नृपा अभवन्	राजा हुए ॥५॥

स एकदाष्टकाश्राद्धे इक्ष्वाकुः सुतमादिशत् ।
मांसमानीयतां मेध्यं विकुक्षे गच्छ माचिरम् ॥६॥

स एकदा अष्टका श्राद्धे इक्ष्वाकुः सुतं आदिशत् मासं आनीयतां मेध्यं विकुक्षे गच्छ मा चिरम् ॥६॥

एकदा स	एक बार उन	विकुक्षे	'विकुक्षि'
इक्ष्वाकुः	राजा इक्ष्वाकुने	मेध्यं मासं	पवित्र मांस
अष्टका श्राद्धे	अष्टका श्राद्धके समय	आनीयतां	ले आओ,
सुतं	(बड़े) पुत्रको	मा चिरं	देर मत करो' ॥६॥
आदिशत्	आदेश दिया		

तथेति स वनं गत्वा मृगान् हत्वा क्रियार्हणान् ।
श्रान्तो बुभुक्षितो वीरः शशं चाददपस्मृतिः ॥७॥

तथा इति स वनं गत्वा मृगान् हत्वा क्रिया अर्हणान् श्रान्तः बुभुक्षितः वीरः शशं च अदत् अपस्मृतिः ॥७॥

तथा इति	'अच्छा' इस प्रकार	अपस्मृतिः	स्मरण न रहनेसे
स वनं	(कहकर) उसने वनमें		(कि श्राद्धके लिए
गत्वा	जाकर		मारे पशुओंको नहीं
क्रिया अर्हणान्	श्राद्ध क्रियाके योग्य		खाना चाहिए)
मृगान् हत्वा	पशुओंको मारकर	शशं च	एक खरगोशको ही
वीरः श्रान्तः	वह वीर थक गया,	अदत्	खा लिया ॥७॥
बुभुक्षितः	भूखा होनेसे		

शेषं निवेदयामास पित्रे तेन च तद्गुरुः ।
चोदितः प्रोक्षणायाह दुष्टमेतदकर्मकम् ॥८॥

शेषं निवेदया मास पित्रे तेन च तत् गुरुः चोदितः प्रोक्षणाय आह दुष्टं एतत् अकर्मकम् ॥८॥

शेषं पित्रे	बचा हुआ पिताको
निवेदया मास	निवेदन कर दिया,
तेन च	उसीके द्वारा
प्रोक्षणाय	प्रोक्षण करनेके लिए
तत्	उन (इक्ष्वाकु) के द्वारा
गुरुः चोदितः	गुरुको प्रेरित करने-पर
आह एतत्	गुरुने कहा—'यह
अकर्मकं	श्राद्ध-कर्मके अयोग्य
दुष्टं	दूषित है ॥८॥

ज्ञात्वा पुत्रस्य तत् कर्म गुरुणाभिहितं नृपः ।
देशान्निःसारयामास सुतं त्यक्तविधिं रुषा ॥९॥

ज्ञात्वा पुत्रस्य तत् कर्म गुरुणा अभिहितं नृप देशात् निःसारयामास सुतं त्यक्तविधिं रुषा ॥९॥

गुरुणा	गुरु (वशिष्ठ) के
अभिहितं	बतलानेसे
तत् पुत्रस्य	वह पुत्रका
कर्म ज्ञात्वा	कर्म जानकर
नृपः रुषा	राजाने क्रोधवश
त्यक्तविधिं	शास्त्र विधिका त्याग करनेवाले
सुतं देशात्	पुत्रको अपने देशसे
निःसारयामास	निकाल दिया ॥९॥

स तु विप्रेण संवादं जापकेन समाचरन् ।
त्यक्त्वा कलेवरं योगी स तेनावाप यत् परम् ॥१०॥

स तु विप्रेण संवादं जापकेन समाचरन् त्यक्त्वा कलेवरं योगी स तेन अवाप यत् परम् ॥१०॥

स तु	और स्वयं उन्होंने तो
जापकेन	जप करनेवाले
विप्रेण	ब्राह्मणसे
संवादं	तत्व ज्ञानकी
समाचरन्	चर्चा करते हुए
स योगी	उन योगीने
कलेवरं	शरीर
त्यक्त्वा	त्यागकर
यत् परं	जो परम-तत्व है
तेन	उस सत्संग द्वारा
अवाप	उसे प्राप्त किया ॥१०॥

पितर्युपरतेऽभ्येत्य विकुक्षिः पृथिवीमिमाम् ।
शासदीजे हरिं यज्ञैः शशाद इति विश्रुतः ॥११॥

पितरि उपरते अभि एत्य विकुक्षिः पृथिवीं इमां शासत् ईजे हरिं यज्ञैः शशाद इति विश्रुतः ॥११॥

पितरि उपरते	पिताके शरीरान्तके बाद	इमां पृथिवीं	इस पृथ्वीका
		शासत्	शासन किया और
अभि एत्य	फिर लौटकर	यज्ञैः हरिं	यज्ञोंके द्वारा श्रीहरि की
शशाद इति	शशाद इस नामसे		
विश्रुतः	प्रसिद्ध	ईजे	आराधना की ॥११॥
विकुक्षिः	विकुक्षिने		

पुरञ्जयस्तस्य सुत इन्द्रवाह इतीरितः ।
ककुत्स्थ इति चाप्युक्तः शृणु नामानि कर्मभिः ॥१२॥

पुरञ्जयः तस्य सुतः इन्द्रवाह इति ईरितः ककुत्स्थ इति च अपि उक्तः शृणु नामानि कर्मभिः ॥१२॥

तस्य सुतः	उनके पुत्र	इति	इस नामसे
पुरञ्जयः	पुरञ्जय	अपि उक्तः	भी कहा गया
इन्द्रवाह इति	इन्द्रवाह इस नामसे	कर्मभिः	जिन कर्मोंसे
ईरितः	कहे गये	नामानि	ये नाम पड़े
च ककुत्स्थ	तथा ककुस्थ	शृणु	उन्हें सुनो ॥१२॥

कृतान्त आसीत् समरो देवानां सह दानवैः ।
पार्ष्णिग्राहो वृतो वीरो देवैर्दैत्यपराजितैः ॥१३॥

कृत अन्त आसीत् समरः देवानां सह दानवैः पार्ष्णिग्राहः वृतः वीरः देवैः दैत्य पराजितैः ॥१३॥

कृत अन्त	सतयुगके अन्तमें	पराजितैः	पराजित
देवानां	देवताओंका	देवैः	देवताओं द्वारा
दानवैः सह	दानवोंके साथ	वीरः	वीर पुरञ्जय
समरः आसीत्	युद्ध हुआ,	पार्ष्णिग्राहः	सहायक
दैत्य	(उसमें) दैत्योंसे	वृतः	चुना गया ॥१३॥

वचनाद् देवदेवस्य विष्णोर्विश्वात्मनः प्रभोः ।
वाहनत्वे वृतस्तस्य बभूवेन्द्रो महावृषः ॥१४॥

वचनात् देवदेवस्य विष्णोः विश्व आत्मनः प्रभोः वाहनत्वे वृतः तस्य बभूव इन्द्रः महावृषः ॥१४॥

तस्य वाहनत्वे	उनके वाहनके रूपमें	प्रभोः विष्णोः	सर्वेश्वर विष्णु भागवानके
वृतः इन्द्रः	चुने जानेपर इन्द्र	वचनात्	कहनेसे
देवदेवस्य	देवाधिदेव	महावृषः बभूव	महान् वृषभ बन गये ॥१४॥
विश्व आत्मनः	विश्वात्मा		

स संनद्धो धनुर्दिव्यमादाय विशिखाञ्छितान् ।
स्तूयमानः समारुह्य युयुत्सुः ककुदि स्थितः ॥१५॥

स सन्नद्धः धनुः दिव्यं आदाय विशिखान् सितान् स्तूयमानः समारुह्य युयुत्सुः ककुदि स्थितः ॥१५॥

स	तब वे	स्तूयमानः	स्तुत होते हुए
सन्नद्धः	(पुरंजय) कवच पहिन कर	युयुत्सुः	युद्ध करनेके लिए (उस महावृषभपर)
दिव्यं धनुः	दिव्य धनुष तथा	समारुह्य	चढ़कर
सितान्	तीक्ष्ण	ककुदि	(उसके) ककुत्पर
विशिखान्	वाण लेकर	स्थितः	बैठ गये ॥१५॥

तेजसाऽऽप्यायितो विष्णोः पुरुषस्य परात्मनः ।
प्रतीच्यां दिशि दैत्यानां न्यरुणत् त्रिदशैः पुरम् ॥१६॥

तेजसा आप्यायितः विष्णोः पुरुषस्य परात्मनः प्रतीच्यां दिशि दैत्यानां न्यरुणत् त्रिदशैः पुरम् ॥१६॥

परात्मनः	परमात्मा	त्रिदशैः	देवताओंके साथ
पुरुषस्य	परम पुरुष	प्रतीच्यां दिशि	पश्चिम दिशासे
विष्णोः	विष्णुके	दैत्यानां पुरं	दैत्योंके नगरको
तेजसा	तेजसे	न्यरुणत्	घेर लिया ॥१६॥
आप्यायितः	समृद्ध होकर		

तैस्तस्य चाभूत् प्रधनं तुमुलं लोमहर्षणम् ।
यमाय भल्लैरनयद् दैत्यान् येऽभिययुर्मृधे ॥१७॥

तैः तस्य च अभूत् प्रधनं तुमुलं लोमहर्षणं यमाय भल्लैः अनयत् दैत्यान् ये अभिययुः मृधे ॥१७॥

तस्य	उस (पुरञ्जय) का	मृधे ये	युद्धमें जो
तैः	उन (दैत्यों) के साथ	अभिययुः	सम्मुख आये
तुमुलं च	घोर तथा	दैत्यान् भल्लैः	उन दैत्योंको बाणोंसे
लोमहर्षणं	रोमाञ्चकारी	यमाय	यमराजके पास
प्रधनं अभूत्	युद्ध हुआ	अनयत्	पहुँचा दिया ॥१७॥

तस्येषुपाताभिमुखं युगान्ताग्निमिवोल्बणम् ।
विसृज्य दुद्रुवुर्दैत्या हन्यमानाः स्वमालयम् ॥१८॥

तस्य इषुपात अभिमुखं युगान्त अग्निं इव उल्बणं विसृज्य दुद्रुवुः दैत्या हन्यमानाः स्वं आलयम् ॥१८॥

युगान्त	प्रलय कालीन	हन्यमानाः	मारे जाते हुए
अग्निं	अग्निके	दैत्या स्वं	दैत्य अपने
इव उल्बणं	समान प्रचण्ड	आलयं	घर
तस्य इषुपात	उनकी बाण वर्षाके	विसृज्य दुद्रुवुः	छोड़कर भाग गये ॥१८॥
अभिमुखं	सामनेसे		

जित्वा पुरं धनं सर्वं सश्रीकं वज्रपाणये ।
प्रत्ययच्छत् स राजर्षिरिति नामभिराहृतः ॥१९॥

जित्वा पुरं धनं सर्वं सश्रीकं वज्रपाणये प्रत्ययच्छत् स राजर्षिः इति नामभिः आहृतः ॥१९॥

स राजर्षिः	उन राजर्षिने	वज्रपाणये	इन्द्रको
सश्रीकं	(दैत्योंकी) सम्पत्ति सहित	प्रत्ययच्छत्	लौटा दिया
		इति नामभिः	इस प्रकार उन नामों-से
पुरं सर्वं धनं	नगरी तथा सब धन		
जित्वा	जीतकर	आहृतः	कहे जाते हैं ॥१९॥

पुरञ्जयस्य पुत्रोऽभूदनेनास्तत्सुतः पृथुः ।
विश्वरन्धिस्ततश्चन्द्रो युवनाश्वश्च तत्सुतः ॥२०॥

पुरञ्जयस्य पुत्रः अभूत् अनेनाः तत् सुतः पृथुः विश्वरन्धिः ततः चन्द्रः युवनाश्वः च तत् सुतः ॥२०॥

पुरञ्जयस्य	पुरंजयका	विश्वरन्धिः	विश्वरन्धि
पुत्रः	पुत्र	ततः चन्द्रः	उससे चन्द्र
अनेनाः तत्	अनेना, उसका	च तत् सुतः	तथा उसका पुत्र
सुतः	पुत्र	युवनाश्वः	युवनाश्व
पृथुः	पृथु, उसका	अभूत्	हुआ ॥२०॥

शाबस्तस्तत्सुतो येन शाबस्ती निर्ममे पुरी ।
बृहदश्वस्तु शाबस्तिस्ततः कुवलयाश्वकः ॥२१॥

शाबः तत् सुतः येन शाबस्ती निर्ममे पुरी बृहदश्वः तु शाबस्तिः ततः कुवलयाश्वकः ॥२१॥

तत् सुतः	उसका पुत्र	बृहदश्वः तु	बृहदश्व था,
शाबः येन	शाव हुआ, जिसने	ततः	उससे
शाबस्ती पुरी	शावस्ती पुरीका	कुवलयाश्वकः	कुवलयाश्व हुआ ॥२१॥
निर्ममे	निर्माण किया,		
शाबस्तिः	शावस्तिका पुत्र तो		

यः प्रियार्थमुतङ्कस्य धुन्धुनामासुरं बली ।
सुतानामेकविंशत्या सहस्रैरहनद् वृतः ॥२२॥

यः प्रिय अर्थं उत्तङ्कस्य धुन्धुनाम असुरं बली सुतानां एक विंशत्या सहस्रैः अहनत् वृतः ॥२२॥

यः	जिसने	सुतानां वृतः	अपने पुत्रोंके साथ
उत्तङ्कस्य	उत्तङ्क ऋषिका	धुन्धुनाम	धुन्धु नामक
प्रिय अर्थं	प्रिय करनेके लिए	बली असुरं	बलवान असुरको
एक विंशत्या	इक्कीस	अहनत्	मारा था ॥२२॥
सहस्रैः	हजार		

धुन्धुमार: इति ख्यातस्तत्सुतास्ते च जज्वलु: ।
धुन्धोर्मुखाग्निना सर्वे त्रय एवावशेषिता: ॥२३॥

धुन्धुमार इति ख्यात: तत् सुता: ते च जज्वलु: धुन्धो: मुख अग्निना सर्वे त्रय एव अवशेषिता: ॥२३॥

इति	इसलिए	तत् ते सुता:	उनके वे पुत्र
धुन्धुमार	धुन्धुमार नामसे	च	भी
ख्यात:	प्रसिद्ध हुए	सर्वे जज्वलु:	सब जल गये
धुन्धो:	धुन्धुकी	त्रय एव	केवल तीन ही
मुख अग्निना	मुखसे निकली अग्नि-से	अवशेषिता:	बच रहे ॥२३॥

दृढाश्व: कपिलाश्वश्च भद्राश्व इति भारत ।
दृढाश्वपुत्रो हर्यश्वो निकुम्भस्तत्सुत: स्मृत: ॥२४॥

दृढाश्व: कपिलाश्व: च भद्राश्व इति भारत दृढाश्व पुत्र: हर्यश्व: निकुम्भ: तत् सुत: स्मृत: ॥२४॥

भारत	परीक्षित !	हर्यश्व:	हर्यश्व
दृढाश्व	दृढाश्व,	तत् सुत:	उसका पुत्र
कपिलाश्व:	कपिलाश्व,	निकुम्भ: स्मृत:	निकुम्भ कहा जाता है ॥२४॥
भद्राश्व इति	भद्राश्व इस प्रकार,		
दृढाश्व पुत्र:	दृढाश्वका पुत्र		

बर्हणाश्वो निकुम्भस्य कृशाश्वोऽथास्य सेनजित् ।
युवनाश्वोऽभवत् तस्य सोऽनपत्यो वनं गत: ॥२५॥

बर्हणाश्व: निकुम्भस्य कृशाश्व: अथ अस्य सेनजित् युवनाश्व: अभवत् तस्य स: अनपत्य: वनं गत: ॥२५॥

निकुम्भस्य	निकुम्भका पुत्र	अभवत्	हुआ
बर्हणाश्व:	बर्हणाश्व	स: अनपत्य:	वह सन्तानहीन होनेसे
कृशाश्व:	उसका कृशाश्व		
अथ अस्य	फिर इसका पुत्र	वनं गत:	वनमें चला गया ॥२५॥
सेनजित् तस्य	सेनजित्, उसका पुत्र		
युवनाश्व:	युवनाश्व		

भार्याशतेन निर्विण्ण ऋषयोऽस्य कृपालवः ।
इष्टिं स्म वर्तयाञ्चक्रु रैन्द्रीं ते सुसमाहिताः ॥२६॥

भार्या शतेन निर्विण्ण ऋषयः अस्य कृपालव इष्टिं स्म वर्तयान् चक्रुः ऐन्द्रीं ते सुसमाहिताः ॥२६॥

निर्विण्ण	खिन्न होकर	ऋषयः	ऋषियोंने
भार्या शतेन	सौ पत्नियोंके साथ (गया था)	सुसमाहिताः	अत्यन्त एकाग्र होकर
अस्य	इसपर	ते ऐन्द्रीं इष्टिं	उन्होंने इन्द्र यज्ञ
कृपालवः	वहां दयालु	वर्तयान् चक्रुः	करवाया ॥२६॥

राजा तद् यज्ञसदनं प्रविष्टो निशि तर्षितः ।
दृष्ट्वा शयानान् विप्रांस्तान् पपौ मन्त्रजलं स्वयम् ॥२७॥

राजा तत् यज्ञसदनं प्रविष्टः निशि तर्षितः दृष्ट्वा शयानान् विप्रान् तान् पपौ मन्त्रजलं स्वयम् ॥२७॥

निशि तर्षितः	रातमें प्यास लगनेपर	शयानान्	सोये हुए
राजा तत्	राजा उस	दृष्ट्वा	देखकर
यज्ञसदनं	यज्ञ-मण्डपमें		(कलशका)
प्रविष्टः	गये और	मन्त्र जलं	अभिमन्त्रित जल
तान् विप्रान्	उन ब्राह्मणोंको	स्वयं पपौ	स्वयं पीलिया ॥२७॥

उत्थितास्ते निशाम्याथ व्युदकं कलशं प्रभो ।
पप्रच्छुः कस्य कर्मेदं पीतं पुंसवनं जलम् ॥२८॥

उत्थिताः ते निशाम्य अथ व्युदकं कलशं प्रभो पप्रच्छुः कस्य कर्म इदं पीतं पुंसवनं जलम् ॥२८॥

प्रभो	राजन् !	इदं कस्य कर्म	यह किसका काम है कि
ते उत्थिताः	वे (ब्राह्मण जब) उठे	पुंसवनं	पुत्रोत्पत्तिके लिए अभिमंत्रित
अथ व्युदकं	तब जलरहित	जलं पीतं	जल पीलिया ॥२८॥
कलशं	कलश		
निशाम्य	देखकर		
पप्रच्छुः	पूछा		

राज्ञा पीतं विदित्वाथ ईश्वरप्रहितेन ते ।
ईश्वराय नमश्चक्रुरहो दैवबलं बलम् ॥२९॥

राज्ञा पीतं विदित्वा अथ ईश्वर प्रहितेन ते ईश्वराय नमः चक्रुः अहो दैवबलं बलम् ॥२९॥

ईश्वर	ईश्वरकी	नमः चक्रुः	नमस्कार किया (और बोले)
प्रहितेन	प्रेरणासे	अहो दैवबलं बलं	'अहो, दैव-बल ही मुख्य बल है ।' ॥२९॥
राज्ञा पीतं	राजाने पिया है		
अथ विदित्वा	तब यह जानकर		
ते	उन (मुनियों) ने		
ईश्वराय	ईश्वरको		

ततः काल उपावृत्ते कुक्षिं निर्भिद्य दक्षिणम् ।
युवनाश्वस्य तनयश्चक्रवर्ती जजान ह ॥३०॥

ततः काल उपावृत्ते कुक्षिं निर्भिद्य दक्षिणं युवनाश्वस्य तनयः चक्रवर्ती जजान ह ॥३०॥

ततः काल	तब समय	युवनाश्वस्य	युवनाश्वके
उपावृत्ते	आनेपर	ह चक्रवर्ती	निश्चय चक्रवर्ती
दक्षिणं कुक्षिं	दाहिनी कोख	तनयः जजान	पुत्र उत्पन्न हुआ ॥३०॥
निर्भिद्य	फाड़कर		

कं धास्यति कुमारोऽयं स्तन्यं रोरूयते भृशम् ।
मां धाता वत्स मा रोदीरितीन्द्रो देशिनीमदात् ॥३१॥

कं धास्यति कुमारः अयं स्तन्यं रोरूयते भृशं मां धाता वत्स मा रोदीः इति इन्द्रः देशिनीं अदात् ॥३१॥

अयं	(ऋषियोंने कहा) 'यह	वत्स मा रोदीः	बेटा, रोओ मत !'
कुमारः	कुमार	इति इन्द्रः	ऐसा कहकर इन्द्रने
कं धास्यति	किसका दूध पियेगा,	देशिनीं	तर्जनी अंगुली
स्तन्यं भृशं	दूध पीनेके लिए बहुत	अदात्	(उसके मुखमें) दे दी ॥३१॥
रोरूयते	रो रहा है ।'		
मां धाता	'मुझे पियेगा,		

न ममार पिता तस्य विप्रदेवप्रसादतः ।
युवनाश्वोऽथ तत्रैव तपसा सिद्धिमन्वगात् ॥३२॥

न ममार पिता तस्य विप्र देव प्रसादतः युवनाश्वः अथ तत्र एव तपसा सिद्धि अन्वगात् ॥३२॥

विप्र	ब्राह्मणों तथा
देव	देवताकी
प्रसादतः	कृपासे
तस्य पिता	उसका पिता
ममार न	मरा नहीं,
अथ युवनाश्वः	फिर युवनाश्वने
तत्र एव तपसा	वहीं तपस्या करके
सिद्धि	सिद्धि
अन्वगात्	प्राप्त कर ली ॥३२॥

त्रसद्दस्युरितीन्द्रोऽङ्ग विदधे नाम तस्य वै ।
यस्मात् त्रसन्ति ह्युद्विग्ना दस्यवो रावणादयः ॥३३॥

त्रसत् दस्युः इति इन्द्रः अङ्ग विदधे नाम तस्य वै यस्मात् त्रसन्ति हि उद्विग्ना दस्यवः रावण आदयः ॥३३॥

अङ्ग	प्रिय परीक्षित !
त्रसत् दस्यु इति	त्रसत दस्यु यह
वै तस्य नाम	निश्चय उनका नाम
इन्द्रः विदधे	इन्द्रने निश्चित किया
हि यस्मात्	क्योंकि जिससे
रावण आदयः	रावण आदि
दस्यवः	दस्यु
उद्विग्ना	उद्विग्न होकर
त्रसन्ति	डरते रहते थे ॥३३॥

यौवनाश्वोऽथ मान्धाता चक्रवर्त्यवनीं प्रभुः ।
सप्तद्वीपवतीमेकः शशासाच्युततेजसा ॥३४॥

यौवनाश्वः अथ मान्धाता चक्रवर्ति अवनीं प्रभुः सप्तद्वीपवतीं एकः शशास अच्युत तेजसा ॥३४॥

अथ	फिर
यौवनाश्वः	युवनाश्व कुमार
मान्धाता	मान्धाता
चक्रवर्ति प्रभुः	चक्रवर्ती नरेश होकर
अच्युत तेजसा	भगवानके तेजसे
सप्त द्वीपवतीं	सात द्वीपोंवाली
अवनीं एकः	पृथ्वीका अकेले ही
शशास	शासन करने लगे ॥३४॥

ईजे च यज्ञं क्रतुभिरात्मविद् भूरिदक्षिणैः ।
सर्वदेवमयं देवं सर्वात्मकमतीन्द्रियम् ॥३५॥

ईजे च यज्ञं क्रतुभिः आत्मवित् भूरिदक्षिणैः सर्वदेवमयं देवं सर्व आत्मकं अतीन्द्रियम् ॥३५॥

आत्मवित्	आत्मज्ञानी होकर भी	अतीन्द्रियं	इन्द्रियागीत
भूरिदक्षिणैः	बड़ी दक्षिणाओं वाले	देवं यज्ञं	देव यज्ञ पुरुषकी
क्रतुभिः	यज्ञों द्वारा	इजे च	आराधना भी की
सर्वदेवमयं	सर्वदेव स्वरूप		॥३५॥
सर्व आत्मकं	सर्व स्वरूप		

द्रव्यं मन्त्रो विधिर्यज्ञो यजमानस्तथर्त्विजः ।
धर्मो देशश्च कालश्च सर्वमेतद् यदात्मकम् ॥३६॥

द्रव्यं मन्त्रः विधिः यज्ञः यजमानः अथ ऋत्विजः धर्मः देशः च कालः च सर्वं एतत् यत् आत्मकम् ॥३६॥

द्रव्यं मन्त्रः	सामग्री, मन्त्र,	च कालः	तथा काल,
विधिः यज्ञः	विधि, यज्ञ,	एतत् सर्वं	यह सब
यजमानः	यजमान	यत् आत्मकं	जिन (भगवान्) का
अथ ऋत्विजः	तथा ऋत्विक् लोग,		स्वरूप है ॥३६॥
धर्मः च देशः	धर्म एवं देश,		

यावत् सूर्य उदेति स्म यावच्च प्रतितिष्ठति ।
सर्वं तद् यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥३७॥

यावत् सूर्य उदेति स्म यावत् च प्रतितिष्ठति सर्वं तत् यौवनाश्वस्य मान्धातुः क्षेत्रं उच्यते ॥३७॥

यावत् सूर्यं	जहाँसे सूर्य	तत् सर्वं	वह सब स्थान
उदेति स्म	उदय होता है	यौवनाश्वस्य	युवनाश्व नन्दन
च यावत्	तथा जहां	मान्धातुः क्षेत्रं	मान्धाताकी भूमि
प्रतितिष्ठति	अस्त होता है	उच्यते	कही जाती है ॥३७॥

शशबिन्दोर्दुहितरि बिन्दुमत्यामधान्नृपः ।
पुरुकुत्समम्बरीषं मुचुकुन्दं च योगिनम् ।
तेषां स्वसारः पञ्चाशत् सौभरिं वव्रिरे पतिम् ॥३८॥

शशबिन्दोः दुहितरि बिन्दुमत्यां अधात् नृपः पुरुकुत्सं अम्बरीषं मुचुकुन्दं च योगिनं तेषां स्वसारः पञ्चाशत् सौभरिं वव्रिरे पतिम् ॥३८॥

शशविन्दोः	शशविन्दुकी	मुचुकुन्दं	मुचुकुन्दको
दुहितरि	पुत्री	अधात्	उत्पन्न किया
बिन्दुमत्यां	विन्दुमतीसे	तेषां पञ्चाशत्	उनकी पचास
नृपः	राजा मान्धाताने	स्वसारः	बहिनोंने
पुरुकुत्सं	पुरुकुत्स,	सौभरिं	सौभरि ऋषिको
अम्बरीषं च	अम्बरीष तथा	पतिं वव्रिरे	पति वरण किया
योगिनं	योगी		॥३८॥

यमुनान्तर्जले मग्नस्तप्यमानः परंतपः ।
निर्वृतिं मीनराजस्य वीक्ष्य मैथुनधर्मिणः ॥३९॥

यमुना अन्तः जले मग्नः तप्यमानः परंतपः निर्वृतिं मीनराजस्य वीक्ष्य मैथुनधर्मिणः ॥३९॥

परंतपः	परम तपस्वी सौभरि	मैथुनधर्मिणः	मैथुनधर्मा
यमुना	यमुनाके	मीनराजस्य	मत्स्यराजको
अन्तः	भीतर	निर्वृतिं वीक्ष्य	आनन्द देखकर
जले मग्नः	जलमें डूबकर		॥३९॥
तप्यमानः	तपस्या करते हुए		

जातस्पृहो नृपं विप्रः कन्यामेकामयाचत ।
सोऽप्याह गृह्यतां ब्रह्मन् कामं कन्या स्वयंवरे ॥४०॥

जातस्पृहः नृपं विप्रः कन्यां एकां अयाचत सः अपि आह गृह्यतां ब्रह्मन् कामं कन्या स्वयंवरे ॥४०॥

जातस्पृहः	(विवाह करनेकी) इच्छा उत्पन्न होनेसे	सः अपि आह	उन (राजा) ने भी कहा
विप्रः	उन ब्राह्मणने	ब्रह्मन्	ब्रह्मन !
नृपं	राजा मान्धातासे	स्वयंवरे	स्वयंवरमें
एकां कन्यां	एक कन्या	कामं कन्या	इच्छानुसार कन्या
अयाचत	मांगी,	गृह्यतां	ले सकते हैं ॥४०॥

स विचिन्त्याप्रियं स्त्रीणां जरठोऽयमसंमतः ।
वलीपलित एजत्क इत्यहं प्रत्युदाहृतः ॥४१॥

स विचिन्त्य अप्रियं स्त्रीणां जरठः अयं असंमतः वली पलित एजत् क इति अहं प्रति उदाहृतः ॥४१॥

स विचिन्त्य	उन (ऋषि) ने सोचा	पलित	केश पक गये हैं,
अयं जरठः	'यह बुड्ढा	एजत् क	सिर हिलता है,
स्त्रीणां अप्रियं	स्त्रियोंको अप्रिय	इति अहं	यह समझकर मुझे
असंमतः	अरुचिकर हैं,	प्रति उदाहृतः	अस्वीकार किया
वली	झुर्रियां पड़ी हैं,		गया है।' ॥४१॥

साधयिष्ये तथाऽऽत्मानं सुरस्त्रीणामपीप्सितम् ।
किं पुनर्मनुजेन्द्राणामिति व्यवसितः प्रभुः ॥४२॥

साधयिष्ये तथा आत्मानं सुरस्त्रीणां अपि ईप्सितं किं पुनः मनुज इन्द्राणां इति व्यवसितः प्रभुः ॥४२॥

आत्मानं तथा साधयिष्ये	अपने शरीरको वैसा बनाऊँगा कि	मनुज इन्द्राणां	राजाओंकी कन्याओं-को
सुरस्त्रीणां	देवाङ्गनाओं	किं	क्या बात !
अपि ईप्सितं	को भी अभीष्ट हो,	इति प्रभुः	ऐसा सोचकर उन समर्थने
पुनः	फिर	व्यवसितः	वैसा ही किया ॥४२॥

मुनिः प्रवेशितः क्षत्त्रा कन्यान्तः पुरमृद्धिमत् ।
वृतश्च राजकन्याभिरेकः पञ्चाशता वरः ॥४३॥

मुनिः प्रवेशितः क्षत्त्रा कन्या अन्तः पुरं ऋद्धिमत् वृतः च राजकन्याभिः एकः पञ्चाशता वरः ॥४३॥

क्षत्त्रा मुनिः	रक्षकोंने मुनिको	पञ्चाशता	पचासों
ऋद्धिमत्	सम्पन्न	राजकन्याभिः	राजकन्याओं द्वारा
कन्या	कन्याओंके	एकः वरः	वे अकेले वर
अन्तः पुरं	अन्तःपुरमें	वृतः च	वरण कर लिए गये
प्रवेशितः	प्रवेश कराया		॥४३॥

तासां कलिरभूद् भूयांस्तदर्थेऽपोह्य सौहृदम् ।
ममानुरूपो नायं व इति तद्गतचेतसाम् ॥४४॥

तासां कलिः अभूत् भूयान् तत् अर्थे अपोह्य सौहृदं मम अनुरूपः न अयं व इति तत् गत चेतसाम् ॥४४॥

सौहृदं अपोह्य	सौहार्द्र त्यागकर	अयं मम	'ये मेरे
तत् गत चेतसां	उनमें लगे चित्तवाली	अनुरूपः	अनुरूप हैं'
तासां भूयान्	उन सबोंमें बहुत	व न	'तुम्हारे योग्य नहीं'
कलिः अभूत्	झगड़ा होने लगा	इति	इस प्रकार ॥४४॥

स बहृवृचस्ताभिरपारणीय-
तपः श्रियानर्घ्यपरिच्छदेषु ।
गृहेषु नानोपवनामलाम्भः-
सरस्सु सौगन्धिककाननेषु ॥४५॥

स बहृवृचः ताभिः अपारणीय तपः श्रिया अनर्घ्य परिच्छदेषु गृहेषु नाना उपवन अमल अम्भः सरः सु सौगन्धिक काननेषु ॥४५॥

स	वे ऋग्वेदी	श्रिया	प्रभावसे
बहृवृचः	ब्राह्मण सौभरि	अनर्घ्य	बहुमूल्य
अपारणीय तपः	अपने अपार तपके	परिच्छदेषु	सामग्री युक्त

गृहेषु	घरोंमें	सौगन्धिक	सुगन्धि युक्त
नाना उपवन	अनेक उपवनों,	कानतेषु ताभिः	वनोंमें उनके साथ
अमल अम्भः	निर्मल जलके		॥४५॥
सरः सु	सरोवरोंमें,		

महार्हशय्यासनवस्त्रभूषण-
स्नानानुलेपाभ्यवहारमाल्यकैः ।
स्वलङ्कृतस्त्रीपुरुषेषु नित्यदा
रेमेऽनुगायद्द्विजभृङ्गवन्दिषु ॥४६॥

महा अर्ह शय्या आसन वस्त्र भूषण स्नान अनुलेप अभ्यवहार माल्यकैः स्वलंकृतः स्त्री पुरुषेषु नित्यदा रेमे अनुगायत् द्विजभृंग वन्दिषु ॥४६॥

महा अर्ह	महामूल्यवान	स्वलंकृतः	स्वयं अलंकृत रहने-
शय्या	शय्या		वाले
आसन वस्त्र	आसन, वस्त्र	स्त्री-पुरुषेष	स्त्री-पुरुषोंसे युक्त
भूषण	आभूषण,	द्विजभृंग	पक्षी और भ्रमर
स्नान अनुलेप	स्नान, अंगराग		रूपी
अभ्यवहार	आहार,	वन्दिषु	बन्दीजनोंके
माल्यकैः	मालाओंसे	अनुगायत	कूजनसे मंडित
	(सुशोभित)	रेमे	विहार करते रहे
नित्यदा	सदा		॥४६॥

यद्गार्हस्थ्यं तु संवीक्ष्य सप्तद्वीपवतीपतिः ।
विस्मितः स्तम्भमजहात् सार्वभौमश्रियान्वितम् ॥४७॥

यत् गार्हस्थ्यं तु संवीक्ष्य सप्तद्वीपवती पतिः विस्मितः स्तम्भं अजहात् सार्वभौम श्रिया अन्वितः ॥४७॥

सार्वभौम श्रिया	चक्रवर्तित्वकी लक्ष्मी-	सप्तद्वीपवती	सातों द्वीपों वाली
	से	पतिः	पृथ्वीके स्वामीने
अन्वितः	युक्त		

यत् गार्हस्थ्यं तु	जिनके गृहस्थ सुखको तो	विस्मितः	चकित होकर
संवीक्ष्य	देखकर	स्तम्भं	अपना गर्व
		अजहात्	त्याग दिया ॥४७॥

एवं गृहेष्वभिरतो विषयान् विविधैः सुखैः ।
सेवमानो न चातुष्यदाज्यस्तोकैरिवानलः ॥४८॥

एवं गृहेषु अभिरतः विषयान् विविधैः सुखैः सेवमानः न च अतुष्यत् आज्यः तोकैः इव अनलः ॥४८॥

एवं	इस प्रकार	सुखैः सेवमानः	सुख पूर्वक सेवन करते हुए
गृहेषु	गृहस्थ-धर्ममें	आज्यः तोकैः	घृतकी बूँदोंसे
अभिरतः	आसक्त होकर	अनलः इव	अग्निके समान
विविधैः	अनेक प्रकारके	अतुष्यत् न च	सन्तुष्ट नहीं ही हुए ॥४८॥
विषयान्	भोगोंको		

स कदाचिदुपासीन आत्मापह्नवमात्मनः ।
ददर्श बह्वृचाचार्यो मीनसङ्गसमुत्थितम् ॥४९॥

स कदाचित् उपासीन आत्मा अपह्नवं आत्मनः ददर्श बह्वृच आचार्यः मीनसंग समुत्थितम् ॥४९॥

स बह्वृच	उन ऋग्वेदी	समुत्थितं	उठ खड़े हुए
आचार्यः	आचार्यने	आत्मनः	अपने
कदाचित्	किसी समय	आत्मा अपह्नवं	चित्तके ठगे जानेको
उपासीन	स्वस्थ बैठे हुए,	ददर्श	देखा ॥४९॥
मीनसंग	मछलियोंके साथसे		

अहो इमं पश्यत मे विनाशं
तपस्विनः सच्चरितव्रतस्य ।
अन्तर्जले वारिचरप्रसङ्गात्
प्रच्यावितं ब्रह्म चिरं धृतं यत् ॥५०॥

अहो इमं पश्यत मे विनाशं तपस्विनः सत् चरित व्रतस्य अन्तः जले वारिचर प्रसंगात् प्रच्यावितं ब्रह्म चिरं धृतं यत् ॥५०॥

अहो मे	अरे, मुझ	धृतं	धारण किया
तपस्विनः	तपस्वी,	ब्रह्म	ब्रह्मचर्य
सत् चरित	सच्चरित्र,	अन्तः जले	पानीके भीतर
व्रतस्य	व्रतनिष्ठका	वारिचर	जल जीवोंके
इमं विनाशं	यह पतन	प्रसंगात्	साथसे
पश्यत यत्	देखो, क्योंकि	प्रच्यावितं	मैंने स्खलित कर
चिरं	बहुत समयका		दिया ॥५०॥

सङ्गं त्यजेत मिथुनव्रतिनां मुमुक्षुः
सर्वात्मना न विसृजेद् बहिरिन्द्रियाणि ।
एकश्चरन् रहसि चित्तमनन्त ईशे
युञ्जीत तद्व्रतिषु साधुषु चेत् प्रसंगः ॥५१॥

संग त्यजेत मिथुन व्रतिनां मुमुक्षुः सर्वं आत्मना न विसृजेत् बहिः इन्द्रियाणि एकः चरन् रहसि चित्तं अनन्त ईशे युञ्जीत तत् व्रतिषु साधुषु चेत् प्रसंगः ॥५१॥

मुमुक्षुः	मुक्त होनेका इच्छुक	चरन्	रहते हुए
मिथुन	जोड़ा बनाकर	अनन्त ईशे	अनन्त ईश्वरमें
व्रतिनां	रहनेवालों का	चित्तं युञ्जीत	चित्त लगाता रहे,
संग त्यजेत्	साथ त्याग दे,	चेत् प्रसंगः	यदि साथ करना ही
सर्व आत्मना	सब प्रकार से		हो तो
इन्द्रियाणि	अपनी इन्द्रियोंको	तत्	उन भगवानमें
बहिः न	बाहर न	व्रतिषु	निष्ठावाले
विसृजेत्	छोड़े.	साधुषु	सत्पुरुषोंका करे
रहसि एकः	एकान्तमें अकेले		॥५१॥

एकस्तपस्व्यहमथाम्भसि मत्स्यसंगात्
पञ्चाशदासमुत पञ्चसहस्रसर्गः ।

नान्तं व्रजाम्युभयकृत्यमनोरथानां
मायागुणैर्हृतमतिर्विषयेऽर्थभावः ॥५२॥

एकः तपसि अहं अथ अम्भसि मत्स्य संगात् पञ्चाशत आसं उत पञ्च सहस्र सर्गः न अन्तं व्रजामि उभय कृत्य मनोरथानां माया गुणैः हृत मतिः विषये अर्थ भावः ॥५२॥

अहं एकः	मैं अकेला	अर्थ भावः	सत्यत्व बुद्धि हो गया
तपसि	तपस्वी था,	माया गुणैः	अतः मायाके गुणोंसे
अथ अम्भसि	फिर जलमें	हृत मतिः	बुद्धि हरण होनेसे
मत्स्य संगात्	मछलियोंके साथसे	उभय	दोनों (लौकिक-पार लौकिक)
पञ्चाशत	(पति रूपमें) पचास	कृत्य	करणीय
आसं	हो गया	मनोरथानां	कामनाओंका
उत सर्गः	फिर सन्तान रूपसे	अन्तं न व्रजामि	पार नहीं पाता हूँ ॥५२॥
पञ्च सहस्र	पांच हजार हो गया,		
विषये	अब विषयोंमें		

एवं वसन् गृहे कालं विरक्तो न्यासमास्थितः ।
वनं जगामानुययुस्तत्पत्न्यः पतिदेवताः ॥५३॥

एवं वसन् गृहे कालं विरक्तः न्यासं आस्थितः वनं जगाम अनुययुः तत् पत्न्यः पतिदेवताः ॥५३॥

एवं गृहे	इस प्रकार घरमें	वनं जगाम	वन चले गये'
वसन्	रहते हुए	पतिदेवताः	पतिको आराध्या माननेवाला
कालं	कुछ समयमें	तत् पत्न्यः	उनकी पत्नियां
विरक्तः	विरक्त होकर	अनुययुः	उनके पीछे गयीं ॥५३॥
न्यासं	संन्यास		
आस्थितः	स्वीकार करके		

तत्र तप्त्वा तपस्तीक्ष्णमात्मकर्शनमात्मवान् ।
सहैवाग्निभिरात्मानं युयोज परमात्मनि ॥५४॥

तत्र तप्त्वा तपः तीक्ष्णं आत्मकर्शनं आत्मवान् सह एव अग्निभिः आत्मानं युयोज परमात्मनि ॥५४॥

आत्मवान्	उन धैर्यशालीने	अग्निभिः	आवहनीय अग्निके
तत्र	वहां	सह एव	साथ ही
आत्मकर्शनं	शरीरको कृश करने वाला	आत्मानं	अपनेको
		परमात्मनि	परमात्मामें
तीक्ष्णं तपः	उग्रतप	युयोज	लगा दिया ॥५४॥
तप्त्वा	करके		

ताः स्वपत्युर्महाराज निरीक्ष्याध्यात्मिकीं गतिम् ।
अन्वीयुस्तत्प्रभावेण अग्निं शान्तमिवार्चिषः ॥५५॥

ताः स्वपत्युः महाराज निरीक्ष्य आध्यात्मिकीं गतिं अनु ईयुः तत् प्रभावेण अग्निं शान्तं इव अर्चिषा ॥५५॥

महाराज	महाराज !	तत् प्रभावेण	उनके प्रभावसे
ताः	वे (उनकी पत्नियां)	शान्तं अर्चिषा	ज्योति शान्त हुए
स्वपत्युः	अपने पतिकी	अग्निं इव	अग्निके समान
आध्यात्मिकीं	अध्यात्मिक	अनु ईयुः	अनुगामिनी हुईं ॥५५॥
गतिं निरीक्ष्य	गति देखकर		

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे सौभर्याख्याने षष्ठोऽध्यायः ॥६॥

अथ सप्तमोऽध्यायः

श्रीशुक उवाच—

मान्धातुः पुत्रप्रवरो योऽम्बरीषः प्रकीर्तितः ।
पितामहेन प्रवृतो यौवनाश्वश्च तत्सुतः ।
हारीतस्तस्य पुत्रोऽभून्मान्धातृप्रवरा इमे ॥१॥

मान्धातुः पुत्रप्रवरः यः अम्बरीषः प्रकीर्तितः पितामहेन प्रवृत्तः यौवनाश्वः च तत् सुतः हारीतः तस्य पुत्रः अभूत् मान्धातृ प्रवरा इमे ॥१॥

मान्धातुः	मान्धाताका	च यौवनाश्वः	तथा यौवनाश्व
यः पुत्रप्रवरः	जो ज्येष्ठ पुत्र	तत् सुतः	उसका पुत्र हुआ,
अम्बरीषः	अम्बरीष	तस्य पुत्रः	उसका पुत्र
प्रकीर्तितः	कहा गया है,	हारीतः अभूत	हारीत हुआ
पितामहेन	अपने पितामह द्वारा	इमे	ये तीनों
प्रवृत्तः	(पुत्र रूपसे) स्वीकार किया गया था	मान्धातृ प्रवरा	मान्धातृ प्रवर* हुए ॥१॥

नर्मदा भ्रातृभिर्दत्ता पुरुकुत्साय योरगैः ।
तया रसातलं नीतो भुजगेन्द्रप्रयुक्तया ॥२॥

नर्मदा भ्रातृभिः दत्ता पुरुकुत्साय यः उरगैः तया रसातलं नीतः भुजगेन्द्र प्रयुक्तया ॥२॥

भुजगेन्द्र	नागराज द्वारा	उरगैः	नागों द्वारा
प्रयुक्तया	प्रेरित	पुरुकुत्साय	पुरुकुत्सको
यः भ्रातृभिः	जो अपने भाई	दत्ता	विवाह दी गयी

* अवान्तर गोत्र प्रवर्तक

नर्मदा	नर्मदा थी	रसातलं नीतः	रसातल ले जाया
तया	उसके द्वारा (पुरुकुत्स)		गया ॥२॥

गन्धर्वानवधीत् तत्र वध्यान् वै विष्णुशक्तिधृक् ।
नागाल्लब्धवरः सर्पादभयं स्मरतामिदम् ॥३॥

गन्धर्वान् अवधीत् तत्र वध्यान् वै विष्णु शक्ति धृक् नागात् लब्धवरः सर्पात् अभयं स्मरतां इदम् ॥३॥

विष्णु	भगवान् विष्णुकी	नागात्	नागराजसे
शक्ति	शक्ति	लब्धवरः	यह वरदान पाया
धृक् तत्र	धारण करके वहां	इदं	'इस आख्यानको
वै वध्यान्	निश्चय मार देने योग्य	स्मरतां	स्मरण करने वालेको
		सर्पात् अभयं	सर्पोंसे भय न हो' ॥३॥
गन्धर्वान्	गन्धर्वोंको		
अवधीत्	मार दिया		

त्रसद्दस्युः पौरुकुत्सो योऽनरण्यस्य देहकृत् ।
हर्यश्वस्तत्सुतस्तस्मादरुणोऽथ त्रिबन्धनः ॥४॥

त्रसद्दस्युः पौरुकुत्सः यः अनरण्यस्य देहकृत् हर्यश्वः तत् सुतः तस्मात् अरुणः अथ त्रिबन्धनः ॥४॥

पौरुकुत्सः	पुरुकुत्सका पुत्र	तत् सुतः	उस (अनरण्य) का पुत्र
त्रसद्दस्युः	त्रसद्दस्यु हुआ	हर्यश्वः	हर्यश्व हुआ
यः अनरण्यस्य	जो अनरण्यको	तस्मात्	उससे
देहकृत्	शरीर देनेवाला पिता हुआ	अरुणः अथ	अरुण और उससे
		त्रिबन्धनः	त्रिबन्धन हुआ ॥४॥

तस्य सत्यव्रतः पुत्रस्त्रिशङ्कुरिति विश्रुतः ।
प्राप्तश्चाण्डालतां शापाद् गुरोः कौशिकतेजसा ॥५॥

तस्य सत्यव्रतः पुत्रः त्रिशंकुः इति विश्रुतः प्राप्तः चाण्डालतां शापात् गुरोः कौशिक तेजसा ॥५॥

तस्य	उस (त्रिबन्धन) का	शापात्	शापसे
पुत्रः	पुत्र	चाण्डालतां	चाण्डालता
सत्यव्रतः	सत्यव्रत	प्राप्तः	प्राप्त हो गया,
त्रिशङ्कु इति	त्रिशंकु इस नामसे	कौशिक	फिर विश्वामित्रके
विश्रुतः	प्रसिद्ध है	तेजसा	तेजसे ॥५॥
गुरोः	गुरु (वशिष्ट) के		

सशरीरो गतः स्वर्गमद्यापि दिवि दृश्यते ।
पातितोऽवाक्शिरा देवैस्तेनैव स्तम्भितो बलात् ॥६॥

सशरीरः गतः स्वर्गं अद्य अपि दिवि दृश्यते पातितः अवाक् शिरा देवैः तेन एव स्तम्भितः बलात् ॥६॥

सशरीरः	इसी शरीरसे	बलात्	बल पूर्वक
स्वर्गं गतः	स्वर्ग गया,	स्तम्भितः	रोक दिया
देवैः	देवताओंने	अद्य अपि	आज भी (वह)
अवाक् शिरा	नीचे सिर करके	दिवि दृश्यते	आकाशमें दीखता है ॥६॥
पातितः	गिरा दिया		
तेन एव	उन्होंने (विश्वामित्र-ने) ही		

त्रैशङ्कवो हरिश्चन्द्रो विश्वामित्रवसिष्ठयोः ।
यन्निमित्तमभूद् युद्धं पक्षिणोर्बहुवार्षिकम् ॥७॥

त्रैशङ्कवः हरिश्चन्द्रः विश्वामित्र वसिष्ठयोः यत् निमित्तं अभूत् युद्धं पक्षिणोः बहुवार्षिकम् ॥७॥

त्रैशङ्कवः	त्रिशंकुका पुत्र	विश्वामित्र	विश्वामित्र और
हरिश्चन्द्रः	हरिश्चन्द्र हुआ	वसिष्ठयोः	वसिष्ठजीका
यत् निमित्तं	जिसके कारण	बहुवार्षिकं	बहुत वर्षों तक
पक्षिणोः	पक्षी बने	युद्धं अभूत्	युद्ध होता रहा ॥७॥

सोऽनपत्यो विषण्णात्मा नारदस्योपदेशतः ।
वरुणं शरणं यातः पुत्रो मे जायतां प्रभो ॥८॥

सः अनपत्यः विषण्ण आत्मा नारदस्य उपदेशतः वरुणं शरणं यातः पुत्रः मे जायतां प्रभो ॥८॥

सः अनपत्यः	वह सन्तानहीन होनेसे	**वरुणं शरणं यातः**	वरुणकी शरणमें जाकर बोला—
विषण्ण आत्मा	खिन्न चित्त था,	**प्रभो मे पुत्रः**	प्रभो ! मेरे पुत्र
नारदस्य उपदेशतः	नारदजीके उपदेशसे	**जायतां**	उत्पन्न हो ॥८॥

यदि वीरो महाराज तेनैव त्वां यजे इति ।
तथेति वरुणेनास्य पुत्रो जातस्तु रोहितः ॥९॥

यदि वीरः महाराज तेन एव त्वां यजे इति तथा इति वरुणेन अस्य पुत्रः जातः तु रोहितः ॥९॥

महाराज	महाराज !	**वरुणेन तथा**	वरुण ने 'तथास्तु'
यदि वीरः	यदि वीर (पुरुष) हुआ तो	**इति**	कहा
तेन एव त्वां	उसीके द्वारा आपका	**अस्य पुत्रः**	इससे उसका पुत्र
यजे इति	यजन करूँगा' ऐसा कहनेपर	**रोहितः**	रोहित
		जातः तु	उत्पन्न तो हो गया ॥९॥

जातः सुतो ह्यनेनाङ्ग मां यजस्वेति सोऽब्रवीत् ।
यदा पशुर्निर्दशः स्यादथ मेध्यो भवेदिति ॥१०॥

जातः सुतः हि अनेन अंग मां यजस्व इति सः अब्रवीत् यदा पशुः निर्दशः स्यात् अथ मेध्यः भवेत् इति ॥१०॥

हि सुतः जातः	'क्योंकि पुत्र उत्पन्न हो गया	**मां यजस्व इति**	मेरा यजन करो' ऐसा (वरुणने कहा)
अंग अनेन	प्रिय ! इसके द्वारा	**सः**	तब उस

अब्रवीत्	हरिश्चन्द्रने ऐसा कहा—	निर्दशः स्यात्	दस दिनका हो जायगा
यदा पशुः	'जब पशु	अथ मेध्यः भवेत्	तब पवित्र हो गया' ॥१०॥

निर्दशे च स आगत्य यजस्वेत्याह सोऽब्रवीत् ।
दन्ताः पशोर्यज्जायेरन्नथ मेध्यो भवेदिति ॥११॥

निर्दशे च स आगत्य यजस्व आह इति सः अब्रवीत् दन्ताः पशोः यत् जायेरन् अथ मेध्यः भवेत् इति ॥११॥

निर्दशे च	दस दिनका हो जाने-पर	इति अब्रवीत्	इस प्रकार बोला—
स आगत्य	वे (वरुण) आकर	यत् पशोः	जब पशुके
इति आह	यह बोले—	दन्ताः जायेरन्	दांत उत्पन्न होंगे
यजस्व	'अब यजन करो'	अथ	तब
सः	वह	मेध्यः भवेत्	पवित्र होगा' ॥११॥

जाता दन्ता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् ।
यदा पतन्त्यस्य दन्ता अथ मेध्यो भवेदिति ॥१२॥

जाता दन्ता यजस्व इति स प्रति आह अथ सः अब्रवीत् यदा पतन्ति अस्य दन्ता अथ मेध्यः भवेत् इति ॥१२॥

जाता दन्ता	दांत उत्पन्न होनेपर	अब्रवीत्	बोला—
स प्रति	उन (वरुण) ने फिर	यदा अस्य	जब इसके
आह	कहा	दन्ता	दांत
यजस्व इति	'अब यजन करो।'	पतन्ति अथ	गिर जायँगे तब
अथ सः इति	फिर वह इस प्रकार	मेध्यः भवेत्	पवित्र होगा' ॥१२॥

पशोर्निपतिता दन्ता यजस्वेत्याह सोऽब्रवीत् ।
यदा पशोः पुनर्दन्ता जायन्तेऽथ पशुः शुचिः ॥१३॥

पशोः निपतिता दन्ता यजस्व इति आह सः अब्रवीत् यदा पशोः पुनः दन्ता जायन्ते अथ पशुः शुचिः ।।१३।।

पशोः दन्ता	पशुके दांत	यदा पशोः	'जब पशुके
निपतिता	गिर जानेपर	पुनः दन्ता	फिर दांत आ जायँगे
यजस्व	'यजन करो'	अथ पशुः	तब पशु
इति आह	ऐसा कहा तो	शुचिः	पवित्र होगा' ।।१३।।
सः अब्रवीत्	वह बोला—		

पुनर्जाता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् ।
सान्नाहिको यदा राजन् राजन्योऽथ पशुः शुचिः ।।१४।।

पुनः जाता यजस्व इति स प्रति आह अथ सः अब्रवीत् सान्नाहिकः यदा राजन् राजन्यः अथ पशुः शुचिः ।।१४।।

पुनः जाता	फिर दांत निकल आनेपर	राजन् यदा	'राजन् जब
		सान्नाहिकः	कवच धारण करने योग्य हो
स प्रति	उन राजासे		
इति आह	यह (वरुणने) कहा—	अथ राजन्यः	तब राज पुरुष-रूप
यजस्व	'यजन करो ।'	पशुः शुचिः	पशु पवित्र होता
सः अब्रवीत्	वह बोला		है' ।।१४।।

इति पुत्रानुरागेण स्नेहयन्त्रितचेतसा ।
कालं वञ्चयता तं तमुक्तो देवस्तमैक्षत ।।१५।।

इति पुत्र अनुरागेण स्नेह यन्त्रित चेतसा कालं वञ्चयता तं तं उक्तः देवः तं ऐक्षत ।।१५।।

इति	इस प्रकार	वञ्चयता	टालते हुए
पुत्र अनुरागेण	पुत्रके अनुरागवश	उक्तः देवः	कहता रहा, देव वरुण
स्नेह यन्त्रित	स्नेह-नियन्त्रित		
चेतसा तं तं	चित्तसे उस-उस	तं ऐक्षत	उसकी प्रतीक्षा करते रहे ।।१५।।
कालं	समयको		

रोहितस्तदभिज्ञाय पितुः कर्म चिकीर्षितम् ।
प्राणप्रेप्सुर्धनुष्पाणिररण्यं प्रत्यपद्यत ॥१६॥

रोहितः तत् अभिज्ञाय पितुः कर्म चिकीर्षितं प्राणप्रेप्सुः धनुः पाणिः अरण्यं प्रत्यपद्यत ॥१६॥

पितुः	पिता जो	प्राणप्रेप्सुः	प्राण बचानेके लिए
चिकीर्षितं	करना चाहते थे	धनुः पाणिः	हाथमें धनुष लेकर
तत् कर्म	उस कर्मको	रोहितः अरण्यं	रोहित वनमें
अभिज्ञाय	जानकर	प्रत्ययद्यत	चला गया ॥१६॥

पितरं वरुणग्रस्तं श्रुत्वा जातमहोदरम् ।
रोहितो ग्राममेयाय तमिन्द्रः प्रत्यषेधत ॥१७॥

पितरं वरुण ग्रस्तं श्रुत्वा जात महोदरं रोहितः ग्रामं एयाम तं इन्द्रः प्रत्यषेधत ॥१७॥

वरुण ग्रस्तं	वरुणसे ग्रस्त	एयाय	आने लगा; किन्तु
महोदरं	महोदर (जलोदर)	तं इन्द्रः	उसे इन्द्रने
जात	रोग हुआ	प्रत्यषेधत	मना कर दिया ॥१७॥
पितरं श्रुत्वा	पिताको सुनकर		
रोहितः ग्रामं	रोहित अपने नगर		

भूमेः पर्यटनं पुण्यं तीर्थक्षेत्रनिषेवणैः ।
रोहितायादिशच्छक्रः सोऽप्यरण्येऽवसत् समाम् ॥१८॥

भूमेः पर्यटनं पुण्यं तीर्थक्षेत्र निषेवणैः रोहिताय आदिशत् शक्रः सः अपि अरण्ये अवसत् समाम् ॥१८॥

तीर्थक्षेत्र	पवित्र क्षेत्रोंका	रोहिताय	रोहितको यह
निषेवणैः	भली प्रकार सेवन करते हुए	सक्रः आदिशत्	इन्द्रने आदेश दिया,
		सः अपि	वह भी
भूमेः पर्यटनं	पृथ्वीपर घूमना	अरण्ये	वनमें
पुण्यं	पुण्यप्रद है	समां अवसत्	एक वर्ष रहा ॥१८॥

एवं द्वितीये तृतीये चतुर्थे पञ्चमे तथा ।
अभ्येत्याभ्येत्य स्थविरो विप्रो भूत्वाऽऽह वृत्रहा ॥१६॥

एवं द्वितीये तृतीये चतुर्थे पञ्चमे तथा अभ्येत्य अभ्येत्य स्थविरः विप्रः भूत्वा आह वृत्रहा ॥१६॥

एवं द्वितीये	इसी प्रकार दूसरे,	भूत्वा	बनकर
तृतीये चतुर्थे	तीसरे, चौथे,	अभ्येत्य	बार-बार
तथा पञ्चमे	तथा पांचवें (वर्ष भी)	अभ्येत्य	पास आकर
स्थविरः विप्रः	वृद्ध ब्राह्मण	वृत्रहा आह	इन्द्रने कहा ॥१६॥

षष्ठं संवत्सरं तत्र चरित्वा रोहितः पुरीम् ।
उपव्रजन्नजीगर्तादक्रीणान्मध्यमं सुतम् ॥२०॥

षष्ठं संवत्सरं तत्र चरित्वा रोहितः पुरीं उपव्रजन् अजीगर्तात् अक्रीणान् मध्यमं सुतम् ॥२०॥

तत्र षष्ठं	वहां छः	पुरीं उपव्रजन्	अपने नगर लौटते समय
संवत्सरं	वर्ष		
चरित्वा	रहकर	अजीगर्तात्	अजीगर्तसे
रोहितः	रोहितने	मध्यमं सुतं	उसका मझला पुत्र
		अक्रीणान्	खरीद लिया ॥२०॥

शुनःशेपं पशुं पित्रे प्रदाय समवन्दत ।
ततः पुरुषमेधेन हरिश्चन्द्रो महायशाः ॥२१॥

शुनःशेपं पशुं पित्रे प्रदाय समवन्दत ततः पुरुषमेधेन हरिश्चन्द्रः महायशाः ॥२१॥

शुनः शेपं	उस शुनःशेपको	ततः महायशाः	तब महान् यशस्वी
पित्रे पशुं	पिताको पशु रूपमें	हरिश्चन्द्रः	हरिश्चन्द्रने
प्रदाय	देकर	पुरुषमेधेन	नरमेध यज्ञ द्वारा
समवन्दत	वन्दना की		॥२१॥

मुक्तोदरोऽयजद् देवान् वरुणादीन् महत्कथः ।
विश्वामित्रोऽभवत् तस्मिन् होता चाध्वर्युरात्मवान् ॥२२॥

मुक्त उदरः अयजत् देवान् वरुण आदीन् महत् कथः विश्वामित्रः अभवत् तस्मिन् होता च अध्वर्युः आत्मवान् ॥२२॥

महत्	महापुरुषोंमें जिनकी	अयजत्	यज्ञ किया
कथः	चर्चा है उन हरि-	तस्मिन् होता	उस यज्ञमें होता
	श्चन्द्रने	विश्वामित्रः	विश्वामित्रजी
उदरः मुक्त	उदर रोगसे छूटकर	अभवत्	हुए
वरुण आदीन्	वरुणादि	च आत्मवान्	तथा आत्मज्ञ
देवान्	देवताओंका	अध्वर्युः	अध्वर्यु ॥२२॥

जमदग्निरभूद् ब्रह्मा वसिष्ठोऽयास्यसामगः ।
तस्मै तुष्टो ददाविन्द्रः शातकौम्भमयं रथम् ॥२३॥

जमदग्निः अभूत् ब्रह्मा वसिष्ठः अयास्य सामगः तस्मै तुष्टः ददाः इन्द्रः शातकौम्भमयं रथम् ॥२३॥

जमदग्निः	जमदग्नि,	तस्मै तुष्टः	उनपर सन्तुष्ट होकर
वसिष्ठः ब्रह्मा	वशिष्ठ ब्रह्मा,	इन्द्रः	इन्द्रने
अयास्य	अयास्य	शातकौम्भमयं	स्वर्णमय
सामगः	सामगायक	रथं ददाः	रथ प्रदान किया
	(उद्गाता)		॥२३॥
अभूत्	हुए		

शुनःशेपस्य माहात्म्यमुपरिष्टात् प्रचक्ष्यते ।
सत्यसारां धृतिं दृष्ट्वा सभार्यस्य च भूपतेः ॥२४॥

शुनःशेपस्य माहात्म्यं उपरिष्टात् प्रचक्ष्यते सत्यसारां धृतिं दृष्ट्वा सभार्यस्य च भूपतेः ॥२४॥

शुनःशेपस्य	शुनःशेपकी
माहात्म्यं	महिमा
उपरिष्टात्	आगे कही
प्रवक्ष्यते	जायगी,
च सभार्यस्य	तथा पत्नी सहित
भूपतेः	राजा हरिश्चन्द्रकी
सत्यसारां धृतिं	सत्य निष्ठामें धैर्य
दृष्ट्वा	देखकर ॥२४॥

विश्वामित्रो भृशं प्रीतो ददावविहतां गतिम् ।
मनः पृथिव्यां तामद्भिस्तेजसापोऽनिलेन तत् ॥२५॥

विश्वामित्रः भृशं प्रीतः ददा अवविहतां गतिं मनः पृथिव्यां तां अद्भिः तेजस् आपः अनिलेन तत् ॥२५॥

विश्वामित्रः	विश्वामित्रने
भृशं प्रीतः	अत्यन्त प्रसन्न होकर
अवविहतां गतिं	अव्याहत गति
ददा	प्रदान की
मनः	(हरिश्चन्द्रने) मनको
पृथिव्यां	पृथ्वीमें,
तां अद्भिः	उस (पृथ्वी) को जल में,
आपः तेजस्	जलको अग्निमें,
तत्	उस (अग्नि) को
अनिलेन	वायुसे ॥२५॥

खे वायुं धारयंस्तच्च भूतादौ तं महात्मनि ।
तस्मिञ्ज्ञानकलां ध्यात्वा तयाज्ञानं विनिर्दहन् ॥२६॥

खे वायुं धारयन् तत् च भूत आदौ तं मह आत्मनि तस्मिन् ज्ञान कलां ध्यात्वा तया अज्ञानं विनिर्दहन् ॥२६॥

वायुं खे	वायुको आकाशमें,
तत् च	उस (आकाश) को भी
भूत आदौ	भूतादि (अहंकार) में
तं मह आत्मनि	उसे महत्तत्वमें
धारयन्	धारण कराके
तस्मिन्	उस (महत्तत्त्व) में
ज्ञान कलां	ज्ञान कलाका
ध्यात्वा तया	ध्यान करके उसके द्वारा
अज्ञानं	अज्ञानको
विनिर्दहन्	भस्म करके ॥२६॥

हित्वा तां स्वेन भावेन निर्वाणसुखसंविदा ।
अनिर्देश्याप्रतर्क्येण तस्थौ विध्वस्तबन्धनः ॥२७॥

हित्वा तां स्वेन भावेन निर्वाण सुख संविदा अनिर्देश्य अप्रतर्क्येण तस्थौ विध्वस्त बन्धनः ॥२७॥

निर्वाण सुख	निर्वाण सुखके	विध्वस्त	नष्ट करके
संविदा	सम्बोध द्वारा	अनिर्देश्य	निर्देश (वर्णन) से अतीत,
तां	उस (ज्ञान कला) को भी	अप्रतर्क्येण	अनुमानातीत
हित्वा	त्यागकर	स्वेन भावेन	अपने स्वरूपमें
बन्धनः	सब बन्धन	तस्थौ	स्थित हो गये ॥२७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे हरिश्चन्द्रोपाख्यानं नाम सप्तमोऽध्यायः ॥७॥

अथ अष्टमोऽध्यायः

श्रीशुक उवाच

हरितो रोहितसुतश्चम्पस्तस्माद् विनिर्मिता ।
चम्पापुरी सुदेवोऽतो विजयो यस्य चात्मजः ॥१॥

हरितः रोहित सुतः चम्पः तस्मात् विनिर्मिता चम्पापुरी सुदेवः अतः विजयः यस्य च आत्मजः ॥१॥

रोहित सुतः	रोहितका पुत्र	च अतः	फिर इससे
हरितः तस्मात्	हरित हुआ, उससे	सुदेवः	सुदेव हुआ
चम्पः	चम्प हुआ (जिसने)	यस्य आत्मजः	जिसका पुत्र
चम्पापुरी	चम्पापुरी	विजयः	विजय हुआ ॥१॥
विनिर्मिता	निर्माण की		

भरुकस्तत्सुतस्तस्माद् वृकस्तस्यापि बाहुकः ।
सोऽरिभिर्हृतभूः राजा सभार्यो वनमाविशत् ॥२॥

भरुकः तत् सुतः तस्मात् वृकः तस्या अपि बाहुकः सः अरिभिः हृत भूः राजा सभार्यः वनं आविशत् ॥२॥

तत् सुतः	उसका पुत्र	अरिभिः	शत्रु द्वारा
भरुकः	भरुक हुआ	हृत भूः	भूमि छीन लिए जाने पर
तस्मात् वृकः	उससे वृक,	सभार्यः	पत्नीके साथ
तस्या अपि	उसका भी	वनं	वनमें
बाहुकः	बाहुक हुआ,	आविशत्	प्रवेश कर गया ॥२॥
सः राजा	वह राजा		

वृद्धं तं पञ्चतां प्राप्तं महिष्यनु मरिष्यती ।
और्वेण जानताऽऽत्मानं प्रजावन्तं निवारिता ॥३॥

वृद्धं तं पञ्चतां प्राप्तं महिष्य अनु मरिष्यती और्वेण जानता आत्मानं प्रजावन्तं निवारिता ॥३॥

तं वृद्धं	उस (राजा) के वृद्ध होकर	आत्मानं	उसके शरीरको
		प्रजावन्तं	सन्तानवान्
पञ्चतां प्राप्तं	मर जानेपर	जानता	जानकर
महिष्य	महारानी	और्वेण	और्वने
अनु मरिष्यती	उसके पीछे मरने लगीं तब	निवारिता	रोक दिया ॥३॥

आज्ञायास्यै सपत्नीभिर्गरो दत्तोऽन्धसा सह ।
सह तेनैव संजातः सगराख्यो महायशाः ॥४॥

आज्ञाय अस्यै सपत्नीभिः गरः दत्तः अन्धसा सह सह तेन एव संजातः सगर आख्यः महायशाः ॥४॥

सपत्नीभिः	सौतोंने	संजातः	उत्पन्न
आज्ञाय	(यह बात) जानकर	महायशाः	महायशस्वी बालक
अन्धसा सह	भोजनके साथ	सगर	सगर
अस्यै गरः दत्तः	इसको विष दे दिया	आख्यः	नामवाला हुआ ॥४॥
तेन एव सह	उस (गरल) के साथ ही		

सगरश्चक्रवर्त्यासीत् सागरो यत्सुतैः कृतः ।
यस्तालजङ्घान् यवनाञ्छकान् हैहयबर्बरान् ॥५॥

सागरः चक्रवर्ति आसीत् सागरः यत् सुतैः कृतः यः तालजङ्घान् यवनान् शकान् हैहय बर्बरान् ॥५॥

सगरः चक्रवर्ति	सगर चक्रवर्ती राजा	तालजङ्घान्	ताल जंघ,
आसीत्	हुआ,	यवनान् शकान्	यवन, शक,
यत् सुतैः	जिसके पुत्रोंने	हैहय बर्बरान्	हैहय आदि बर्बर लोगोंको ॥५॥
सागरः कृतः	सागर बनाया,		
यः	जिसने		

नावधीद् गुरुवाक्येन चक्रे विकृतवेषिणः ।
मुण्डाञ्छ्मश्रुधरान् कांश्चिन्मुक्तकेशार्धमुण्डितान् ॥६॥

न अवधीत् गुरु वाक्येण चक्रे विकृत वेषिणः मुण्डान् श्मश्रुधरान् कांश्चित् मुक्तकेश अर्धमुण्डितान् ॥६॥

गुरु वाक्येण	गुरु (और्व) के कहनेसे	श्मश्रुधरान्	दाढ़ी-मूँछ रखनेवाले,
अवधीत् न	मारा नहीं,	मुक्तकेश	केश खुले रखनेवाले और
विकृत	विकृत	अर्धमुण्डितान	अर्ध मुण्डित
वेषिणः	वेष वाला	चक्रे	बना दिये ॥६॥
मुण्डान्	घुटे सिर वाले,		
कांश्चित्	कुछको		

अनन्तर्वाससः कांश्चिदबहिर्वाससोऽपरान् ।
सोऽश्वमेधैरयजत सर्ववेदसुरात्मकम् ॥७॥

अनन्तः वाससः कांश्चित् अबहिः वाससः अपरान् सः अश्वमेधैः अयजत सर्ववेद सुर आत्मकम् ॥७॥

अनन्तः	बिना भीतरी	सः	उन्होंने
वाससः	वस्त्रके (लुंगीवाले)	अश्वमेधैः	अश्वमेध यज्ञ द्वारा
कांश्चित्	किन्हींको	सर्ववेद	सर्ववेद
अपरान्	तथा दूसरोंको	सुर आत्मकं	एवं देव स्वरूप
अबहिः	बिना बाहरी	अयजत	(भगवान) की
वाससः	वाले (केवल लंगोटी) वस्त्र (बना दिया)		आराधना की ॥७॥

और्वोपदिष्टयोगेन हरिमात्मानमीश्वरम् ।
तस्योत्सृष्टं पशुं यज्ञे जहाराश्वं पुरन्दरः ॥८॥

और्व उपदिष्ट योगेन हरिं आत्मानं ईश्वरं तस्य उत्सृष्टं पशुं यज्ञे जहार अश्वं पुरन्दरः ॥८॥

आत्मानं	परमात्मा,	योगेन	विधिसे (अर्चा की)
ईश्वरं	जगदीश्वर	तस्य यज्ञे	उनके यज्ञमें
हरिं	श्रीहरिका	उत्सृष्टं पशुं	छोड़े गये पशु
और्वं	अर्व	अश्वं पुरन्दरः	घोड़ेको इन्द्रने
उपदिष्ट	ऋषि द्वारा बतलाया	जहार	हरण कर लिया ॥८॥

सुमत्यास्तनया दृप्ताः पितुरादेशकारिणः ।
हयमन्वेषमाणास्ते समन्तान्न्यखनन् महीम् ॥९॥

सुमत्याः तनयाः दृप्ताः पितुः आदेश कारिणः हयं अन्वेषमाणाः ते समन्तात् न्यखनन् महीम् ॥९॥

सुमत्याः तनया	रानी सुमतिके पुत्र	दृप्ताः	गर्वमें आकर
पितुः	पिताके	समन्तात्	चारों ओरसे
आदेश कारिणः	आज्ञापालक थे,	महीं	पृथ्वीको
ते हयं	उन्होंने घोड़ेको	न्यखनन्	खोद डाला ॥९॥
अन्वेषमाणाः	ढूंढ़ते हुए		

प्रागुदीच्यां दिशि हयं ददृशुः कपिलान्तिके ।
एष वाजिहरश्चौर आस्ते मीलितलोचनः ॥१०॥

प्राक् उदीच्यां दिशि हयं ददृशुः कपिल अन्तिके एष वाजिहरः चौरः आस्ते मीलित लोचनः ॥१०॥

प्राक् उदीच्यां	पूर्वोत्तर (ईशान)	एष वाजिहरः	'यही घोड़ा चुराने-
दिशि हयं	दिशामें घोड़ेको		वाला
कपिल	महर्षि कपिलके	चौरः	चोर है,
अन्तिके	समीप	मीलित लोचनः	नेत्र बन्द करके
ददृशुः	देखा (तब बोल उठे)	आस्ते	बैठा है ॥१०॥

हन्यतां हन्यतां पाप इति षष्टिसहस्रिणः ।
उदायुधा अभिययुरुन्मिमेष तदा मुनिः ॥११॥

हन्यतां हन्यतां पाप इति षष्टि सहस्रिणः उद् आयुधा अभिययुः उन्मिमेष तदा मुनिः ॥११॥

पाप	इस पापीको	उद् आयुधा	हथियार उठाकर
हन्यतां हन्यतां	मार दो ! मार दो !'	अभिययुः	उनकी ओर झपटे
इति	ऐसा कहते	तदा मुनिः	तब कपिल मुनिने
षष्टि सहस्रिणः	वे साठ हज़ार	उन्मिमेष	पलकें खोलीं ।।११।।

स्वशरीराग्निना तावन्महेन्द्रहृतचेतसः ।
महद्व्यतिक्रमहता भस्मसादभवन् क्षणात् ।।१२।।

स्व शरीर अग्निना तावत् महेन्द्र हृत चेतसः महत् व्यतिक्रम हता भस्मसात् अभवन् क्षणात् ।।१२।।

महेन्द्र हृत	इन्द्रकी मायासे	स्व शरीर	अपने शरीरसे
चेतसः	मोहित चित्त	अग्निना	प्रगट अग्निसे
महत्	महापुरुषका	क्षणात्	क्षण भरमें ही
व्यतिक्रम	अपराध करनेसे	भस्मसात्	भस्म
हता तावत्	मारे गये उसी स	अभवन्	हो गये ।।१२।।

न साधुवादो मुनिकोपभर्जिता
नृपेन्द्रपुत्रा इति सत्वधामनि ।
कथं तमो रोषमयं विभाव्यते
जगत्पवित्रात्मनि खे रजो भुवः ।।१३।।

न साधुवादः मुनिकोप भर्जिता नृपेन्द्रपुत्रा इति सत्त्व धामनि कथं तमः रोषमयं विभाव्यते जगत् पवित्र आत्मनि खे रजः भुवः ।।१३।।

नृपेन्द्रपुत्रा	'राजा सगरके पुत्र	जगत्	संसारको
मुनिकोप	कपिल मुनिके क्रोधसे	पवित्र	पवित्र करनेवाले
भर्जिता	भून दिये गये'	आत्मनि	श्रीविग्रह वाले
इति	इस प्रकार	सत्व धामनि	सत्त्व स्वरूपमें
साधुवादः	कहना अच्छा	रोषमयं तमः	क्रोध रूप तमो गुण-
न	नहीं है		की

विभाव्यते	सम्भावना	भुवः रजः	पृथ्वीकी धूलिके
कथं	कैसे की जा सकती है,	खे	आकाशमें होनेके समान ॥१३॥

यस्येरिता सांख्यमयी दृढेह नौ-
र्यया मुमुक्षुस्तरते दुरत्ययम् ।
भवार्णवं मृत्युपथं विपश्चितः
परात्मभूतस्य कथं पृथङ्मतिः ॥१४॥

यस्य ईरिता सांख्यमयी दृढ़ इह नौः यया मुमुक्षुः तरते दुरत्ययं भव अर्णवं मृत्यु पथं विपश्चितः परात्म भूतस्य कथं पृथक् मतिः ॥१४॥

यया	जिसके द्वारा	दृढ नौः	दृढ़ नौका
मुमुक्षुः	मुक्त होनेका इच्छुक	यस्य	जिन्होंने
विपश्चितः	विवेकशील	ईरिता	प्रवृत्त किया है
मृत्यु पथं	मृत्युका मार्ग रूप	परात्म	उन परमात्म
दुरत्ययं	दुष्पार	भूतस्य	स्वरूपमें
भव	संसार सागरसे	पृथक् मतिः	भेद बुद्धि
अर्णवं तरते	पार हो जाते हैं	कथं	कैसे हो सकती है ॥१४॥
इह	इस जगतमें		
सांख्यमयी	सांख्य शास्त्ररूपी		

योऽसमञ्जस इत्युक्तः स केशिन्या नृपात्मजः ।
तस्य पुत्रोंऽशुमान् नाम पितामहहिते रतः ॥१५॥

यः असमञ्जस इति उक्तः स केशिन्या नृप आत्मजः तस्य पुत्रः अंशुमान् नाम पितामह हिते रतः ॥१५॥

यः असमञ्जस	जो असमञ्जस	तस्य पुत्रः	उसका पुत्र
इति उक्तः	इस नामसे कहा गया	अंशुमान् नाम	अंशुमान् नामका
स	वह महारानी	पितामह हिते	पितामहकी भलाईमें
केशिन्या	केशिनीसे उत्पन्न	रतः	लगा रहता था ॥१५॥
नृप	राजा सगरका		
आत्मजः	पुत्र था,		

असमञ्जस आत्मानं दर्शयन्नसमञ्जसम् ।
जातिस्मरः पुरा सङ्गाद् योगी योगाद् विचालितः ॥१६॥

असमञ्जस आत्मानं दर्शयन् असमञ्जसं जाति स्मरः पुरा सङ्गात् योगी योगात् विचालितः ॥१६॥

असमञ्जस	असमञ्जस	जाति	जन्मसे पूर्व जन्मका
पुरा योगी	पूर्व जन्ममें योगी था	स्मरः	उसे स्मरण था
सङ्गात्	आसक्तिके कारण	आत्मानं	अतः अपनेको
योगात्	योगसे	असमञ्जसं	सामंजस्यहीन
विचालितः	विचलित कर दिया	दर्शयन्	दिखलाते हुए ॥१६॥

आचरन् गर्हितं लोके ज्ञातीनां कर्म विप्रियम् ।
सरय्वां क्रीडतो बालान् प्रास्यदुद्वेजयञ्जनम् ॥१७॥

आचरन् गर्हितं लोके ज्ञातीनां कर्म विप्रियं सरय्वां क्रीडतः बालान् प्रास्यत् उद्वेजयत् जनम् ॥१७॥

लोके गर्हितं	लोकमें निन्दित	बालान्	बालकोंको
ज्ञातीनां	जाति वालोंको	प्रास्यत्	(नदीमें) फेंककर
विप्रियं	अप्रिय	जनं	लोगोंको
कर्म आचरन्	कर्म करते हुए	उद्वेजयत्	उद्विग्न कर दिया ॥०७॥
सरय्वां क्रीडतः	सरयू किनारे खेलते		

एवंवृत्तः परित्यक्तः पित्रा स्नेहमपोह्य वै ।
योगैश्वर्येण बालांस्तान् दर्शयित्वा ततो ययौ ॥१८॥

एवंवृत्तः परित्यक्तः पित्रा स्नेहं अपोह्य वै योग ऐश्वर्येण बालान् तान् दर्शयित्वा ततः ययौ ॥१८॥

एवंवृत्तः	ऐसा आचरण होनेसे	ततः योग	तब योगके
पित्रा वै	पिताने निश्चय	ऐश्वर्येण	प्रभावसे
स्नेहं	स्नेह,	तान् बालान्	उन बालकोंको
अपोह्य	छोड़कर	दर्शयित्वा	दिखलाकर
परित्यक्तः	त्याग दिया,	ययौ	चला गया ॥१८॥

अयोध्यावासिनः सर्वे बालकान् पुनरागतान् ।
दृष्ट्वा विसिस्मिरे राजन् राजा चाप्यन्वतप्यत ॥१६॥

अयोध्या वासिनः सर्वे बालकान् पुनः आगतान् दृष्ट्वा विसिस्मिरे राजन् राजा च अपि अन्वतप्यत ॥१६॥

राजन्	राजन् !	दृष्ट्वा	देखकर
सर्वे अयोध्या	सब अयोध्या	विसिस्मिरे	आश्चर्यमें पड़ गये,
वासिनः	वासी	च राजा	और राजा
पुनः आगतान्	फिर आये	अन्वतप्यत	बहुत संतप्त हुए
बालकान् अपि	बालकोंको भी		॥१६॥

अंशुमांश्चोदितो राज्ञा तुरंगन्वेषणे ययौ ।
पितृव्यखातानुपथं भस्मान्ति ददृशे हयम् ॥२०॥

अंशुमानः चोदितः राज्ञा तुरंग अन्वेषणे ययौ पितृव्यखात अनुपथं भस्मान्ति ददृशे हयम् ॥२०॥

राज्ञा चोदितः	राजाके प्रेरणा देने-पर	पितृव्यखात	चाचा लोगोंके द्वारा बनासे गड्ढेके
तुरंग अन्वेषणे	घोड़ा ढूंढ़ने	अनुपथं	मार्गके पीछे चलकर
अंशुमानः ययौ	अंशुमान् गया,	भस्मान्ति	उनकी भस्मके समीप
		हयं ददृशे	घोड़ेको देखा ॥२०॥

तत्रासीनं मुनिं वीक्ष्य कपिलाख्यमधोक्षजम् ।
अस्तौत् समाहितमनाः प्राञ्जलिः प्रणतो महान् ॥२१॥

तत्र आसीनं मुनिं वीक्ष्य कपिल आख्यं अधोक्षजं अस्तौत् समाहित मनाः प्राञ्जलिः प्रणतः महान् ॥२१॥

तत्र कपिल	वहां कपिल	अधोक्षजं	भगवानके अवतार
आख्यं	नामवाले	महान् मुनिं	महामुनिको

आसीनं वीक्ष्य	बैठा देखकर	समाहित मनाः	एकाग्र चित्तसे
प्रणतः	प्रणाम करके	अस्तौत्	स्तुति की ॥२१॥
प्राञ्जलिः	हाथ जोड़कर		

अंशुमान उवाच

न पश्यति त्वां परमात्मनोऽजनो
न बुध्यतेऽद्यापि समाधियुक्तिभिः ।
कुतोऽपरे तस्य मनःशरीरधी-
विसर्गसृष्टा वयमप्रकाशाः ॥२२॥

न पश्यति त्वां परमात्मनः अजनः न बुध्यते अद्य अपि समाधि युक्तिभिः कुतः अपरे तस्य मनः शरीर धीः विसर्ग सृष्टा वयं अप्रकाशाः ॥२२॥

त्वां	आप	तस्य मनः	उनके मन,
परमात्मनः	परमात्माको	शरीर धीः	शरीर, बुद्धिसे
अद्य अपि	अब तक भी	विसर्ग सृष्टा	होनेवाली सृष्टिके
समाधि	समाधि और	अपरे	दूसरे
युक्तिभिः	युक्तियों द्वारा	वयं अप्रकाशाः	हम आज्ञानी लोग
अजनः	अजन्मा (ब्रह्माजी)	कुतः	कहांसे जानेंगे ॥२२॥
न बुध्यते	नहीं जान सके		

ये देहभाजस्त्रिगुणप्रधाना
गुणान् विपश्यन्त्युत वा तमश्च ।
यन्मायया मोहितचेतसस्ते
विदुः स्वसंस्थं न बहिःप्रकाशाः ॥२३॥

ये देह भाजः त्रिगुण प्रधाना गुणान् विपश्यन्ति उत वा तमः च यत मायया मोहित चेतसः ते विदुः स्व संस्थं न बहिः प्रकाशाः ॥२३॥

यत् मायया	जिनकी मायासे	त्रिगुण प्रधाना	त्रिगुण प्रधान
मोहित चेतसः	मोहित चित्तवाले	ये देह भाजः	जो शरीरधारी हैं

गुणान्	गुणोंको ही	बहिः प्रकाशाः	बहिर्मुख होनेके कारण
विपश्यन्ति	देखते हैं	स्वसंस्थं	अपनेमें स्थित
उतवा	अथवा	ते न	आपको नहीं
तमः च	(सुषुप्तिमें) अज्ञान-को भी देखते हैं,	विदुः	जानते ॥२३॥

तं त्वामहं ज्ञानघनं स्वभाव-
प्रध्वस्तमायागुणभेदमोहैः ।
सनन्दनाद्यैर्मुनिभिर्विभाव्यं
कथं हि मूढः परिभावयामि ॥२४॥

तं त्वां अहं ज्ञानघनं स्वभाव प्रध्वस्त मायागुण भेद मोहैः सनन्दन आद्यैः मुनिभिः विभाव्यं कथं हि मूढः परिभावयामि ॥२४॥

तं त्वां	उस आप	आद्यैः	आदि
ज्ञानघनं	ज्ञानघन,	मुनिभिः	मुनियों द्वारा
मायागुण	मायाके गुणोंसे उत्पन्न	विभाव्यं	चिन्तनीयको
भेद मोहैः	भेद रूप मोह	हि अहं मूढः	क्योंकि मैं अज्ञानी हूँ
स्वभाव	अपने स्वरूपानुभवसे	कथं	कैसे
प्रध्वस्त	विनष्ट किये	परिभावयामि	भावना कर सकता हूँ ॥२४॥
सनन्दन	सनन्दन		

प्रशान्तमायागुणकर्मलिङ्ग-
मनामरूपं सदसद्विमुक्तम् ।
ज्ञानोपदेशाय गृहीतदेहं
नमामहे त्वां पुरुषं पुराणम् ॥२५॥

प्रशान्त माया गुण कर्मलिगं अनाम अरूपं सत् असत् विमुक्तं ज्ञान उपदेशाय गृहीत देहं नमामहे त्वां पुरुषं पुराणम् ॥२५॥

माया गुण कर्मलिगं	मायाके गुण, कर्म, लिंग	प्रशान्त	जिनमें अत्यन्त शान्त-(अदृश्य) हैं,

अनाम अरूपं	नाम-रूपसे रहित	त्वां पुराणं	आप पुराण
सत्-असत्	कारण-कार्य भावसे	पुरुषं	पुरुषको
विमुक्तं	छूटे हुए	नमामहे	हम नमस्कार करते
ज्ञान उपदेशाय	ज्ञानोपदेशके लिए		हैं ॥२५॥
गृहीत देहं	शरीर धारण किए		

त्वन्मायारचिते लोके वस्तुबुद्धया गृहादिषु ।
भ्रमन्ति कामलोभेर्ष्यामोहविभ्रान्तचेतसः ॥२६॥

त्वत् माया रचिते लोके वस्तु बुद्ध्या गृह आदिषु भ्रमन्ति काम लोभ ईर्ष्या मोह विभ्रान्त चेतसः ॥२६॥

काम लोभ	कामना, लोभ,	रचिते लोके	निर्मित संसारमें
ईर्ष्या मोह	ईर्ष्या, मोहसे	वस्तु बुद्ध्या	सत्यत्व बुद्धि करके
विभ्रान्त	अत्यन्त भ्रान्त	गृह आदिषु	गृह आदिमें
चेतसः	चित्त लोग	भ्रमन्ति	भटकते रहते हैं
त्वत् माया	आपकी मायासे		॥२६॥

अद्य नः सर्वभूतात्मन् कामकर्मेन्द्रियाशयः
मोहपाशो दृढश्छिन्नो भगवंस्तव दर्शनात् ॥२७॥

अद्य नः सर्वभूत आत्मन् काम कर्म इन्द्रिय आशयः मोहपाशः दृढः छिन्नः भगवन् तव दर्शनात् ॥२७॥

भगवन्	भगवन् !	इन्द्रिय	इन्द्रिय चित्तका
सर्वभूत	समस्त प्राणियोंके	आशयः	आधार रूप
आत्मन्	आत्मरूप	दृढः मोहपाशः	दृढ मोहपाश
तव दर्शनात्	आपके दर्शनसे	अद्य नः	आज मेरा
काम कर्म	कामना, कर्म और	छिन्नः	कट गया ॥२७॥

श्रीशुक उवाच

इत्थंगीतानुभावस्तं भगवान् कपिलो मुनिः ।
अंशुमन्तमुवाचेदमनुगृह्य धिया नृप ॥२८॥

इत्थं गीतः अनुभावः तं भगवान् कपिलः मुनिः अंशुमन्तं उवाच इदं अनुगृह्य धिया नृप ॥२८॥

नृप	राजन् !	कपिलः मुनिः	कपिल मुनि
इत्थं	इस प्रकार	धिया अनुगृह्य	हृदयसे अनुग्रह करके
अनुभावः	प्रभाव	तं अंशुमन्तं	उस अंशुमानसे
गीतः	वर्णन करनेपर	इदं उवाच	यह बोले ॥२८॥
भगवान्	भगवान्		

श्रीभगवानुवाच

अश्वोऽयं नीयतां वत्स पितामहपशुस्तव ।
इमे च पितरो दग्धा गंगाम्भोऽर्हन्ति नेतरत् ॥२९॥

अश्वः अयं नीयतां वत्स पितामह पशुः तव इमे च पितरः दग्धा गंगा अम्भः अर्हन्ति न इतरत् ॥२९॥

वत्स अयं	वत्स ! यह	पितरः	पितृगण
अश्वः	घोड़ा	गंगा अम्भः	गङ्गा-जल
तव पितामह	तुम्हारे पितामहका	अर्हन्ति	पाने योग्य हैं,
पशुः नीयतां	यज्ञ पशु है, इसे ले जाओ,	इतरत्	दूसरा और कुछ
		न	नहीं ॥२९॥
अयं ते दग्धा	ये तुम्हारे जल गये		

श्रीशुक उवाच*

तं परिक्रम्य शिरसा प्रसाद्य हयमानयत् ।
सगरस्तेन पशुना क्रतुशेषं समापयत् ॥३०॥

तं परिक्रम्य शिरसा प्रसाद्य हयं आनयत् सगरः तेन पशुना क्रतुशेषं समापयत् ॥३०॥

तं	उन (कपिल) की	शिरसा	सिर झुकाकर
परिक्रम्य	परिक्रमा करके	प्रसाद्य	प्रसन्न करके

*यह उवाच अन्य प्रतियोंमें नहीं है ।

हयं आनयत्	घोड़ा ले आया,	क्रतुशेषं	यज्ञका बचा भाग
तेन पशुना	उस पशु द्वारा	समापयत्	सम्पन्न किया ॥३०॥
सगरः	राजा सगरने		

राज्यमंशुमति न्यस्य निःस्पृहो मुक्तबन्धनः ।
और्वोपदिष्टमार्गेण लेभे गतिमनुत्तमाम् ॥३१॥

राज्यं अंशुमति न्यस्य निःस्पृहः मुक्तबन्धनः और्व उपदिष्ट मार्गेण लेभे गतिं अनुत्तमम् ॥३१॥

अंशुमति	अंशुमानको	उपदिष्ट	उपदेश किये
राज्यं न्यस्य	राज्य सौंपकर	मार्गेण	मार्गसे
निःस्पृहः	स्पृहा रहित तथा	अनुत्तमां	परम श्रेष्ठ
मुक्तबन्धनः	बन्धनहीन होकर	गतिं लेभे	पद प्राप्त किया
और्व	और्व ऋषिके		॥३१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे सगरोपाख्यानेऽष्टमोऽध्यायः ॥८॥

अथ नवमोऽध्यायः

श्रीशुक उवाच–

अंशुमांश्च तपस्तेपे गङ्गानयनकाम्यया ।
कालं महान्तं नाशक्नोत् ततः कालेन संस्थितः ।।१।।

अंशुमान् च तपः तेपे गंगा आनयन् काम्यया कालं महान्तं न शक्नोत् ततः कालेन संस्थितः ।।१।।

अंशुमान् च	अंशुमानने भी	तपः तेपे	तपस्या की; किन्तु
गंगा	गंगाजीको	शक्नोत् न	समर्थ नहीं हुआ
आनयन्	लानेकी	ततः कालेन	फिर समय आनेपर
काम्यया	कामनासे	संस्थितः	मर गया ।।१।।
महान्तं कालं	बहुत दीर्घ समय तक		

दिलीपस्तत्सुतस्तद्वदशक्तः कालमेयिवान् ।
भगीरथस्तस्य पुत्रस्तेपे स सुमहत् तपः ।।२।।

दिलीपः तत् सुतः तद्वत् अशक्तः कालं एयिवान् भगीरथः तस्य पुत्रः तेपे स सुमहत् तपः ।।२।।

तत् सुतः	उसका पुत्र	तस्य पुत्रः	उसका पुत्र
दिलीपः	दिलीप भी	भागीरथः	भगीरथ था
तद्वत्	उसीकी भांति	स सुमहत्	उसने बहुत बड़ी
कालं एयिवान्	कालको प्राप्त हुआ,	तपः तेपे	तपस्या की ।।२।।

दर्शयामास तं देवी प्रसन्ना वरदास्मि ते ।
इत्युक्तः स्वमभिप्रायं शशंसावनतो नृपः ।।३।।

दर्शयामास तं देवी प्रसन्ना वरदा अस्मि ते इति उक्तः स्वं अभिप्रायं शशंस अवनतः नृपः ।।३।।

तं देवी	उन्हें देवी गंगाने
दर्शयामास	दर्शन दिया (और बोलीं)
ते प्रसन्ना	'तुमपर प्रसन्न हूँ,
वरदा अस्मि	वरदान देने वाली हूँ।'
इति उक्तः	उनके ऐसा कहनेपर
अवनतः नृपः	विनीत राजाने
स्वं अभिप्रायं	अपना अभिप्राय
शशंस	निवेदन किया ॥३॥

कोऽपि धारयिता वेगं पतन्त्या मे महीतले ।
अन्यथा भूतलं भित्त्वा नृप यास्ये रसातलम् ॥४॥

कः अपि धारयिता वेगं पतन्त्या मे महीतले अन्यथा भूतलं भित्त्वा नृप यास्ये रसातलम् ॥४॥

नृप कः	(गंगाजीने कहा) राजन् कोई
अपि	भी
महीतले	पृथ्वीपर
पतन्त्या	गिरते समय
मे वेगं	मेरे वेगको
धारयिता	धारण करने वाला (चाहिए)
अन्यथा	नहीं तो
भूतलं भित्त्वा	पृथ्वीको फोड़कर
रसातलं	रसातल
यास्ये	चली जाऊँगी ॥४॥

किं चाहं न भुवं यास्ये नरा मय्यामृजन्त्यघम् ।
मृजामि तदघं कुत्र राजंस्तत्र विचिन्त्यताम् ॥५॥

किं च अहं न भुवं यास्ये नरा मयि आमृजन्ति अघं मृजामि तत् अघं कुत्र राजन् तत्र विचिन्त्यताम् ॥५॥

किं च अहं	अथवा तो मैं
भुवं न यास्ये	पृथ्वीपर जाऊँगी ही नहीं
नरा मयि	मनुष्य मुझमें
अघं	अपने पाप
आमृजन्ति	धो दगे,
तत् अघं	उस पापको
कुत्र मृजामि	मैं कहां धोऊँगी
राजन् तत्र	राजन्! इस विषयमें
विचिन्त्यतां	विचार कर लो ॥५॥

भगीरथ उवाच

साधवो न्यासिनः शान्ता ब्रह्मिष्ठा लोकपावनाः ।
हरन्त्यघं तेऽङ्गसंगात् तेष्वास्ते ह्यघभिद्धरिः ॥६॥

साधवः न्यासिनः शान्ता ब्रह्मिष्ठा लोक पावनाः हरन्ति अघं ते अंग संगात् तेषु आस्ते हि अघभित् हरिः ॥६॥

न्यासिनः	सभी कामनाओंको त्यागनेवाले	ते	आपका
शान्ता साधवः	शान्त सत्पुरुष,	अघं हरन्ति	पाप हरण कर लेंगे
ब्रह्मिष्ठा	ब्रह्मनिष्ठ	हि तेषु	क्योंकि उनके हृदयमें
लोक	समस्त लोकोंको	अघभित्	पाप-नाशक
पावनाः	पवित्र करनेवाले	हरिः आस्ते	श्रीहरि निवास करते हैं ॥६॥
अंग संगात्	अपने शरीर स्पर्शसे		

धारयिष्यति ते वेगं रुद्रस्त्वात्मा शरीरिणाम् ।
यस्मिन्नोतमिदं प्रोतं विश्वं शाटीव तन्तुषु ॥७॥

धारयिष्यति ते वेगं रुद्रः तु आत्मा शरीरिणां यस्मिन् ओतं इदं प्रोतं विश्वं शाटी इव तन्तुषु ॥७॥

शरीरिणां	शरीर धारियोंके	इव	भांति
आत्मा रुद्रः	आत्मा रुद्र,	ओतं प्रोतं	ओत प्रोत है
यस्मिन्	जिनमें	ते वेगं	आपका वेग
इदं विश्वं	यह विश्व	धारयिष्यति	धारण करेंगे ॥७॥
तन्तुषु शाटी	सूतमें वस्त्रकी		

श्रीशुक उवाच*

इत्युक्त्वा स नृपो देवं तपसातोषयच्छिवम् ।
कालेनाल्पीयसा राजंस्तस्येशः समतुष्यत ॥८॥

*यह उवाच अन्य प्रतियोंमें नहीं है ।

इति उक्त्वा स नृपः देवं तपसा तोषयत् शिवं कालेन अल्पीयसा राजन् तस्य ईशः समतुष्यत ॥८॥

इति उक्त्वा	ऐसा कहकर	अल्पीयसा	थोड़े से ही
स नृपः	उस राजा भगीरथने	कालेन तस्य	समयमें उसपर
तपसा शिवं	तपस्यासे शंकरजी को	ईशः	शंकरजी
तोषयत्	सन्तुष्ट किया	समतुष्यत	सन्तुष्ट हो गये ॥८॥
राजन्	राजन् !		

तथेति राज्ञाभिहितं सर्वलोकहितः शिवः ।
दधारावहितो गंगां पादपूतजलां हरेः ॥९॥

तथा इति राज्ञ अभिहितं सर्वलोकहितः शिवः दधार अवहितः गंगा पादपूत जलां हरेः ॥९॥

सर्वलोकहितः	लोकहितकारी	जलां गंगा	जलवाली गंगाको
शिवः	शंकरजीने	अवहितः	समाहित चित्तसे (सिरपर)
राज्ञ अभिहितं	पाजाके कथनको	दधार	धारण किया ॥९॥
तथा इति	'अच्छा' ऐसा कहकर		
हरेः पादपूत	श्रीहरिके चरणोंसे पवित्र		

भगीरथः स राजर्षिर्निन्ये भुवनपावनीम् ।
यत्र स्वपितृणां देहा भस्मीभूताः स्म शेरते ॥१०॥

भगीरथः स राजर्षिः निन्ये भुवन पावनीं यत्र स्वपितृणां देहा भस्मीभूताः स्म शेरते ॥१०॥

स राजर्षिः	फिर वे राजर्षि	यत्र	जहां
भगीरथः	भगीरथ	भस्मीभूता	भस्म होकर
भुवन पावनीं	त्रिभुवन पावनी गंगाको	शेरते स्म	पड़े हुए थे
स्वपितृणां देहा	अपने पितरोंके शरीर	निन्ये	(वहां) ले गये ॥१०॥

रथेन वायुवेगेन प्रयान्तमनुधावती ।
देशान् पुनन्ती निर्दग्धानासिञ्चत् सगरात्मजान् ॥११॥

रथेन वायुवेगेन प्रयान्तं अनुधावती देशान् पुनन्ती निर्दग्धान् आसिञ्चत् सगर आत्मजान् ॥११॥

रथेन वायुवेगेन	वायुवेग वाले रथसे	**पुनन्ती**	पवित्र करती
प्रयान्तं	जाते हुए (भगीरथ) के पीछे	**निर्दग्धान्**	(गंगाने) जले हुए
		सगर	राजा सगरके
अनुधावती	दौड़ती हुई	**आत्मजान्**	पुत्रोंको
देशान्	(मार्गके) देशोंको	**आसिञ्चत्**	सींच दिया ॥११॥

यञ्जलस्पर्शमात्रेण ब्रह्मदण्डहता अपि ।
सगरात्मजा दिवं जग्मुः केवलं देहभस्मभिः ॥१२॥

यत् जल स्पर्श मात्रेण ब्रह्मदण्ड हता अपि सगर आत्मजा दिवं जग्मुः केवलं देह भस्मभिः ॥१२॥

ब्रह्मदण्ड	ब्रह्मदण्डसे	**भस्मभिः**	भस्मसे
हता अपि	मारे जानेपर भी	**यत् जल**	जिनके जलका
सगर आत्मजा	राजा सगरके पुत्र	**स्पर्श मात्रेण**	स्पर्श हो जाने मात्रसे
केवलं देह	केवल शरीरकी	**दिवं जग्मुः**	स्वर्ग चले गये ॥१२॥

भस्मीभूतांगसंगेन स्वर्याताः सगरात्मजाः ।
किं पुनः श्रद्धया देवीं ये सेवन्ते धृतव्रताः ॥१३॥

भस्मीभूत अंगसंगेन स्वः याताः सगर आत्मजाः किं पुनः श्रद्धया देवीं ये सेवन्ते धृतव्रताः ॥१३॥

सगर आत्मजाः	राजा सगरके पुत्र	**श्रद्धया**	श्रद्धा पूर्वक
भस्मीभूत	भस्म हो गये	**देवीं**	देवी गंगाका
अंगसंगेन	अंगसे साथ होनेसे	**सेवन्ते**	सेवन करते हैं
स्वः	(जब) स्वर्ग	**किं पुनः**	उनकी क्या चर्चा है ॥१३॥
याताः	चल गये तो		
ये धृतव्रताः	जो व्रत धारण करके		

न ह्येतत् परमाश्चर्यं स्वर्धुन्या यदिहोदितम् ।
अनन्तचरणाम्भोजप्रसूताया भवच्छिदः ॥१४॥

न हि एतत् परम आश्चर्यं स्वर्धुन्या यत् इह उदितं अनन्त चरण अम्भोज प्रसूताया भवच्छिदः ॥१४॥

हि एतत्	क्योंकि यह
स्वर्धुन्या	सुरसरिका
यत्	जो (माहात्म्य)
इह उदितं	यहां कहा गया
परम	बहुत
आश्चर्यं	आश्चर्यजनक
न	नहीं है
अनन्त	श्रीभगवानके
चरण अम्भोज	चरण-कमलसे
प्रसूताया	उत्पन्न हुई गंगाकी
भवच्छिदः	(महिमा तो) संसार बन्धन काटनेवाली है ॥१४॥

संनिवेश्य मनो यस्मिञ्छ्रद्धया मुनयोऽमलाः ।
त्रैगुण्यं दुस्त्यजं हित्वा सद्यो यातास्तदात्मताम् ॥१५॥

संनिवेश्य मनः यस्मिन् श्रद्धया मुनयः अमलाः त्रैगुण्यं दुस्त्यजं हित्वा सद्यः याताः तत् आत्मताम् ॥१५॥

अमलाः मुनयः	निर्मल मुनिगण
श्रद्धया यस्मिन्	श्रद्धापूर्वक जिनमें
मनः	मनको
संनिवेश्य	भली प्रकार प्रविष्ट करके
दुस्त्यजं	दुस्त्यज
त्रैगुण्यं	त्रिगुणमय जगतको
हित्वा सद्यः	त्यागकर तत्काल
तत्	उन भगवानके
आत्मतां	स्वरूपको
याताः	प्राप्त हो गये ॥१५॥

श्रुतो भगीरथाज्जज्ञे तस्य नाभोऽपरोऽभवत् ।
सिन्धुद्वीपस्ततस्तस्मादयुतायुस्ततोऽभवत् ॥१६॥

श्रुतः भगीरथात् जज्ञे तस्य नाभः अपरः अभवत् सिन्धुद्वीपः ततः तस्मात् अयुतायुः ततः अभवत् ॥१६॥

भगीरथात्	भगीरथसे
श्रुतः जज्ञे	श्रुत उत्पन्न हुआ
तस्य	उससे
अपरः नाभः	दूसरा नाभ
अभवत्	उत्पन्न हुआ,
ततः	उससे
सिन्धुद्वीपः	सिन्धुद्वीप
ततः तस्मात्	फिर उससे
अयुतायुः	अयुतायु
अभवत्	उत्पन्न हुआ ॥१६॥

ऋतुपर्णो नलसखो योऽश्वविद्यामयान्नलात् ।
दत्वाक्षहृदयं चास्मै सर्वकामस्तु तत्सुतः ॥१७॥

ऋतुपर्णः नल सखः यः अश्वविद्यां अयात् नलात् दत्त्वा अक्ष हृदयं च अस्मै सर्वकामः तु तत् सुतः ॥१७॥

नल	उससे राजा नलका
सखः	मित्र
ऋतुपर्णः	ऋतुपर्ण हुआ
यः अस्मै च	जिसने इस (नल) को तो
अक्ष हृदयं	पासा फेंकनेका रहस्य
दत्त्वा नलात्	देकर नलसे
अश्वविद्यां	अश्वविद्या
अयात्	सीखी
तत् सुतः तु	उसका पुत्र तो
सर्वकामः	सर्वकाम हुआ ॥१७॥

ततः सुदासस्तत्पुत्रो मदयन्तीपतिर्नृप ।
आहुर्मित्रसहं यं वै कल्माषांघ्रिमुत क्वचित् ।
वसिष्ठशापाद् रक्षोऽभूदनपत्यः स्वकर्मणा ॥१८॥

ततः सुदासः तत् पुत्रः मदयन्ती पतिः नृप आहुः मित्र सहं यं वै कल्माष अंघ्रिम् उतक्वचित् वसिष्ठ शापात् रक्षः अभूत् अनपत्यः स्वकर्मणा ॥१८॥

नृप	राजन् !
ततः सुदासः	उससे सुदास
तत् पुत्रः	उसका पुत्र
मदयन्ती	मदयन्तीका
पतिः	पति हुआ
यं वै	जिसे निश्चय
मित्रसहं	मित्रसह
आहुः	कहा जाता है
उतक्वचित्	और कहीं
कल्माष	कल्माषपाद

अंघ्रिं	भी (कहा गया है)
वसिष्ठ	महर्षि वशिष्ठके
शापात्	शापसे
रक्षः	राक्षस तथा
स्वकर्मणा	अपने कर्मसे
अनपत्यः अभूत्	सन्तानहीन हो गया ॥१८॥

राजोवाच

किं निमित्तो गुरोः शापः सौदासस्य महात्मनः ।
एतद् वेदितुमिच्छामः कथ्यतां न रहो यदि ॥१९॥

किं निमित्तः गुरोः शापः सौदासस्य महात्मनः एतत् वेदितुं इच्छामः कथ्यतां न रहः यदि ॥१९॥

महात्मनः	महात्मा
सौदासस्य	सौदासको
किं निमित्तः	किस कारणसे
गुरोः शापः	गुरुका शाप मिला
एतत् वेदितुं	(हम) इसे जानना
इच्छामः	चाहते हैं
यदि रहः	यदि गोपनीय
न	न हो तो
कथ्यतां	वर्णन कीजिए ॥१९॥

श्रीशुक उवाच—

सौदासो मृगयां किञ्चिच्चरन् रक्षो जघान ह ।
मुमोच भ्रातरं सोऽथ गतः प्रतिचिकीर्षया ॥२०॥

सौदासः मृगयां किञ्चित् चरन् रक्षः जघान ह मुमोच भ्रातरं सः अथ गतः प्रतिचिकीर्षया ॥२०॥

सौदासः	राजा सौदासने
मृगयां	आखेट खेलते समय
किञ्चित् चरन्	कुछ करते हुए
रक्षः	राक्षसको
जघान ह	मार डाला
अथ	किन्तु तब उसके
भ्रातरं	भाईको
मुमोच	छोड़ दिया
सः	वह
प्रतिचिकीर्षया	बदला लेनेकी इच्छासे
गतः	चला गया ॥२०॥

स चिन्तयन्नघं राज्ञः सूदरूपधरो गृहे ।
गुरवे भोक्तुकामाय पक्त्वा निन्ये नरामिषम् ॥२१॥

स चिन्तयत् अघं राज्ञः सूदरूप धरः गृहे गुरवे भोक्तु कामाय पक्त्वा निन्ये नर आमिषम् ॥२१॥

स राज्ञः अघं	वह राजाका अपराध	भोक्तु कामाय	भोजनकी इच्छावाले
चिन्तयत्	विचार करता हुआ	गुरवे	गुरु वशिष्ठको
सूद रूप	रसोइयेका रूप	नर आमिषं	मनुष्य-मांस
धरः	बनाकर	पक्त्वा निन्ये	पकाकर दिया ॥२१॥
गृहे	उनके घर आया,		

परिवेक्ष्यमाणं भगवान् विलोक्याभक्ष्यमञ्जसा ।
राजानमशपत् क्रुद्धो रक्षो ह्येवं भविष्यसि ॥२२॥

परिवेक्ष्यमाणं भगवान् विलोक्य अभक्ष्यं अञ्जसा राजा नं अशपत् क्रुद्धः रक्षः हि एवं भविष्यसि ॥२२॥

भगवान्	भगवान् वशिष्ठने	हि	'क्योंकि
परिवेक्ष्यमाणं	परोसे जाते समय	एवं	इस प्रकार (अभक्ष्य देते हो)
अञ्जसा	सरलतासे	रक्षः	राक्षस
अभक्ष्यं	अभक्ष्य	भविष्यति	जो जाओगे ॥२२॥
विलोक्य क्रुद्धः	देखकर कुपित होकर		
अशपत्	शाप दिया		

रक्षः कृतं तद् विदित्वा चक्रे द्वादशवार्षिकम् ।
सोऽप्यपोऽञ्जलिनाऽऽदाय गुरुं शप्तुं समुद्यतः ॥२३॥

रक्षः कृतं तत् विदित्वा चक्रे द्वादश वार्षिकं सः अपि अपः अञ्जलिना आदाय गुरुं शप्तुं समुद्यतः ॥२३॥

तत् रक्षः	वह काम राक्षसने	द्वादश	(शापको) बारह
कृतं	किया है,	वार्षिकं	वर्षके लिए
विदित्वा	यह जानकर	चक्रे	बना दिया

सः अपि अपः	वह (राजा) भी जल	गुरुं शप्तुं	गुरुको शाप देनेके लिए
अञ्जलिना	अंजलिमें		
आदाय	लेकर	समुद्यतः	उद्यत हुआ ॥२३॥

वारितो मदयन्त्यापो रुशतीः पादयोर्जहौ ।
दिशः खमवनीं सर्वं पश्यञ्जीवमयं नृपः ॥२४॥

वारितः मदयन्त्या आपः रुशतीः पादयोः जहौ दिशः खं अवनीं सर्वं पश्यन् जीवमयं नृपः ॥२४॥

मदयन्त्या	रानी मदयन्तीके	पश्यन्	देखकर
वारितः	रोकनेपर	नृपः रुशतीः	राजाने वह तीक्ष्ण जल
दिशः खं	दिशाओं, आकाश,		
अवनीं सर्वं	पृथ्वी सबको	पादयोः	अपने पैरोंपर
जीवमयं	जीवमय	जहौ	डाल दिया ॥२४॥

राक्षसं भावमापन्नः पादे कल्माषतां गतः ।
व्यवायकाले ददृशे वनौकोदम्पती द्विजौ ॥२५॥

राक्षसं भावं आपन्नः पादे कल्माषतां गतः व्यवाय काले ददृशे वनौकः दम्पती द्विजौ ॥२५॥

पादे कल्माषतां	पैर काले	वनौकः	वनवासी
गतः	पड़ गये,	द्विजौ दम्पती	ब्राह्मण दम्पति
राक्षसं भावं	राक्षस भावको	व्यवाय काले	मैथुन करते हुए
आपन्नः	प्राप्त होनेपर	ददृशे	उसने देखा ॥२५॥

क्षुधार्तो जगृहे विप्रं तत्पत्न्याहाकृतार्थवत् ।
न भवान् राक्षसः साक्षादिक्ष्वाकूणां महारथः ॥२६॥

क्षुधार्तः जगृहे विप्रं तत् पत्न्या आह अकृतार्थवत् न भवान् राक्षसः साक्षात् इक्ष्वाकूणां महारथः ॥२६॥

क्षुधार्तः	भूखसे व्याकुल होकर	भवान् राक्षसः	'आप राक्षस
विप्रं	ब्राह्मणको (उसने)	न	नहीं हैं,
जगृहे	पकड़ लिया	साक्षात्	साक्षात्
अकृतार्थवत्	अपूर्ण कामासी	इक्ष्वाकूणां	इक्ष्वाकु वंशमें उत्पन्न
तत् पत्न्या	उसकी पत्नी	महारथः	महारथी हैं ॥२६॥
आह	बोली—		

मदयन्त्याः पतिर्वीर नाधर्मं कर्तुमर्हसि ।
देहि मेऽपत्यकामाया अकृतार्थं पतिं द्विजम् ॥२७॥

मदयन्त्याः पतिः वीर न अधर्मं कर्तुं अर्हसि देहि मे अपत्य कामाया अकृत अर्थं पतिं द्विजम् ॥२७॥

मदयन्त्याः पतिः	मदयन्तीके पति	अपत्य कामाया	सन्तानेच्छुका को
वीर	वीर !	अर्थं	प्रयोजन
अधर्मं कर्तुं	आपको अधर्म करना	अकृत	पूरा न करनेवाला
न अर्हसि	नहीं चाहिए,	द्विजं पतिं	ब्राह्मण पति
मे	मुझ	देहि	दे दीजिए ॥२७॥

देहोऽयं मानुषो राजन् पुरुषस्याखिलार्थदः ।
तस्मादस्य वधो वीर सर्वार्थवध उच्यते ॥२८॥

देहः अयं मानुषः राजन् पुरुषस्य अखिल अर्थदः तस्मात् अस्य वधः वीर सर्व अर्थ वध उच्यते ॥२८॥

राजन् अयं	राजन् ! यह	वीर तस्मात्	वीर ! इसलिए
मानुषः देहः	मनुष्य शरीर	अस्य वधः	इसका वध
पुरुषस्य	पुरुषको	सर्व अर्थ वधः	सब पुरुषार्थोंका वध
अखिल	समस्त	उच्यते	कहा जाता है ॥२८॥
अर्थदः	पुरुषार्थ देनेवाला है,		

एष हि ब्राह्मणो विद्वाँस्तपः शीलगुणान्वितः ।
आरिराधयिषुर्ब्रह्म महापुरुषसंज्ञितम् ।
सर्वभूतात्मभावेन भूतेष्वन्तर्हितं गुणैः ॥२९॥

एष हि ब्राह्मणः विद्वान् तपः शील गुण अन्वितः आरिरा धयिषुः ब्रह्म महापुरुष संज्ञितं सर्वभूत आत्मभावेन भूतेषु अन्तर्हितं गुणैः ॥२६॥

हि एष	क्योंकि ये	महापुरुष	परम पुरुष
ब्राह्मणः	ब्राह्मण हैं,	संज्ञितं	संज्ञक
विद्वान् तपः	विद्वान् तप,	ब्रह्म	परम ब्रह्मकी
शील गुण	शीलादि गुण	सर्वभूत	सब प्राणियोंमें
अन्वितः	युक्त है,	आत्मभावेन	आत्म भाव द्वारा
गुणैः	गुणोंके द्वारा	आरिरा	आराधना
भूतेषु	प्राणियोंमें	धयिषुः	करना चाहते हैं
अन्तर्हितं	छिपे हुए		॥२६॥

सोऽयं ब्रह्मर्षिवर्यस्ते राजर्षिप्रवराद् विभो ।
कथमर्हति धर्मज्ञ वधं पितुरिवात्मजः ॥३०॥

सः अयं ब्रह्मर्षि वर्यः ते राजर्षि प्रवरात् विभो कथं अर्हति धर्मज्ञ वधं पितुः इव आत्मजः ॥३०॥

विभो धर्मज्ञ	समर्थ धर्मज्ञ !	सः अयं	वह ये
ते राजर्षि	आप राजर्षि	ब्रह्मर्षि वर्यः	ब्रह्मर्षि श्रेष्ठ
प्रवरात्	श्रेष्ठ द्वारा	वधं कथं	वध कैसे
पितुः आत्मजः	पिता द्वारा पुत्रके	अर्हति	पात्र हो सकते हैं
इव	समान		॥३०॥

तस्य साधोरपापस्य भ्रूणस्य ब्रह्मवादिनः ।
कथं वधं यथा बभ्रोर्मन्यते सन्मतो भवान् ॥३१॥

तस्य साधोः अपापस्य भ्रूणस्य ब्रह्मवादिनः कथं वधं यथा बभ्रोः मन्यते सन्मतः भवान् ॥३१॥

सन्मतः	साधु समाजमें सम्मानित	ब्रह्मवादिनः	वेदवादी
भवान्	आप	बभ्रोः	कपिला गौ के
तस्य साधोः	उस सत्पुरुष,	यथा	समानका
अपापस्य	निष्पाप,	वधं कथं	वध कैसे
भ्रूणस्य	श्रोत्रिय,	मन्यते	उचित मानते हैं॥३१॥

यद्ययं क्रियते भक्षस्तर्हि मां खाद पूर्वतः ।
न जीविष्ये विना येन क्षणं च मृतकं यथा ॥३२॥

यदि अयं क्रियते भक्षः तर्हि मां खाद पूर्वतः न जीविष्ये बिना येन क्षणं च मृतकं यथा ॥३२॥

यदि अयं	यदि इनको
भक्षः	भक्ष्य बनाना ही
क्रियते	चाहते हैं
तर्हि मां	तो मुझे
पूर्वतः खाद	पहिले खा लीजिए
येन विना	जिनके बिना
मृतकं यथा	मृतके समान होकर
क्षणं च	एक क्षण भी
जीविष्ये न	जीवित नहीं रहूँगी' ॥३२॥

एवं करुणभाषिण्या विलपन्त्या अनाथवत् ।
व्याघ्रः पशुमिवाखादत् सौदासः शापमोहितः ॥३३॥

एवं करुण भाषिण्या विलपन्त्या अनाथवत् व्याघ्रः पशुं इव अखादत् सौदासः शाप मोहितः ॥३३॥

करुण	दीन
भाषिण्या	वचन कहती
एवं	इस प्रकार
अनाथवत्	अनाथके समान
विलपन्त्या	विलाप करती रहने पर भी
शाप मोहितः	शापसे मोहित
सौदासः	सौदास (ब्राह्मणको)
पशुं	पशुको
व्याघ्रः इव	बाघके समान
अखादत्	खा गया ॥३३॥

ब्राह्मणी वीक्ष्य दिधिषुं पुरुषादेन भक्षितम् ।
शोचन्त्यात्मानमुर्वीशमशपत् कुपिता सती ॥३४॥

ब्राह्मणी वीक्ष्य दिधिषुं पुरुषादेन भक्षितं शोचन्त्या आत्मानं उर्वीशं अशपत् कुपिता सती ॥३४॥

सती ब्राह्मणी	पतिव्रता ब्राह्मणीने
दिधिषुं	गर्भाधान करनेवाले पतिको
पुरुषादेन	नरभक्षी द्वारा
भक्षितं वीक्ष्य	खाया गया देखकर

आत्मानं	अपने लिए	कुपिता उर्वीशं	कुपित होकर राजा-
शोचन्त्या	शोक करती हुई		को
		अशपत्	शाप दिया ।।३४।।

यस्मान्मे भक्षितः पाप कामार्तायाः पतिस्त्वया ।
तवापि मृत्युराधानादकृतप्रज्ञ दर्शितः ।।३५।।

यस्मात् मे भक्षितः पाप काम आर्तायाः पतिः त्वया तव अपि मृत्युः आधानात् अकृत प्रज्ञ दर्शितः ।।३५।।

पाप	'पापी !	अकृत प्रज्ञ	मन्दमते
यस्मात्	क्योंकि	तव अपि	तेरी भी
मे	मुझ	आधानात्	गर्भाधानसे
काम आर्तायाः	कामातुराका	मृत्युः	मृत्यु
पतिः त्वया	पति तेरे द्वारा	दर्शितः	दिखायी देगी' ।।३५।।
भक्षितः	खा लिया गया		

एवं मित्रसहं शप्त्वा पतिलोकपरायणा ।
तदस्थीनि समिद्धेऽग्नौ प्रास्य भर्तुर्गतिं गता ।।३६।।

एवं मित्रसहं शप्त्वा पतिलोक परायणा तत् अस्थीनि समिद्धे अग्नौ प्रास्य भर्तुः गतिं गता ।।३६।।

एवं	इस प्रकार	अस्थीनि	हड्डियोंको
मित्रसहं	मित्रसहको	समिद्धे अग्नौ	प्रज्वलित अग्निमें
शप्त्वा	शाप देकर	प्रास्य भर्तुः	डालकर पतिकी
पतिलोक	पतिलोक	गतिं गता	गतिको चली गयी
परायणा	परायणा		।।३६।।
तत्	उस (पति) की		

विशापो द्वादशाब्दान्ते मैथुनाय समुद्यतः ।
विज्ञाय ब्राह्मणीशापं महिष्या स निवारितः ।।३७।।

विशापः द्वादश अब्द अन्ते मैथुनाय समुद्यतः विज्ञाय ब्राह्मणीशापं महिष्या स निवारितः ॥३७॥

द्वादश अब्द	बारह वर्ष	ब्राह्मणीशापं	ब्राह्मणीका शाप
अन्ते	बीतनेपर	विज्ञाय स	जानकर उसे
विशापः	शापसे छूटकर	महिष्या	महारानीने
मैथुनाय	मैथुन करनेको	निवारितः	रोक दिया ॥३७॥
समुद्यतः	उद्यत होनेपर		

तत ऊर्ध्वं स तत्याज स्त्रीसुखं कर्मणाप्रजाः ।
वसिष्ठस्तदनुज्ञातो मदयन्त्यां प्रजामधात् ॥३८॥

तत ऊर्ध्वं स तत्याज स्त्रीसुखं कर्मणा अप्रजः वसिष्ठः तत् अनुज्ञातः मदयन्त्यां प्रजां अधात् ॥३८॥

तत् ऊर्ध्वं	उससे आगेके लिए	तत् अनुज्ञातः	उसकी अनुमतिसे
स स्त्रीसुखं	उसने स्त्री-सुखका	मदयन्त्यां	मदयन्तीमें
तत्याज	त्याग कर दिया,	वसिष्ठः	वशिष्ठने
कर्मणा	इस कर्मसे	प्रजां	सन्तान
अप्रजाः	सन्तानहीन होनेपर	अधात	स्थापन किया ॥३८॥

सा वै सप्त समा गर्भमबिभ्रन्न व्यजायत ।
जघ्नेऽश्मनोदरं तस्याः सोऽश्मकस्तेन कथ्यते ॥३९॥

सा वै सप्त समा गर्भं अबिभ्रत् न व्यजायत जघ्ने अश्मना उदरं तस्याः सः अश्मकः तेन कथ्यते ॥३९॥

वै सा	निश्चय उस मदयन्तीने	तस्याः	उस पत्नीके
		उदरं अश्मना	पेटको पत्थरसे
सप्त समा	सात वर्ष	जघ्ने	मारा,
गर्भं अबिभ्रत्	गर्भ धारण किये रहीं	तेन	इससे (उत्पन्न पुत्रको)
व्यजायत	जब उत्पन्न		
न	नहीं हुआ	अश्मकः	अश्मक
सः	तब उस राजाने	कथ्यते	कहते हैं ॥३९॥

अश्मकान्मूलको जज्ञे यः स्त्रीभिः परिरक्षितः ।
नारीकवच इत्युक्तो निःक्षत्रे मूलकोऽभवत् ॥४०॥

अश्मकात् मूलकः जज्ञे यः स्त्रीभिः परिरक्षितः नारीकवच इति उक्तः निःक्षत्रे मूलकः अभवत् ॥४०॥

अश्मकात्	अश्मकसे	नारीकवच	उसे नारीकवच
मूलकः जज्ञे	मूलक उत्पन्न हुआ,	इति	इस नामसे
यः	जो	उक्तः	कहा गया
स्त्रीभिः	स्त्रियों द्वारा (परशुरामके क्षत्रिय संहारके समय)	निःक्षत्रे	(पृथ्वीके) क्षत्रिय हीन होनेपर
परिरक्षितः	चारों ओरसे रक्षित किया गया, इसीसे	मूलकः अभवत्	(क्षत्रियोंका) मूल वह हुआ ॥४०॥

ततो दशरथस्तस्मात् पुत्र ऐडविडस्ततः ।
राजा विश्वसहो यस्य खट्वाङ्गश्चक्रवर्त्यभूत् ॥४१॥

ततः दशरथः तस्मात् पुत्र ऐडविडः ततः राजा विश्वसहः यस्य खट्वाङ्गः चक्रवर्ति अभूत् ॥४१॥

ततः दशरथः	उससे दशरथ हुए,	विश्वसहः	विश्वसह हुए,
तस्मात् पुत्र	उनके पुत्र	यस्य चक्रवर्ति	जिनके चक्रवर्ती
ऐडविडः	ऐडविड हुए	खट्वाङ्गः	खट्वाङ्ग
ततः राजा	उनसे राजा	अभूत्	हुए ॥४१॥

यो देवैरर्थितो दैत्यानवधीद् युधि दुर्जयः ।
मुहूर्तमायुर्ज्ञात्वैत्य स्वपुरं संदधे मनः ॥४२॥

यः देवैः अर्थितः दैत्यान् अवधीत् युधि दुर्जयः मुहूर्तं आयुः ज्ञात्वा एत्य स्वपुरं सन्दधे मनः ॥४२॥

यः दुर्जयः	जिन दुर्जय वीरने
देवैः	देवताओंके
अर्थितः	प्रार्थना करनेपर
युधि दैत्यान्	युद्धमें दैत्योंका
अवधीत्	वध किया,
मुहूर्तं आयुः	एक मुहूर्त आयु (शेष)
ज्ञात्वा	जानकर
स्वपुरं एत्य	अपने नगर आकर
मनः	मनको
सन्दधे	भगवान्‌में लगा दिया ॥४२॥

न मे ब्रह्मकुलात् प्राणाः कुलदैवान्न चात्मजाः ।
न श्रियो न मही राज्यं न दाराश्चातिवल्लभाः ॥४३॥

न मे ब्रह्मकुलात् प्राणाः कुलदैवात् न च आत्मजाः न श्रियः न मही राज्यं न दाराः च अतिवल्लभाः ॥४३॥

मे	मुझे अपने
कुलदैवात्	कुलदेवता
ब्रह्मकुलात्	ब्राह्मण वंशसे अधिक
न प्राणाः	न प्राण
च न	और न
आत्मजाः	पुत्र
न श्रियः	न लक्ष्मी
न मही राज्यं	न पृथ्वीका राज्य
च न दाराः	तथा न पत्नियां
अतिवल्लभाः	बहुत प्रिय हैं ॥४३॥

न बाल्येऽपि मतिर्मह्यमधर्मे रमते क्वचित् ।
नापश्यमुत्तमश्लोकादन्यत् किञ्चन वस्त्वहम् ॥४४॥

न बाल्ये अपि मतिः मह्यं हि अधर्मे रमते क्वचित् न अपश्यं उत्तम श्लोकात् अन्यत् किञ्चन वः तु अहम् ॥४४॥

बाल्ये अपि	बचपनमें भी
मह्यं मतिः	मेरी बुद्धि
क्वचित्	कभी
अधर्मे	अधर्ममें
न रमते	नहीं लगती थी
हि	क्योंकि
उत्तम श्लोकात्	पवित्रकीर्ति भगवान्‌से
अन्यत्	पृथक
किञ्चन	कुछ
वः तु अहं	भी तो मैंने
न अपश्यं	नहीं देखा ॥४४॥

देवैः कामवरो दत्तो मह्यं त्रिभुवनेश्वरैः ।
न वृणे तमहं कामं भूतभावनभावनः ॥४५॥

देवैः कामवरः दत्तः मह्यं त्रिभुवन ईश्वरैः न वृणे तं अहं कामं भूत भावन भावनः ॥४५॥

त्रिभुवन ईश्वरैः	त्रिभुवनके स्वामी	भावनः	भावना रखने वाले
देवैः मह्यं	देवताओंने मुझे	अहं	मैने
कामवरः	इच्छानुसार वरदान	तं कामं	उन भोगोंको
दत्तः	देनेको कहा	न वृणे	नहीं मांगा ॥४५॥
भूत भावन	भूत भावन भगवान्-मैं		

ये विक्षिप्तेन्द्रियधियो देवास्ते स्वहृदि स्थितम् ।
न विन्दन्ति प्रियं शश्वदात्मानं किमुतापरे ॥४६॥

ये विक्षिप्त इन्द्रिय धियः देवाः ते स्वहृदि स्थितं न विन्दन्ति प्रियं शश्वत् आत्मानं किं उत अपरे ॥४६॥

ये विक्षिप्त	जो चंचल	शश्वत् प्रियं	नित्य प्रिय
इन्द्रिय धियः	इन्द्रियों और बुद्धि-वाले	आत्मान	आत्माको
		न विन्दन्ति	नहीं जानते
देवाः ते	देवता हैं वे	उत अपरे	फिर दूसरे
स्वहृदि	अपने हृदयमें	किं	कैसे जानेंगे ॥४६॥
स्थितं	स्थित		

अथेशमायारचितेषु सङ्गं
गुणेषु गन्धर्वपुरोपमेषु ।
रूढं प्रकृत्याऽऽत्मनि विश्वकर्तु-
र्भावेन हित्वा तमहं प्रपद्ये ॥४७॥

अथ ईश माया रचितेषु संगं गुणेषु गन्धर्वपुर उपमेषु रूढं प्रकृत्या आत्मनि विश्वकर्तुः भावेन हित्वा तं अहं प्रपद्ये ॥४७॥

अथ ईश	अतः ईश्वरकी	संगं	आसक्तिको
माया	मायासे	विश्वकर्तुः	विश्वकर्ता भगवान्-की
रचितेषु	निर्मित	भावेन हित्वा	भक्ति-भावसे त्याग-कर
गन्धर्वपुर	गन्धर्वनगरीके	अहं तं	मैं उनकी
उपमेषु	समान	प्रपद्ये	शरण लेता हूँ ॥४७॥
प्रकृत्या	स्वभावसे ही		
आत्मनि रूढं	अपनेपर चढ़े हुए		
गुणेषु	त्रिगुणोंकी		

इति व्यवसितो बुद्धया नारायण गृहीतया ।
हित्वान्यभावमज्ञानं ततः स्वं भावमाश्रितः ॥४८॥

इति व्यवसितः बुद्धया नारायण गृहीतया हित्वा अन्य भावं अज्ञानं ततः स्वं भावं आश्रितः ॥४८॥

नारायण	भगवान नारायणमें	अन्य भावं	अन्य भाव (भेद बुद्धि)
गृहीतया	आकृष्ट	हित्वा ततः	त्यागकर फिर
बुद्ध्या इति	बुद्धिसे इस प्रकार	स्वं भावं	आत्म स्वरूपमें
व्यवसितः	निश्चय करके	आश्रितः	स्थित हो गये ॥४८॥
अज्ञानं	अज्ञान जन्य		

यत् तद् ब्रह्म परं सूक्ष्ममशून्यं शून्यकल्पितम् ।
भगवान् वासुदेवेति यं गृणन्ति हि सात्वताः ॥४९॥

यत् तत् ब्रह्म परं सूक्ष्मं अशून्यं शून्य कल्पितं भगवान् वासुदेव इति यं गृणन्ति हि सात्वताः ॥४९॥

यत् सूक्ष्मं	जो सूक्ष्म	सात्वताः हि	भगवद्भक्त-जन तो
अशून्यं	सत्य स्वरूप	भगवान्	भगवान्
शून्य कल्पितं	शून्य समान प्रतीत	वासुदेव	वासुदेव
तत् परं ब्रह्म	वह परम ब्रह्म है	इति गृणन्ति	इस प्रकार कहते हैं
यं	जिसे		॥४६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे सूर्यवंशानुवर्णने नवमोऽध्यायः ॥९॥

अथ दशमोऽध्यायः

श्रीशुक उवाच

खट्वांगाद् दीर्घबाहुश्च रघुस्तस्मात् पृथुश्रवाः ।
अजस्ततो महाराजस्तस्माद् दशरथोऽभवत् ॥१॥

खट्वांगात् दीर्घबाहुः च रघुः तस्मात् पृथुश्रवाः अजः ततः महाराजः तस्मात् दशरथः अभवत् ॥१॥

खट्वांगात्	खट्वांगसे	अजः च तस्मात्	अज, और उनसे
दीर्घबाहुः	दीर्घबाहु	महाराजः	महाराज
तस्मात्	उनसे	दशरथः	दशरथ
पृथुश्रवाः	महायशस्वी	अभवत्	उत्पन्न हुए ॥१॥
रघुः ततः	रघु, उनसे		

तस्यापि भगवानेष साक्षाद् ब्रह्ममयो हरिः ।
अंशांशेन चतुर्धागात् पुत्रत्वं प्रार्थितः सुरैः ।
रामलक्ष्मणभरतशत्रुघ्ना इति संज्ञया ॥२॥

तस्य अपि भगवान् एष साक्षात् ब्रह्ममयः हरिः अंश अंशेन चतुर्धा अगात् पुत्रत्वं प्रार्थितः सुरैः राम लक्ष्मण भरत शत्रुघ्ना इति संज्ञया ॥२॥

सुरैः	देवताओं द्वारा	चतुर्धा	चार रूपसे
प्रार्थितः	प्रार्थना करनेपर	पुत्रत्वं	पुत्र रूपमें
तस्य अपि	उन (दशरथज) से भी	राम लक्ष्मण	राम, लक्ष्मण,
		भरत शत्रुघ्ना	भरत, शत्रुघ्न
एष साक्षात्	यह साक्षात्	इति संज्ञया	इन नामोंसे
ब्रह्ममयः हरिः	ब्रह्म स्वरूप श्रीहरि	अगात्	प्रकट हुए ॥२॥
अंश अंशेन	अपने अंशांशसे		

तस्यानुचरितं राजन्नृषिभिस्तत्वदर्शिभिः ।
श्रुतं हि वर्णितं भूरि त्वया सीतापतेर्मुहुः ॥३॥

तस्य अनुचरितं राजन् ऋषिभिः तत्त्वदर्शिभिः श्रुतं हि वर्णितं भूरि त्वया सीतापतेः मुहुः ॥३॥

राजन्	राजन् !	हि	क्योंकि
तस्य सीतापतेः	उन सीतापतिका	भूरि	विस्तार पूर्वक
अनुचरितं	चरित	वर्णितं	वर्णन किया गया
तत्त्वदर्शिभिः	तत्त्वदर्शी	त्वया मुहुः	तुमने बार-बार
ऋषिभिः	ऋषियों द्वारा	श्रुतं	सुना है ॥३॥

गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं
पद्मपद्भ्यां प्रियायाः
पाणिस्पर्शाक्षमाभ्यां मृजितपथरुजो
यो हरीन्द्रानुजाभ्याम् ।
वैरूप्याच्छूर्पणख्याः प्रियविरहरुषा-
ऽऽरोपितभ्रू विजृम्भ-
त्रस्ताब्धिर्बद्धसेतुः खलदवदहनः
कोसलेन्द्रोऽवतान्नः
॥४॥

गुरु अर्थे त्यक्तराज्यः व्यचरत् अनुवनं पद्मपद्भ्यां प्रियायाः पाणि स्पर्श अक्षमाभ्यां मृजित पथरुजः यः हरीन्द्र अनुजाभ्यां वैरूप्यात् शूर्पणख्याः प्रिय विरह रुषा आरोपित भ्रू विजृम्भ त्रस्त अब्धिः बद्ध सेतुः खलदव दहनः कोसलेन्द्रः अवतात् नः ॥४॥

गुरु अर्थे	पिताके लिए	अक्षमाभ्यां	सहनेमें असमर्थ
त्यक्तराज्यः	राज्य त्यागकर	पद्मपद्भ्यां	कमल-कोमल-चरणों-
प्रियायाः	अपनी प्रियाके भी		से
पाणि स्पर्श	कर-स्पर्शको	अनुवनं	एकसे दूसरे वनमें

व्यचरत्	घूमते रहे,	विरह	वियोग जन्य
हरीन्द्र	उस समय कपिराज हनुमान	रुषा आरोपित	रोषसे चढ़ी
		भ्रू विजृम्भ	भ्रुकुटियोंसे
अनुजाभ्यां	और छोटे भाई लक्ष्मण	त्रस्त अब्धिः	भयभीत समुद्रपर
		बद्ध सेतुः	पुल बाँधकर
यः पथरुजः	जिनकी मार्गकी थकावट	खलदव	दुष्टोंके दलरूपी वनको
मृजित	दूर करते थे,	दहनः	दावानल समान बने
शूर्पणख्याः	शूर्पणखाको	कोसलेन्द्रः	कोशलेन्द्र
वैरूप्यात्	कुरूप करनेके कारण	नः अवतात्	हमारी रक्षा करें ॥४॥
प्रियायाः	प्राप्त प्रियाके		

विश्वामित्राध्वरे येन मारीचाद्या निशाचराः ।
पश्यतो लक्ष्मणस्यैव हता नैर्ऋतपुंगवाः ॥५॥

विश्वामित्र अध्वरे येन मारीच आद्या निशाचराः पश्यतः लक्ष्मणस्य एव हता नैर्ऋत पुंगवाः ॥५॥

विश्वामित्र	विश्वामित्रके	नैर्ऋत पुंगवाः	राक्षसश्रेष्ठ
अध्वरे	यज्ञमें	मारीच आद्या	मारीच आदि
येन	जिन्होंने	निशाचराः	निशाचरोंको
लक्ष्मणस्य	लक्ष्मणजी के	हता	मारा ॥५॥
एव पश्यतः	ही देखते हुए		

यो लोकवीरसमितौ धनुरैशमुग्रं
सीतास्वयंवरगृहे त्रिशतोपनीतम् ।
आदाय बालगजलील इवेक्षुयष्टिं
सज्जीकृतं नृप विकृष्य बभञ्ज मध्ये ॥६॥

यः लोकवीर समितौ धनुः ऐशं उग्रं सीता स्वयंवर गृहे त्रिशतः उपनीतं आदाय बालगज लील इव इक्षुयष्टिं सज्जीकृतं नृप विकृष्य बभञ्ज मध्ये ॥६॥

नृप	राजन् !
लोकवीर	संसारके वीरोंकी
समितौ	सभामें
सीता स्वयंवर	सीता स्वयंवर
गृहे	भवनमें
त्रिशतः	तीन सौ
उपनीतं	व्यक्तियों द्वारा लाया गया
उग्रं ऐशं धनुः	प्रचण्ड शिव धनुष
इक्षुयष्टिं	गन्नेकी छड़ीको
इव	भांति
बालगज	गज शिशुके समान
लील	खेलमें
आदाय	उठाकर,
सज्जीकृतं	प्रत्यंचा चढाकर
विकृष्यय:	खींचकर जिन्होंने
मध्ये बभञ्ज	बीचसे तोड़ दिया

॥६॥

जित्वानुरूपगुणशीलवयोऽङ्गरूपां
सीताभिधां श्रियमुरस्यभिलब्धमानाम् ।
मार्गे व्रजन् भृगुपतेर्व्यनयत् प्ररूढं
दर्पं महीमकृत यस्त्रिरराजबीजाम् ॥७॥

जित्वा अनुरूप गुण शील वयः अंग रूपां सीता अभिधां श्रियं उरसि अभिलब्धमानां मार्गे व्रजन् भृगुपतेः व्यनयत् प्ररूढं दर्पं महीं अकृत यः त्रिः अराज बीजाम् ॥७॥

उरसि	हृदयपर
अभिलब्धमानां	पहिलेसे प्राप्त
सीता अभिधां	सीता नामक
गुण शील	गुण, आचरण,
वयः अंग रूपां	आयु, शरीर, सौन्दर्य-में
अनुरूप	अपने अनुरूप
श्रियं जित्वा	लक्ष्मीको जीतकर
मार्गे व्रजन्	मार्गमें जाते हुए
यः महीं	जिन्होंने पृथ्वीको
त्रिः	तीन (इक्कीस*) वार
अराज	राजाओंके
बीजां	बीजसे हीन

*गीता प्रेसकी सटीक प्रतिमें 'त्रि' का अर्थ इक्कीस दिया गया है; किन्तु उन्होंने ही प्राप्त प्राचीन प्रतिका पाठ-भेद यहां 'त्रिः अराज' के स्थान पर' स्थिर राजण दिया है जो अधिक उपयुक्त लगता है ।

अकृत	कर दिया था, उन	प्ररूढं दर्पं	बहुत बढ़े गर्वको
भृगुपतेः	परशुरामजीके	व्यनयत्	दूर कर दिया ॥७॥

यः सत्यपाशपरिवीतपितुर्निदेशं
स्त्रैणस्य चापि शिरसा जगृहे सभार्यः ।
राज्यं श्रियं प्रणयिनः सुहृदो निवासं
त्यक्त्वा ययौ वनमसूनिव मुक्तसंगः ॥८॥

यः सत्यपाश परिवीत पितुः निदेशं स्त्रैणस्य च अपि शिरसा जगृहे सभार्यः राज्यं श्रियं प्रणयिनः सुहृदः निवासं त्यक्त्वा ययौ वनं असून् इव मुक्तसंगः ॥८॥

सत्यपाश	सत्यके पाशसे	मुक्तसंगः	आसक्तिहीन होकर
परिवीत	बँधे हुए	राज्यं श्रियं	राज्य लक्ष्मी,
स्त्रैणस्य	स्त्रीजित्	प्रणयिनः	प्रेम करनेवाले
च अपि	होनेपर भी	सुहृदः	सम्बन्धी,
पितुः निदेशं	पिताके आदेशको	निवासं	तथा घर
यः सभार्यः	जिन्होंने पत्नीके साथ	त्यक्त्वा	त्यागकर
शिरसा जगृहे	सिरपर धारण किया,	वनं ययौ	वनमें चले गये ॥८॥
असून् इव	प्राणोंके समान		

रक्षःस्वसुर्व्यकृत रूपमशुद्धबुद्धे-
स्तस्याः खरत्रिशिरदूषणमुख्यबन्धून् ।
जघ्ने चतुर्दशसहस्रमपारणीय-
कोदण्डपाणिरटमान उवास कृच्छ्रम् ॥९॥

रक्षः स्वसुः व्यकृत रूपं अशुद्ध बुद्धेः तस्याः खर त्रिशिर दूषण मुख्य बन्धून् जघ्ने चतुर्दश सहस्रं अपारणीय कोदण्डपाणिः अटमान उवास कृच्छ्रम् ॥९॥

अशुद्ध बुद्धेः	अशुद्ध बुद्धिवाली
रक्षः	राक्षस (रावण) की
स्वसुः	बहिनके
रूपं	रूपको
व्यकृत	विकृत कर दिया,
तस्याः खर	उसके खर,
त्रिशिर दूषण	त्रिशिरा, दूषण
बन्धूत्	भाई जिसमें
मुख्य	प्रमुख थे उस
चतुर्दश सहस्रं	चौदह सहस्र
अपारणीय	अपारणीय सेनाको
जघ्ने	मारा
कोदण्डपाणिः	हाथमें धनुष लिए
कृच्छ्रं उवास	फिर बड़े कष्टसे रहे ॥९॥

सीताकथाश्रवणदीपितहृच्छयेन
सृष्टं विलोक्य नृपते दशकन्धरेण ।
जघ्नेऽद्भुतेणवपुषाऽऽश्रमतोऽपकृष्टो
मारीचमाशु विशिखेन यथा कमुग्रः ॥१०॥

सीताकथा श्रवण दीपित हृच्छयेन सृष्टं विलोक्य नृपते दशकन्धरेण जघ्ने अद्भुत एण वपुषा अश्रमतः आपकृष्टः मारीचं आशु विशिखेन यथा कं उग्रः ॥१०॥

नृपते	राजन् !
सीताकथा	सीताकी चर्चा
श्रवण	सुननेसे
दीपित	प्रदीप्त
हृच्छयेन	काम
दशकन्धरेण	दशग्रीव द्वारा (प्रेरित)
अद्भुत	अद्भुत
एण वपुषा	मृग शरीर
सृष्टं मारीचं	बनाये मारीचको
यथा कं	जैसे प्रजापति दक्षको
उग्र	वीरभद्रने
आश्रमतः	बिना परिश्रमके
अपकृष्टः	खींचे गये
विशिखेन	वाणसे
आशु जघ्ने	शीघ्र मार दिया ॥१०॥

रक्षोऽधमेन वृकवद् विपिनेऽसमक्षं
वैदेहराजदुहितर्यपयापितायाम् ।

भ्रात्रा वने कृपणवत् प्रियया वियुक्तः
स्त्रीसंगिनां गतिमिति प्रथयंश्चचार ॥११॥

रक्षः अधमेन वृकवत् विपिने असमक्षं वैदेहराज दुहितरि अपयापितायां भ्रात्रा वने कृपणवत् प्रियया वियुक्तः स्त्री संगिनां गतिं इति प्रथयन् चचार ॥११॥

अधमेन	अधम	स्त्री संगिनां	'स्त्रियसक्तोंकी
रक्षः	राक्षस रावण द्वारा	इति गतिं	यही दशा होती है'
असमक्षं	परोक्षमें	प्रथयन्	यह प्रसिद्ध करते हुए
विपिने	वनमें	प्रियया वियुक्तः	प्रियासे वियुक्त होकर
वृकवत्	भेड़ियेके समान	भ्रात्रा वने	भाईके साथ वनमें
वैदेहराज	विदेहराज-	कृपणवत्	दीनसे होकर
दुहितरि	नन्दिनीके	चचार	घूमते रहे ॥११॥
अपयापितायां	हरण कर लिये जाने पर		

दग्ध्वाऽऽत्मकृत्यहतकृत्यमहन् कबन्धं
सख्यं विधाय कपिभिर्दयितागतिं तैः ।
बुद्ध्वाथ वालिनि हते प्लवगेन्द्र सैन्यै-
र्वेलामगात् स मनुजोऽजभवार्चितांघ्रिः ॥१२॥

दग्ध्वा आत्मकृत्य हत कृत्यं अहन् कबन्धं सख्यं विधाय कपिभिः दयिता गतिं तैः बुद्ध्वा अथ वालिनि हते प्लवगेन्द्र सैन्यैः वेलां अगात् स मनुजः अज भव अर्चित अंघ्रिः ॥१२॥

आत्मकृत्य	अपने (विचित्र) कर्म के कारण	दग्ध्वा	(जटायु) का दाह-संस्कार करके
हत कृत्यं	कर्मोंका नष्ट कर देनेवाले	कबन्धं अहन्	कबन्धको मारा,
		कपिभिः	वानरोंसे

सख्यं विधाय	मित्रता करके
बालिनि	बालिके
हते	मारे जानेपर
तैः वयिता	उन कपियों द्वारा प्रियाकी
गतिं	स्थिति
बुद्ध्वा अथ	जानकर फिर
प्लवगेन्द्र	वानरेन्द्र सुग्रीवकी
सैन्यैः	सेनाके साथ
स अज भव	वे ब्रह्मा, शिव
अर्चित अंघ्रिः	पूजित चरण
मनुजः	मनुष्य रूपधारी
वेलां अगात्	समुद्र किनारे गये ॥१२॥

यद्रोषविभ्रमविवृत्तकटाक्षपात-
संभ्रान्तनक्रमकरो भयगीर्णघोषः ।
सिन्धुः शिरस्यर्हणं परिगृह्य रूपी
पादारविन्दमुपगम्य बभाष एतत् ॥१३॥

यत् रोष विभ्रम विवृत्त कटाक्षपात संभ्रान्त नक्र मकरः भयगीर्ण घोषः सिन्धुः शिरसि अर्हणं परिगृह्य रूपी पादारविन्दं उपगम्य बभाष एतत् ॥१३॥

यत् रोष	जिनके क्रोधसे
विवृत्त	फैले
कटाक्षपात	कटाक्षपातसे
नक्र करमः	घड़ियाल-मगर आदि
सम्भ्रान्त	व्याकुल हो गये,
भयगीर्ण	भयसे स्तम्भित
घोषः	गर्जन
रूपी	मूर्तिमान होकर
सिन्धुः	समुद्र
शिरसि अर्हणं	सिरपर पूजा सामग्री
परिगृह्य	लेकर
पादारविन्दं	उनके चरण-कमलों-के
उपगम्य	समीप आकर
एतत् बभाष	यह बोला ॥१३॥

न त्वां वयं जडधियो नु विदाम भूमन्
कूटस्थमादिपुरुषं जगतामधीशम् ।
यत्सत्त्वतः सुरगणा रजसःप्रजेशा
मन्योश्च भूतपतयः स भवान् गुणेशः ॥१४॥

न त्वां वयं जडधियः नु विदाम भूमन् कूटस्थं आदिपुरुषं जगतां अधीशं यत् सत्वतः सुरगणाः रजसः प्रजेशा मन्योः च भूतपतयः स भवान् गुण ईशः ॥१४॥

वयं जड़धियः	हम जड़ बुद्धि	सुरगणाः	देवगण,
भूमन्	सर्वव्यापक,	रजसः	रजोगुणसे
कूटस्थं	कूटस्थ	प्रजेशा	प्रजापति वर्ग
आदिपुरुषं	आदिपुरुष	च मन्योः	तथा क्रोधरूप (तमो-गुण) से
जगतां	समस्त जगतकें		
अधीशं	अधीश्वर	भूतपसयः	भूतेश्वर उत्पन्न हुए
त्वां नु	आपको तो	स भवान्	वह आप
न विदाम	जानते ही नहीं	गुण ईशः	गुणोंके अधीश्वर हैं ॥१४॥
यत् सत्वतः	जिनके सत्व गुणसे		

कामं प्रयाहि जहि विश्रवसोऽवमेहं
त्रैलोक्यरावणमवाप्नुहि वीर पत्नीम् ।
बध्नीहि सेतुमिह ते यशसो वितत्यै
गायन्ति दिग्विजयिनो यमुपेत्य भूपाः ॥१५॥

कामं प्रयाहि जहि विश्रवसः अवमेहं त्रैलोक्य रावणं अवाप्नुहि वीर पत्नीं बध्नीहि सेतुं इह ते यशसः वितत्यै गायन्ति दिक् विजयिनः यं उपेत्य भूपाः ॥१५॥

कामं	प्रसन्नता पूर्वक	वीर पत्नीं	वीर ! अपनी पत्नी-को
प्रयाहि	जाइये,		
त्रैलोक्य रावणं	त्रिलोकीको रुलाने-वाले	अवाप्नुहि	प्राप्त कीजिए
		यशसः	अपने यश-
विश्रवसः	विश्रवा मुनिके	वितत्यै	विस्तारके लिए
अवमेहं	बुरे मूत्ररूप रावणको	इह सेतुं	यहां सेतु
जहि	मार दीजिए	बध्नीहि	बाँधिए

यं उपेत्य	जिसके समीप आकर	ते गायान्ति	आपका यश गान
दिक् विजयिनः	दिग्विजयी		करेंगे ॥१५॥
भूपाः	राजा लोग		

बद्ध्वोदधौ रघुपतिर्विविधाद्रिकूटैः
सेतुं कपीन्द्रकरकम्पितभूरुहांगैः ।
सुग्रीवनीलहनुमत्प्रमुखैरनीकै-
र्लंङ्कां विभीषणदृशाऽऽविशदग्रदग्धाम् ॥१६॥

बद्ध्वा उदधौ रघुपतिः विविध अद्रि कूटैः सेतुं कपीन्द्र कर कम्पित भूरुह अंगैः सुग्रीव नील हनुमत् प्रमुखैः अनीकैः लङ्कां विभीषण दृशा आविशत् अग्रदग्धाम् ॥१६॥

कपीन्द्र कर	वानर सेनानायकोंके हाथों	अग्रदग्धां	पहिलेसे (हनुमानजी द्वारा) जलाई गयी
कम्पित	(लाये जानेसे) हिलते	लंकां	लंकामें
भूरुह अंगैः	वृक्षोंवाले	विभीषण	विभीषणके
विविध	नाना	दृशा	दिखलाये मार्गसे
अद्रिकूटैः	पर्वत शिखरों द्वारा	सुग्रीव नील	सुग्रीव, नील,
उदधौ सेतुं	समुद्रपर सेतु	हनुमत् प्रमुखैः	हनुमान प्रमुख
बद्ध्वा	बाँधकर	अनीकैः	सेनाके साथ
रघुपतिः	श्रीरघुनाथजीने	आविशत्	प्रवेश किया । १६॥

सा वानरेन्द्रबलरुद्धविहारकोष्ठ-
श्रीद्वारगोपुरसदोवलभीविटंका ।
निर्भज्यमानधिषणध्वजहेमकुम्भ-
शृंगाटका गजकुलैर्ह्रदिनीव घूर्णा ॥१७॥

सा वानरेन्द्र बल रुद्ध विहार कोष्ठ श्रीद्वार गोपुर सदोवल भीविटङ्का निर्भज्यमान धिषण ध्वज हेमकुम्भ शृंग आटका गजकुलैः ह्रदिनी इव घूर्णा ॥१७॥

सा वानरेन्द्र	वह लंका कपिपति-की	धिषण ध्वज	भवनोंकी ध्वजा,
		हेमकुम्भ शृंग	स्वर्णकलश, शिखर
बल रुद्ध	सेनासे घेरी गयी	आटका	रुकावटें (परिखादि)
विहार कोष्ठ	क्रीड़ा-स्थल, कोठे,	निर्भज्यमान	तोड़ी जाती हुई
श्रीद्वार	कोषागार,	गजकुलैः	हाथियोंके समूहसे
गोपुर	नगर द्वार	ह्रदिनी इव	सरिताके समान
सदोवल	पशुशाला,	घूर्णा	मथी जा रही थी
भीविटङ्का	मल्लशालादि तथा		॥१७॥

रक्षःपतिस्तदवलोक्य निकुम्भकुम्भ-
धूम्राक्षदुर्मुखसुरान्तनरान्तकादीन् ।
पुत्रं प्रहस्तमतिकायविकम्पनादीन्
सर्वानुगान् समहिनोदथ कुम्भकर्णम् ॥१८॥

रक्षःपतिः तत् अवलोक्य निकुम्भ कुम्भ धूम्राक्ष दुर्मुख सुरान्त नरान्तक आदीन् पुत्रं प्रहस्तं अतिकाय विकम्पन आदीन् सर्व अनुगान् समहिनोत् अथ कुम्भकर्णम् ॥१८॥

रक्षःपतिः	राक्षसराज (रावण) ने	अतिकाय	अतिकाय,
		विकम्पन	विकम्पन
तत् अवलोक्य	यह देखकर	आदीन्	आदिको
निकुम्भ कुम्भ	निकुम्भ, कुम्भ,	सर्व अनुगान्	सब अनुचरोंको
धूम्राक्ष दुर्मुख	धूम्राक्ष, दुर्मुख,	अथ	तथा
सुरान्त	सुरान्त,	कुम्भकर्णं	कुम्भकर्णको भी
नरान्तक	नरान्तक	समहिनोत्	(युद्ध करने) साथ
आदीन्	आदिको एवं		भेज दिया ॥१८॥
पुत्रं प्रहस्तं	अपने पुत्र प्रहस्त		

तां यातुधानपृतनामसिशूलचाप-
प्रासर्ष्टिशक्तिशरतोमरखंगदुर्गाम् ।

सुग्रीवलक्ष्मणमरुत्सुतगन्धमाद-
नीलांगदर्क्षपनसादिभिरन्वितोऽगात् ॥१६॥

तां यातुधान पृतनां असि शूल चाप प्रास ऋष्टि शक्ति शर तोमर खंग दुर्गां सुग्रीव लक्ष्मण मरुत्सुत गन्धमाद नील अंगद ऋक्ष पनस आदिभिः अन्वितः अगात् ॥१६॥

असि शूल	तलवार, भाला,	सुग्रीव लक्ष्मण	सुग्रीव, लक्ष्मण,
चाप प्रास	धनुष, प्रास,	मरुत्सुत	हनुमान,
ऋष्टि शक्ति	ऋष्टि, शक्ति,	गन्धमाद	गन्ध मादन,
शर तोमर	वाण, गदा,	नील अंगद	नील, अंगद,
खंग दुर्गां	खंगसे दुर्गम	ऋक्ष पनस	जाम्बवान, पनस
तां यातुधान	उस राक्षसोंकी	आदिभिः	आदिके
पृतनां	सेनाके सामने (श्रीराम)	अन्वितः	साथ
		अगात्	गये ॥१६॥

तेऽनीकपा रघुपतेरभिपत्य सर्वे
द्वन्द्वं वरूथमिभपत्तिरथाश्वयोधैः ।
जघ्नुर्द्रुमैर्गिरिगदेषुभिरंगदाद्याः
सीताभिमर्शहतमंगलरावणेशान् ॥२०॥

ते अनीकपा रघुपतेः अभिपत्य सर्वे द्वन्द्वं वरूथं इभ पत्ति रथ अश्व योधैः जघ्नुः द्रुमैः गिरि गद इषुभिः अंगद आद्याः सीता अभिमर्श हत मंगल रावण ईशान् ॥२०॥

ते रघुपतेः	वे श्रीरघुनाथजीके	योधैः	युद्ध करनेवाली
अनीकपा	सेनानायक	वरूथं	राक्षस-सेनाके
अंगद आद्याः	अंगद आदि	अभिपत्य सर्वे	सम्मुख जाकर सबने
इभ पत्ति	गजसेना,	द्वन्द्वं	द्वन्द्व युद्ध करते हुए
रथ अश्व	रथ, अश्वोंपर चढ़कर	द्रुमैः गिरि	वृक्षों, पर्वत,
		गद इषुभिः	गदा तथा वाणोंसे

सीता	सीताजी का	रावण ईशान्	रावण जिनका स्वामी था
अभिमर्श	स्पर्श करनेके कारण	जघ्नुः	(उन्हें) मारने लगे ॥२०॥
हत मंगल	मंगलहीन हुए		

रक्षः पतिः स्वबलनष्टिमवेक्ष्य रुष्ट
आरुह्ययानकमथाभिससार रामम् ।
स्वःस्यन्दनेद्यु मति मातलिनोपनीते
विभ्राजमानमहनन्निशितैः क्षुरप्रैः ॥२१॥

रक्षः पतिः स्वबल नष्टि अवेक्ष्य रुष्ट आरुह्य यानकं अथ अभिससार रामं स्वः स्यन्दनेद्यु मति मातलिना उपनीते विभ्राजमानं अहनन् निशितैः क्षुरप्रैः ॥२१॥

स्वबल	अपनी सेनाका	विभ्राजमानं	तेजोमय
नष्टि	विनाश	स्वः	स्वर्गीय
अवेक्ष्य रुष्ट	देखकर क्रुद्ध	स्यन्दनेद्यु	रथपर (विराजमान)
रक्षःपतिः	राक्षसराज	रामं	श्रीरामकी
यानकं	विमानपर	अभिससार	ओर वेगसे चला
आरुह्य	चढ़कर (आया)	निशितैः क्षुरप्रैः	और तीक्ष्ण बाणोंसे
अथ मातलिना	फिर मातालि द्वारा	अहनन्	(उनपर) आघात किया ॥२१॥
उपनीते	लाये गये		

रामस्तमाह पुरुषादपुरीष यन्न
कान्तासमक्षमसतापहृता श्ववत् ते ।
त्यक्तत्रपस्य फलमद्य जुगुप्सितस्य
यच्छामि काल इव कर्तुरलङ्घ्यवीर्यः ॥२२॥

रामः तं आह पुरुषाद पुरीष यत् नः कान्ता असमक्षं असता अपहृता श्ववत् ते त्यक्त त्रपस्य फलं अद्य जुगुप्सितस्य यच्छामि काल इव कर्तुः अलङ्घ्यवीर्यः ॥२२॥

रामः तं आह	श्रीरामने उससे कहा—
पुरुषाद	अरे नरभक्षियोंकी
पुरीष	विष्ठारूप !
ते असता	तुझ पापीने
श्ववत्	कुत्तेकी भांति
असमक्षं	मेरी अनुपस्थितिमें
कान्ता	मेरी प्रियाका
अपहृता	हरण कर लिया
त्यक्त	अतः (तुझ)
त्रपस्य	लज्जाहीनको
जुगुप्सितस्य	उस निन्दित कर्मका
फलं अद्य	फल आज
अमोघवीर्यः	अमोघ पराक्रम
काल इव	कालकी भांति
कर्तुः यच्छामि	(पाप) कर्माको देता हूँ ॥२२॥

एवं क्षिपन् धनुषि संधितमुत्ससर्ज
बाणं स वज्रमिव तद्धृदयं बिभेद ।
सोऽसृग् वमन् दशमुखैर्न्यपतद् विमाना-
द्धाहेति जल्पति जने सुकृतीव रिक्तः ॥२३॥

एवं क्षिपन् धनुषि सन्धितं उत्ससर्ज बाणं स वज्रं इव तत् हृदयं बिभेद सः असृक् वमन् दशमुखैः न्यपतत् विमानात् हा हा इति जल्पति जने सुकृती इव रिक्तः ॥२३॥

एवं	इस प्रकार
क्षिपन्	आक्षेप करते हुए
धनुषि	धनुषपर
सन्धितं	चढ़ाया हुआ
बाणं उत्ससर्ज	बाण छोड़ दिया
स	उस (बाण) ने
वज्रं इव	वज्रकी भांति
तत् हृदयं	उसके हृदयको
बिभेद	विदीर्ण कर दिया
स दशमुखैः	वह दसो मुखोंसे
असृक् वमन्	रक्त वमन करता हुआ
जने हा हा	लोगोंके 'हाय-हाय'
इति	इस प्रकार
जल्पति	पुकारते हुए
रिक्तः सुकृती	क्षीण पुण्य पुण्यात्माके
इव	समान
विमानात्	विमानसे
न्यपतत्	गिर पड़ा ॥२३॥

ततो निष्क्रम्य लंकाया यातुधान्यः सहस्रशः ।
मन्दोदर्या समं तस्मिन् प्ररुदत्य उपाद्रवन् ॥२४॥

ततः निष्क्रम्य लङ्काया यातु धान्यः सहस्रशः मन्दोदर्या समं तस्मिन् प्ररुदत्य उप आद्रवन् ॥२४॥

ततः लङ्कायाः	तब लंकासे	प्ररुदत्य	रोती हुई
निष्क्रम्य	निकलकर	तस्मिन्	उस (रणभूमिमें)
सहस्रशः	सहस्रों	उप	उसके पास
यातु धान्यः	राक्षसियां	आद्रवन्	दौड़ी आयीं ॥२४॥
मन्दोदर्या समं	मन्दोदरीके समान		

स्वान् स्वान् बन्धून् परिष्वज्य लक्ष्मणेषुभिरर्दितान् ।
रुरुदुः सुस्वरं दीना घ्नन्त्य आत्मानमात्मना ॥२५॥

स्वान्-स्वान् बन्धून् परिष्वज्य लक्ष्मण इषुभिः अर्दितान् रुरुदुः सुस्वरं दीना घ्नन्त्य आत्मानं आत्मना ॥२५॥

लक्ष्मण	लक्ष्मणके	आत्मना	अपने आप
इषुभिः	बाणोंसे	आत्मानं	अपनेको
अर्दितान्	दलित	घ्नन्त्य दीना	पीटती हुई वे बेचारी
स्वान्-स्वान्	अपने-अपने	सुस्वरं	उच्च स्वरसे
बन्धून्	सम्बन्धियोंका	रुरुदुः	रोने लगीं ॥२५॥
परिष्वज्य	आलिंगन करके		

यातुधान्य। उचु*

हा हताः स्म वयं नाथ लोकरावण रावण ।
कं यायाच्छरणं लंका त्वद्विहीना परार्दिता ॥२६॥

हा हताः स्म वयं नाथ लोकरावण रावण कं यायात् शरणं लंका त्वत् विहीना पर अर्दिता ॥२६॥

---

*यह उवाच अन्य प्रतियोंमें नहीं है ।

हा नाथ	'हा स्वामी !
वयं हताः	हम मारी गयीं,
लोकरावण	लोकोंको रुलानेवाले
रावण	रावण
त्वत् विहीना	तुम्हारे बिना
पर अर्दिता	शत्रुओं द्वारा रौंदी गयी
लङ्का कं शरणं	किसकी शरणमें
यायात्	जायगी ॥२६॥

नैवं वेद महाभाग भवान् कामवशं गतः ।
तेजोऽनुभावं सीताया येन नीतो दशामिमाम् ॥२७॥

न एवं वेद महाभाग भवान् कामवशं गतः तेजः अनुभावं सीताया येन नीतः दशां इमाम् ॥२७॥

महाभाग	महाभाग
भवान्	आप
कामवंश गतः	कामके वशमें होकर
सीताया एवं	सीताके इस प्रकारके
तेजः अनुभावं	तेज और प्रभावको
न वेद	नहीं जान सके
येन इमां	जिसने इस
दशां नीतः	दशामें पहुँचा दिया

कृतैषा विधवा लंका वयं च कुलनन्दन ।
देहः कृतोऽन्नं गृध्राणामात्मा नरकहेतवे ॥२८॥

कृता एषा विधवा लङ्का वयं च कुलनन्दन देहः कृतः अन्नं गृध्राणां आत्मा नरक हेतवे ॥२८॥

कुलनन्दन	कुलनन्दन !
एषा लंका च	यह लंका और
वयं	हम सबको (तुमने)
विधवा कृता	विधवा बना दिया,
देहः गृध्राणां	शरीरको गीधोंका
अन्नं आत्मा	भोजन तथा अपनेको
नरक हेतवे	नरक जाने योग्य
कृतः	बना दिया ॥२८॥

श्रीशुक उवाच

स्वानां विभीषणश्चक्रे कोसलेन्द्रानुमोदितः ।
पितृमेधविधानेन यदुक्तं साम्परायिकम् ॥२९॥

स्वानां विभीषणः चक्रे कोसलेन्द्र अनुमोदितः पितृमेध विधानेन यत् उक्तं साम्परायिकम् ॥२६॥

पितृमेध	पितृयज्ञकी	कोसलेन्द्र	श्रीरामकी
विधानेन	विधिसे	अनुमोदितः	अनुमतिसे
यत्	जो	विभीषणः	विभीषणने
साम्परायिकं	मरणोत्तर क्रिया	स्वानां	अपने संबन्धियोंकी
उक्तं	शास्त्रने कही है वह	चक्रे	सम्पन्न की ॥२६॥

ततो ददर्श भगवानशोकवनिकाश्रमे ।
क्षामां स्वविरहव्याधिं शिंशपामूलमास्थिताम् ॥३०॥

ततः ददर्श भगवान् अशोक वनिका आश्रमे क्षामां स्वविरह व्याधिं शिंशुपामूलं आस्थिताम् ॥३०॥

ततः भगवान्	तब भगवान् श्रीरामने	स्वविरह	अपने विरह
अशोक वनिका	अशोक वाटिकाके	व्याधिं	रूपी रोगसे
आश्रमे	आश्रममें	क्षामां	दुबली पड़ी
शिंशुपामूल	शीशमकी जड़के पास	ददर्श	(सीताजी) को देखा
आस्थितां	बैठी हुई		॥३०॥

रामः प्रियतमां भार्यां दीनां वीक्ष्यान्वकम्पत ।
आत्मसंदर्शनाह्लादविकसन्मुखपंकजाम् ॥३१॥

रामः प्रियतमां भार्यां दीनां वीक्ष्य अन्वकम्पत आत्म संदर्शन आह्लाद विकसन् मुखपङ्कजाम् ॥३१॥

आत्म संदर्शन	अपने दर्शनके	दीनां वीक्ष्य	दीना देखकर
आह्लाद	आनन्दसे	रामः	श्रीरामने
विकसन्	खिले हुए	अन्वकम्पत	उनपर कृपा की
मुखपङ्कजां	मुख कमलवाली		॥३१॥
प्रियतमां भार्यां	अत्यन्त प्रिया पत्नी-को		

आरोप्यारुरुहे यानं भ्रातृभ्यां हनुमद्युतः ।
विभीषणाय भगवान् दत्वा रक्षोगणेशताम् ॥३२॥

आरोप्य आरुरुहे यानं भ्रातृभ्यां हनुमत् युतः विभीषणाय भगवान् दत्त्वा रक्षः गण ईशताम् ॥३२॥

विभीषणाय	विभीषणको	हनुमत् युतः	हनुमानजीके साथ
रक्षः गण	राक्षसोंका	भगवान् यानं	भगवान् (पुष्पक) विमानपर
ईशतां दत्त्वा	स्वामित्व देकर	आरुरुहे	चढ़े ॥३२॥
आरोप्य	(उनको) चढ़ाकर		
भ्रातृभ्यां	भाई तथा		

लंकामायुश्च कल्पान्तं ययौ चीर्णव्रतः पुरीम् ।
अवकीर्यमाणः कुसुमैर्लोकपालार्पितैः पथि ॥३३॥

लङ्कां आयुः च कल्पान्तं ययौ चीर्ण व्रतः पुरीं अवकीर्यमाणः कुसुमैः लोकपाल अर्पितैः पथि ॥३३॥

लङ्कां	लङ्का तथा	अवकीर्यमाण	वर्षा होते हुए
कल्पान्तं	कल्प पर्यन्तकी	चीर्ण व्रतः	(चौदह वर्ष वनमें रहनेका) व्रत पूर्ण करके
आयुः	आयु (भी देकर)	पुरीं ययौ	अयोध्यपुरी गये ॥३३॥
पथि	मार्गमें		
लोकपाल	लोकपालों द्वारा		
अर्पितैः	की गयी		
कुसुमैः	पुष्प		

उपगीयमानचरितः शतधृत्यादिभिर्मुदा ।
गोमूत्रयावकं श्रुत्वा भ्रातरं वल्कलाम्बरम् ॥३४॥

उपगीयमान चरितः शतधृति आदिभिः मुदा गोमूत्र यावकं श्रुत्वा भ्रातरं वल्कल अम्बरम् ॥३४॥

मुदा शतधृति आनन्दपूर्वक ब्रह्मा । आदिभिः आदि द्वारा

चरितः	जिनका चरित	गोमूत्र	गोमूत्र
उपगीयमान	गाया जाता है	यावकं	यावक व्रती* तथा
	उन्होंने	वल्कल अम्बरं	वल्कल-वस्त्रधारी
भ्रातरं	भाई भरतको	श्रुत्वा	सुनकर ॥३४॥

महाकारुणिकोऽतप्यज्जटिलं स्थण्डिलेशयम् ।
भरतः प्राप्तमाकर्ण्य पौरामात्यपुरोहितैः ॥३५॥

महाकारुणिकः अतप्यत् जटिलं स्थण्डिलेशयं भरतः प्राप्तं आकर्ण्य पौर अमात्य पुरोहितैः ॥३५॥

जटिलं	जटाधारी,	भरतः	भरतने
स्थण्डिलेशयं	वेदीपर सोनेवाला	प्राप्तं आकर्ण्य	उनको आया सुनकर
	(जानकर)	पौर अमात्य	नगरजन, मन्त्री तथा
महाकारुणिकः	महाकरुणामय	पुरोहितैः	पुरोहितके साथ
	(रघुनाथजी)		॥३५॥
अतप्यत्	अत्यन्त संतप्त हुए।		

पादुके शिरसि न्यस्य रामं प्रत्युद्यतोऽग्रजम् ।
नन्दिग्रामात् स्वशिबिराद् गीतवादित्रनिःस्वनैः ॥३६॥

पादुके शिरसि न्यस्य रामं प्रति उद्यतः अग्रजं नन्दिग्रामात् स्वशिबिरात् गीत वादित्र निःस्वनैः ॥३६॥

स्वशिबिरात्	अपने शिविर	पादुके	(श्रीरामकी) चरण
नन्दिग्रामात्	नन्दिग्रामसे		पादुकाओंको
गीत वादित्र	गायन, वाद्यकी	शिरसि न्यस्य	सिरपर रखकर
निःस्वनैः	ध्वनिके साथ	अग्रजं रामं	बड़े भाई श्रीरामकी
		प्रति उद्यतः	ओर चले ॥३६॥

* गौ को जौ खिलानेपर जब वह गोबरमें निकलता है तब उसका दलिया बनाकर गोमूत्रमें ही पकाकर खाना 'गोमूत्र यावक' व्रत है।

ब्रह्मघोषेण च मुहुः पठद्भिर्ब्रह्मवादिभिः ।
स्वर्णकक्षपताकाभिर्हेमैश्चित्रध्वजै रथैः ॥३७॥

ब्रह्मघोषेण च मुहुः पठत् भिः ब्रह्मवादिभिः स्वर्ण कक्ष पताकाभिः हेमैः चित्रध्वजै रथैः ॥३७॥

च मुहुः	तथा बार-बार	पताकाभिः	पताकाओंसे (अलंकृत)
ब्रह्मवादिभिः	वेदज्ञों द्वारा	हेमैः	स्वर्णके
ब्रह्मघोषेण	उच्च स्वरसे	चित्रध्वजैः	अनेक प्रकारके ध्वजोंसे युक्त
पठद्भिः	वेदपाठ करते हुए,	रथैः	रथोंके साथ ॥३७॥
स्वर्ण कक्ष	सुनहरी कामदार		

सदश्वै रुक्मसन्नाहैर्भटैः पुरटवर्मभिः ।
श्रेणीभिर्वारमुख्याभिर्भृत्यैश्चैव पदानुगैः ॥३८॥

सत् अश्वैः रुक्मसन्नाहैः भटैः पुरटवर्मभिः श्रेणीभिः वारमुख्याभिः भृत्यैः च एव पद अनुगैः ॥३८॥

रुक्म सन्नाहैः	स्वर्ण साज-सज्जा सज्जित	वारमुख्याभिः	वारांनाओंकी
सत् अश्वैः	उत्तम अश्वों,	श्रेणीभिः	मण्डलियों
पुरटवर्मभिः	स्वर्ण-कवचधारी	च पद अनुगैः	तथा पैदल चलनेवाले
भटैः	सैनिक गण,	भृत्यैः एव	सेवकोंके साथ भी ॥३८॥

पारमेष्ठ्यान्युपादाय पण्यान्युच्चावचानि च ।
पादयोर्न्यपतत् प्रेम्णा प्रक्लिन्नहृदयेक्षणः ॥३९॥

पारमेष्ठ्यात् उपादाय पण्यानि उच्च अवचानि च पादयोः न्यपतत् प्रेम्णा प्रक्लिन्न हृदय ईक्षणः ॥३९॥

पारमेष्ठ्यात्	महाराजाओंके योग्य तथा	उच्च अवचानि	बड़ी-छोटी

पण्यानि च	बाजारमें बिकनेवाली सामग्री भी	प्रक्लिन्न हृदय	आर्द्र हृदय तथा
		ईक्षणः	नेत्र
उपादाय	साथ लेकर	पादयोः	चरणोंपर
प्रेम्णा	प्रेमके कारण	न्यपतत्	गिर पड़े ॥३९॥

पादुके न्यस्य पुरतः प्राञ्जलिर्वाष्पलोचनः ।
तमाश्लिष्य चिरं दोर्भ्यां स्नापयन् नेत्रजैर्जलैः ॥४०॥

पादुके न्यस्य पुरतः प्राञ्जलिः वाष्पलोचनः तं आश्लिष्य चिरं दोर्भ्यां स्नापयत् नेत्रजैः जलैः ॥४०॥

पादुके पुरतः न्यस्य	पादुकाओंको सम्मुख रखकर	नेत्रजैः	(श्रीरामने) अपने नेत्रोंके
प्राञ्जलिः	हाथ जोड़े	जलैः	जलसे
वाष्पलोचनः	आँसू भरे नेत्र	स्नापयत्	स्नान करा दिया ॥४०॥
तं दोर्भ्यां आश्लिष्य	उनको भुजाओंसे आलिंगन करके		

रामो लक्ष्मणसीताभ्यां विप्रेभ्यो येऽर्हसत्तमाः ।
तेभ्यः स्वयं नमश्चक्रे प्रजाभिश्च नमस्कृतः ॥४१॥

रामः लक्ष्मण सीताभ्यां विप्रेभ्यः ये अर्हसत्तमाः तेभ्यः स्वयं नमः चक्रे प्रजाभिः च नमस्कृतः ॥४१॥

लक्ष्मण सीताभ्यां	लक्ष्मण, सीताके साथ	विप्रेभ्यः तेभ्यः	जो ब्राह्मण थे उनको
रामः स्वयं	श्रीरामने स्वयं	नमः चक्रे	प्रणाम किया
ये अर्हसत्तमाः	जो परम पूजनीय	च प्रजाभिः	तथा प्रजा द्वारा
		नमस्कृतः	नमस्कृत हुए ॥४१॥

धुन्वन्त उत्तरासङ्गान् पतिं वीक्ष्य चिरागतम् ।
उत्तराः कोसला माल्यैः किरन्तो ननृतुर्मुदा ॥४२॥

धुन्वन्त उत्तर आसङ्गान् पतिं वीक्ष्य चिर आगतं उत्तराः कोसला माल्यैः किरन्तः ननृतुः मुदा ॥४२॥

चिर आगतं	बहुत दिनों बाद आये	आसङ्गान्	वस्त्रोंको
पतिं	अपने स्वामीको	मुदा धुन्वन्त	हर्षसे हिलाते हुए
वीक्ष्य	देखकर	माल्यैः किरन्तः	मालाओंकी वर्षा करते हुए
उत्तराः	उत्तर		
कोसला	कोशलके लोग	ननृतुः	नाचने लगे ॥४२॥
उत्तराः	उत्तरीय		

पादुके भरतोऽगृह्णाच्चामरव्यजनोत्तमे ।
विभीषणः ससुग्रीवः श्वेतच्छत्रं मरुत्सुतः ॥४३॥

पादुके भरतः अगृह्णात् चामर व्यजन उत्तमे विभीषणः ससुग्रीवः श्वेतछत्रं मतत्सुतः ॥४३॥

भरतः पादुके	भरतने पादुकाओं-को,	व्यजन	व्यजनको
		मरुत्सुतः	पवनपुत्रने
ससुग्रीवः	सुग्रीवके साथ	श्वेतछत्रं	श्वेत छत्र
विभीषणः	विभीषणने	अगृह्णत्	ग्रहण किया ॥४३॥
उत्तमे चामर	श्रेष्ठ चमर तथा		

धनुर्निषङ्गाञ्छत्रुघ्नः सीता तीर्थकमण्डलुम् ।
अबिभ्रदङ्गदः खड्गं हैमं चर्मर्क्षराण् नृप ॥४४॥

धनुः निषंगान् शत्रुघ्नः सीता तीर्थ कमण्डलुं अबिभ्रत् अंगदः खड्गं हैमं चर्म ऋक्षरद् नृप ॥४४॥

नृप	राजन !	सीता	सीताजी ने
धनुः निषंगान्	धनुष तथा तरकशों-को	खड्गं अंगदः	खड्ग अंगदने
		हैमं चर्म	स्वर्णिम ढाल
शत्रुघ्नः	शत्रुघ्नने,	ऋक्षराट्	जाम्बवानने
तीर्थं	तीर्थ जलके	अबिभ्रत्	धारण किया ॥४४॥
कण्डलु	कमण्डलुको		

पुष्पकस्थोऽन्वितः स्त्रीभिः स्तूयमानश्च वन्दिभिः ।
विरेजे भगवान् राजन् ग्रहैश्चन्द्र इवोदितः ॥४५॥

पुष्पकस्थः अन्वितः स्त्रीभिः स्तूयमानः च वन्दिभिः विरेजे भगवान् राजन् ग्रहैः चन्द्र इव उदितैः ॥४५॥

राजन्	राजन् !	ग्रहैः उदितैः	ग्रह मण्डलमें उदित
स्त्रीभिः	स्त्रियोंसे	चन्द्र इव	चन्द्रमाके समान
अन्वितः	घिरे	भगवान्	भगवान्
पुष्पकस्थः	पुष्पकमें बैठे	विरेजे	राम शोभित हुए
च वन्दिभिः	तथा बन्दीजनों द्वारा		॥४५॥
स्तूयमानः	स्तुत होते		

भ्रातृभिर्नन्दितः सोऽपि सोत्सवां प्राविशत् पुरीम् ।
प्रविश्य राजभवनं गुरुपत्नीः स्वमातरम् ॥४६॥

भ्रातृभिः नन्दितः सः अपि स उत्सवां प्राविशत् पुरीं प्रविश्य राजभवनं गुरुपत्नीः स्वमातरम् ॥४६॥

भ्रातृभिः	भाइयों द्वारा	प्रविश्य	प्रवेश करके
नन्दितः	सम्मानित होकर	गुरुपत्नीः	गुरुजनोंकी पत्नियों
स उत्सवां पुरीं	उत्सव युक्ता पुरीमें	स्वमातरं	तथा अपनी माताको
सः अपि	वे भी		॥४६॥
राजभवनं	राजभवनमें		

गुरून् वयस्यावरजान् पूजितः प्रत्यपूजयत् ।
वैदेही लक्ष्मणश्चैव यथावत् समुपेयतुः ॥४७॥

गुरून् वयस्य अवरजान् पूजितः प्रत्यपूजयत् वैदेही लक्ष्मणः च एव यथावत् सम उपेयतुः ॥४७॥

गुरून्	गुरुजनोंका	वैदेही च	सीता तथा
प्रत्यपूजयत्	सत्कार किया,	लक्ष्मणः एव	लक्ष्मण भी
वयस्य	सखाओं तथा	यथावत्	यथोचित रूपसे
अवरजान्	छोटों द्वारा	सम	भली प्रकार
पूजितः	सत्कृत हुए	उपेयतुः	सबसे मिले ॥४७॥

पुत्रान् स्वमातरस्तास्तु प्राणांस्तन्व इवोत्थिताः ।
आरोप्यांकेऽभिषिञ्चन्त्यो बाष्पौघैर्विजहुः शुचः ॥४८॥

पुत्रान् स्वमातरः ताः तु प्राणान् तन्व इव उत्थिताः आरोप्य अङ्के अभिषिञ्चन्त्यः वाष्प ओघैः विजहुः शुचः ॥४८॥

तन्वः प्राणान्	शरीरमें प्राणोंके	आरोप्य	बैठाकर
उत्थिताः इव	जाग उठनेके समान	वाष्प ओघैः	आंसूकी बाढ़से
ताः तु	वे तो उनकी	अभिषिञ्चन्त्यः	स्नान कराती हुई
स्वमातरः	अपनी माताओंने	शुचः विजहुः	शोक त्याग दिया
पुत्रान् अङ्के	पुत्रोंको गोदमें		॥४८॥

जटा निर्मुच्य विधिवत् कुलवृद्धैः समं गुरुः ।
अभ्यषिञ्चद् यथैवेन्द्रं चतुःसिन्धुजलादिभिः ॥४९॥

जटा निर्मुच्य विधिवत् कुलवृद्धैः समं गुरुः अभ्यसिञ्चत् यथा इन्द्रं चतुःसिन्धु जल आदिभिः ॥४९॥

जटा निर्मुच्य	जटाएँ सुलझाकर	जल	जल
कुलवृद्धैः समं	कुलके बड़ोंके साथ	आदिभिः	आदिसे
गुरुः	गुरु वशिष्ठने	यथा इन्द्रं	जैसे इन्द्रका
विधिवत्	विधिपूर्वक	अभ्यषिञ्चत्	अभिषेक किया
चतुःसिन्धु	चारों समुद्रोंके		॥४९॥

एवं कृतशिरःस्नानः सुवासाः स्रग्व्यलङ्कृतः ।
स्वलङ्कृतैः सुवासोभिर्भ्रातृभिर्भार्यया बभौ ॥५०॥

एवं कृत शिरः स्नानः सुवासाः स्रक्वि अलङ्कृतः स्वलंकृतैः सुवासोभिः भ्रातृभिः भार्यया बभौ ॥५०॥

एवं शिरः	इस प्रकार सिरसे	स्वलंकृतैः	आभूषण धारण किए
स्नानः कृत	स्नान करके,	सुवासोभिः	उत्तम वस्त्रवाले
सुवासाः	उत्तम वस्त्र तथा	मातृभिः	भाइयों तथा
स्रक्वि	माला और	भार्यया	पत्नीके साथ
अलंकृतः	आभूषण धारण करके	बभौ	शोभित हुए ॥५०॥

अग्रहीदासनं भ्रात्रा प्रणिपत्य प्रसादितः ।
प्रजाः स्वधर्मनिरता वर्णाश्रमगुणान्विताः ।
जुगोप पितृवद् रामो मेनिरे पितरं च तम् ॥५१॥

अग्रहीत् आसनं भ्रात्रा प्रणिपत्य प्रसादितः प्रजाः स्वधर्म निरता वर्ण आश्रम गुण अन्विताः जुगोप पितृवत् रामः मेनिरे पितरं च तम् ॥५१॥

भ्रात्रा	भाई (भरत) द्वारा	गुण अन्विताः	धर्मयुक्त
प्रणिपत्य	प्रणाम करके	प्रजाः रामः	प्रजाकी श्रीरामने
प्रसादितः	प्रसन्न किये जानेपर	पितृवत्	पिताकी भांति
आसनं	राजसिंहासन	जुगोप	रक्षा की
अग्रहीत्	ग्रहण किया,	च तं	तथा (प्रजाने)
स्वधर्म	अपने-अपने धर्ममें	पितरं	उनको पिता
निरता	तत्पर	मेनिरे	माना ॥५१॥
वर्ण आश्रम	वर्ण-आश्रम		

त्रेतायां वर्तमानायां कालः कृतसमोऽभवत् ।
रामे राजनि धर्मज्ञे सर्वभूतसुखावहे ॥५२॥

त्रेतायां वर्तमानायां कालः कृतसमः अभवत् रामे राजनि धर्मज्ञे सर्वभूत सुख आवहे ॥५२॥

सर्वभूत सुख	सब प्राणियोंको सुख	वर्तमानायां	रहनेपर भी
आवहे धर्मज्ञे	सुख देनेवाले धर्मज्ञ	कृतसमः	सतयुगके समान
रामे	श्रीरामके	कालः	समय
राजनि	राजा होनेपर	अभवत्	हो गया था ॥५२॥
त्रेतायां	त्रेता युगके		

वनानि नद्यो गिरयो वर्षाणि द्वीपसिन्धवः ।
सर्वे कामदुघा आसन् प्रजानां भरतर्षभ ॥५३॥

वनानि नद्यः गिरयः वर्षाणि द्वीप सिन्धवः सर्वे कामदुघा आसन् प्रजानां भरतर्षभ ॥५३॥

भरतर्षभ	भरत वंशमें श्रेष्ठ परीक्षित् !	प्रजानां	प्रजाके लिए
		कामदुधा	कामनाएँ पूर्ण करनेवाले
वनानि नद्यः	वन, नदियां,		
गिरयः वर्षाणि	पर्वत, प्रदेश,	आसन	हो गये थे ॥५३॥
द्वीप सिन्धवः	(सातों) द्वीप और समुद्र		

नाधिव्याधिजराग्लानिदुःखशोकभयक्लमाः ।
मृत्युश्चानिच्छतां नासीद् रामे राजन्यधोक्षजे ॥५४॥

न आधिव्याधि जरा ग्लानि दुःख शोक भयः क्लमाः मृत्युः च अनिच्छतां न आसीत् रामे राजनि अधोक्षजे ॥५४॥

अधोक्षजे	भगवान् हृषीकेश	न च	नहीं थे तथा
रामे राजनि	श्रीरामके राज्यमें	अनिच्छतां	इच्छा न करनेवालोंकी
आधिव्याधि	चिन्ता, रोग,		
जरा ग्लानि	बुढ़ापा, ग्लानि,	मृत्युः न	मृत्यु नहीं
दुःख शोक	दुःख, शोक,	आसीत्	होती थी ॥५४॥
भय क्लमाः	भय और श्रान्ति		

एकपत्नीव्रतधरो राजर्षिचरितः शुचिः ।
स्वधर्मं गृहमेधीयं शिक्षयन् स्वयमाचरत् ॥५५॥

एकपत्नी व्रतधरः राजर्षि चरितः शुचिः स्वधर्मं गृहमेधीयं शिक्षयन् स्वयं आचरन् ॥५५॥

एकपत्नी	एकपत्नी	गृहमेधीयं	गृहस्थाश्रमोचित
व्रतधरः	व्रत धारण करके	स्वधर्मं स्वयं	अपने धर्मका स्वयं
शुचिः राजर्षि	पवित्र राजर्षिके समान	आचरन्	आचरण करते हुए
		शिक्षयन्	(लोगोंको) शिक्षा देते थे ॥५५॥
चरितः	चरितवाले (श्रीराम)		

प्रेम्णानुवृत्त्या शीलेन प्रश्रयावनता सती ।
धिया ह्रिया च भावज्ञा भर्तुः सीताहरन्मनः ॥५६॥

प्रेम्णा अनुवृत्त्या शीलेन प्रश्रया अवनता सती धिया ह्रिया च भावज्ञा भर्तुः सीता हरन् मनः ॥५६॥

प्रेम्णा	प्रेमपूर्ण
अनुवृत्त्या	अनुकूलाचरणसे,
शीलेन प्रश्रया	शीलसे, विनम्रतासे
अवनता	झुके रहकर
भावज्ञा	(पतिके) भावको जाननेवाली
सती सीता	पतिव्रता सीताजीने
धिया च ह्रिया	अपनी बुद्धि और लज्जासे
भर्तुः मनः	पतिदेवके मनका
हरन्	हरण कर लिया ॥५६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे रामचरिते दशमोऽध्यायः ॥१०॥

अथ एकादशोऽध्यायः

श्रीशुक उवाच

भगवानात्मनाऽऽत्मानं राम उत्तमकल्पकैः ।
सर्वदेवमयं देवमीज आचार्यवान् मखैः ॥१॥

भगवान् आत्माना आत्मानं राम उत्तम कल्पकैः सर्वदेवमयं देवं ईज आचार्यवान् मखैः ॥१॥

भगवान् राम	भगवान श्रीरामने	सर्वदेवमयं	सर्वदेवमय
आचार्यवान्	आचार्य (वसिष्ठ) जी को बनाकर	देवं	प्रकाश स्वरूप
		आत्मानं	अपना ही
उत्तम कल्पकैः	उत्तम सामग्रियों द्वारा	आत्मान ईजे	स्वयं ही यजन किया ॥१॥
मखैः	यज्ञोंसे		

होत्रेऽददाद् दिशं प्राचीं ब्रह्मणे दक्षिणां प्रभुः ।
अध्वर्यवे प्रतीचीं च उदीचीं सामगाय सः ॥२॥

होत्रे अददात् दिशं प्राचीं ब्रह्मणे दक्षिणां प्रभुः अध्वर्यवे प्रतीचीं च उदीचीं सामगाय सः ॥२॥

सः प्रभुः	उन समर्थने	च	तथा
होत्रे प्राचीं	होताको पूर्व,	सामगाय	सामगान करनेवाले उद्गाताको
ब्रह्मणे दक्षिणां	ब्रह्माको दक्षिण,	उदीचीं दिशं अदात्	उत्तर दिशाका (राज्य) दे दिया ॥२॥
अध्वर्यवे	अध्वर्यु को		
प्रतीचीं	पश्चिम		

आचार्याय ददौ शेषां यावती भूस्तदन्तरा ।
मन्यमान इदं कृत्स्नं ब्राह्मणोऽर्हति निःस्पृहः ॥३॥

आचार्याय ददौ शेषां यावती भूः तत् अन्तरा मन्यमान इदं कृत्स्नं ब्राह्मणः अर्हति निःस्पृहः ॥३॥

तत् अन्तरा	उसके बीचकी	कृत्स्नं	सम्पूर्ण (भूमण्डल)
यावती शेषां	जितनी भी बची	निःस्पृहः	निस्पृह
भूः	भूमि थी	ब्राह्मणः	ब्राह्मण ही
आचार्याय ददौ	आचार्यको दे दी	अर्हति	पाने योग्य है ॥३॥
मन्यमान इदं	यह मानते हुए कि यह		

इत्ययं तदलङ्कारवासोभ्यामवशेषितः ।
तथा राज्ञयपि वैदेही सौमंगल्यावशेषिता ॥४॥

इति अयं तत् अलङ्कार वासःभ्यां अवशेषितः तथा राज्ञि अपि वैदेही सौमंगल्य अवशेषिता ॥४॥

इति	इसी प्रकार	तथा	इसी प्रकार
अयं	इन (श्रीराम) ने	राज्ञिवैदेही	महारानी जानकीने
तत् अलंकार	अपने आभूषण	अपि सौमंगल्य	भी केवल मांगलिक
वासः भ्यां	वस्त्रोंको ही		वस्त्राभरण
अवशेषितः	बचा रखा,	अवशेषिता	बचाये ॥४॥

ते तु ब्रह्मण्यदेवस्य वात्सल्यं वीक्ष्य संस्तुतम् ।
प्रीताः क्लिन्नधियस्तस्मै प्रत्यर्प्येदं बभाषिरे ॥५॥

ते तु ब्रह्मण्य देवस्य वात्सल्यं वीक्ष्य संस्तुतं प्रीताः क्लिन्नधियः तस्मै प्रत्यर्प्य इदं बभाषिरे ॥५॥

ब्रह्मण्य	ब्राह्मणोंके	प्रीताः	प्रसन्नतासे
देवस्य	देवता माननेवाले श्रीरामका	क्लिन्नधियः	आर्द्र हृदय
संस्तुतं वात्सल्यं	प्रशंसनीय वात्सल्य	तस्मै प्रत्यर्प्य	उन्हींको लौटाकर
वीक्ष्य ते तु	देखकर वे ब्राह्मण भी	इदं बभाषिरे	यह कहने लगे ॥५॥

अप्रत्तं नस्त्वया किं नु भगवन् भुवनेश्वर ।
यन्नोऽन्तर्हृदयं विश्य तमो हंसि स्वरोचिषा ॥६॥

अप्रत्तं नः त्वया किं नु भगवन् भुवनेश्वर यत् नः अन्तः हृदयं विश्य तमः हंसि स्वरोचिषा ॥६॥

भुवनेश्वर	त्रिभुवनके स्वामी	यत् नः हृदयं	जो हमारे हृदयमें
भगवन्	भगवान	विश्य	प्रवेश करके
त्वया नः	आपने हम लोगोंको	स्वरोचिषा	अपने तेजसे
नु किं	भला क्या नहीं	तमः हंसि	अज्ञान नष्ट कर रहे
अप्रत्तं	देखा है		हैं ॥६॥

नमो ब्रह्मण्यदेवाय रामायाकुण्ठमेधसे ।
उत्तमश्लोकधुर्याय न्यस्तदण्डार्पिताङ्घ्रये ॥७॥

नमः ब्रह्मण्य देवाय रामाय अकुण्ठ मेधसे उत्तम श्लोक धुर्याय न्यस्तदण्ड अर्पित अङ्घ्रये ॥७॥

ब्रह्मण्य	ब्राह्मणोंको	न्यस्तदण्ड	परपीड़ा त्यागी
देवाय	देवता माननेवाले,		लोगोंको
अकुण्ठ मेधसे	अकुण्ठ बुद्धि	अङ्घ्रये	अपने श्रीचरण
उत्तम श्लोक	पुण्यश्लोक	अर्पित	प्रदान करनेवाले
धुर्याय	शिरोमणि,	रामाय नमः	श्रीरामको नमस्कार ॥७॥

कदाचिल्लोकजिज्ञासुर्गूढो रात्र्यामलक्षितः ।
चरन् वाचोऽशृणोद् रामो भार्यामुद्दिश्य कस्यचित् ॥८॥

कदाचित् लोक जिज्ञासुः गूढः रात्र्यां अलक्षितः चरन् वाचः अशृणोत् रामः भार्यां उद्दिश्य कस्यचित् ॥८॥

कदाचित्	किसी समय	रात्र्यां	रातमें किसीके
लोक	लोगोंकी स्थिति	अलक्षितः	देखे बिना
जिज्ञासुः	जाननेकी इच्छासे	गूढः चरन्	छिपकर घूमते हुए

भार्यां	अपनी पत्नीको	कस्यचित् वाचः	किसीकी बात
उद्दिश्य	उद्देश बनाकर	रामः अशृणोत्	श्रीरामने सुनी ।।८।।

नाहं बिभर्मि त्वां दुष्टामसतीं परवेश्मगाम् ।
स्त्री लोभी बिभृयात् सीतां रामो नाहं भजे पुनः ।।९।।

न अहं बिभर्मि त्वां दुष्टां असतीं परवेश्मगां स्त्री लोभी बिभृयात् सीतां रामः न अहं भजे पुनः ।।९।।

अहं त्वां दुष्टां	'मैं तुझ दुष्टा	अहं रामः न	मैं राम नहीं हूँ
असतीं	असती,	सीतां	जिन्होंने सीताको
परवेश्मगां	दूसरे घर जानेवाली-को	विभृयात्	रख लिया
		पुनः भजे	कि फिर सेवन
न बिभर्मि	नहीं धारण करूँगा।		करूँगा' ।।९।।
स्त्री लोभी	स्त्रीका लोभी		

इति लोकाद् बहुमुखाद् दुराराध्यादसंविदः ।
पत्या भीतेन सा त्यक्ता प्राप्ता प्राचेतसाश्रमम् ।।१०।।

इति लोकात् बहु मुखात् दुराराध्यात् असंविदः पत्या भीतेन सा त्यक्ता प्राप्ता प्राचेतस आश्रमम् ।।१०।।

इति	इस प्रकार	भीतेन पत्या	डरे हुए पति द्वारा
दुराराध्यात्	जिन्हें प्रसन्न करना बहुत कठिन हैं	सा त्यक्ता	वे त्यागी गयी सीताजी
असंविदः	अज्ञानी	प्राचेतस	महर्षि वाल्मीकिके
लोकात्	लोगोंके	आश्रमं	आश्रमपर
बहु मुखात्	बहुत मुखोंसे सुनकर	प्राप्ता	पहुँचीं ।।१०।।

अन्तर्वत्न्यागते काले यमौ सा सुषुवे सुतौ ।
कुशो लव इति ख्यातौ तयोश्चक्रे क्रिया मुनिः ।।११।।

अन्तर्वत्नि आगते काले यमौ सा सुषुवे सुतौ कुशः लव इति ख्यातौ तयोः चक्रे क्रिया मुनिः ।।११।।

सा अन्तर्वत्नि	वे गर्भवती थीं	सुषुवे	उत्पन्न किये
काले कुशः	समयपर कुश	तयोः मुनिः	उनका मुनि
लव	और लव		वाल्मीकिने
इति ख्यातौ	इस नामसे प्रसिद्ध	क्रिया चक्रे	जात-कर्मादि संस्कार
यमौ सुतौ	दो जुड़वां पुत्र		किये ॥११॥

अंगदश्चित्रकेतुश्च लक्ष्मणस्यात्मजौ स्मृतौ ।
तक्षः पुष्कल इत्यास्तां भरतस्य महीपते ॥१२॥

अंगदः चित्रकेतुः च लक्ष्मणस्य आत्मनौ स्मृतौ तक्षः पुष्कल इति आस्तां बभूवतुः भरतस्य महीपते ॥१२॥

महीपते	राजन !	स्मृतौ	(पुत्र) हुए,
अंगदः च	अंगद और	तक्षः पुष्कल	तक्ष और पुष्कल
चित्रकेतुः	चित्रकेतु	इति भरतस्य	ये भरतके
लक्ष्मणस्य	लक्ष्मणके	आत्मजौ आस्तां	पुत्र हुए ॥१२॥

सुबाहुः श्रुतसेनश्च शत्रुघ्नस्य बभूवतुः ।
गन्धर्वान् कोटिशो जघ्ने भरतो विजये दिशाम् ॥१३॥

सुबाहुः श्रुतसेनः च शत्रुघ्नस्य बभूवतुः गन्धर्वान् कोटिशः जघ्ने भरतः विजये दिशाम् ॥१३॥

सुबाहुः च	सुबाहु और	दिशां विजये	दिग्विजयके समय
श्रुतसेनः	श्रुतसेन	कोटिशः	करोड़ों
शत्रुघ्नस्य	शत्रुघ्नके (पुत्र)	गन्धर्वान्	गन्धर्वोंको
बभूवतु.	उत्पन्न हुए ।	जघ्ने	मारा ॥१३॥
भरतः	भरतने		

तदीयं धनमानीय सर्वं राज्ञे न्यवेदयत् ।
शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसम् ।
हत्वा मधुवने चक्रे मथुरां नाम वै पुरीम् ॥१४॥

तदीयं धनं आनीय सर्वं राज्ञे न्यवेदयत् शत्रुघ्नः च मधोः पुत्रं लवणं नाम राक्षसं हत्वा मधुवने चक्रे मथुरां नाम वै पुरीम् ॥१४॥

तदीयं सर्वं	उनका सब	लवणं नाम	लवण नामक
धनं आनीय	धन लाकर	राक्षसं हत्वा	राक्षसको मारकर
राज्ञे	राजा श्रीरामको	वै मथुरां	निश्चित ही मथुरा
न्यवेदयत्	निवेदन कर दिया,	नाम	नामक
शत्रुघ्नः च	शत्रुघ्नने भी	पुरीं मधुवने	पुरी मधुवनमें
मधोः पुत्रं	मधुके पुत्र	चक्रे	बसायी ॥१४॥

मुनौ निक्षिप्य तनयौ सीता भर्त्रा विवासिता ।
ध्यायन्ती रामचरणौ विवरं प्रविवेश ह ॥१५॥

मुनौ निक्षिप्य तनयौ सीता भर्त्रा विवासिता ध्यायन्ती राम चरणौ विवरं प्रविवेश ह ॥१५॥

तनयौ	पुत्रोंको	चरणौ	चरणोंका
मुनौ	मुनि वाल्मीकिको	ध्यायन्ती	ध्यान करती हुई
निक्षिप्य	सौंपकर	ह विवरं	निश्चित रूपसे पृथ्वी-के छिद्रमें
भर्त्रा	पति द्वारा	प्रविवेश	प्रवेश कर गयीं ॥१५॥
विवासिता	निर्वासिता		
सीता राम	सीता श्रीरामके		

तच्छ्रुत्वा भगवान् रामो रुन्धन्नपि धिया शुचः ।
स्मरं स्तस्या गुणांस्तांस्तान्नाशक्नोद् रोद्धुमीश्वरः ॥१६॥

तत् श्रुत्वा भगवान् रामः रुन्धन् अपि धिया शुचः स्मरन् तस्या गुणान् तान् तान् न शक्नोत् रोद्धुं ईश्वरः ॥१६॥

तत् श्रुत्वा	उसे सुनकर	गुणान् स्मरन्	गुणोंको स्मरण करके
भगवान् रामः	भगवान् श्रीराम	ईश्वरः	ईश्वर होनेपर भी
धिया शुचः	बुद्धिसे शोकको	रोद्धुं	(शोकको) रोकनेमें
रुन्धन् अपि	रोकते हुए भी	न	नहीं
तस्या	उन (श्रीसीता) के	शक्नोत्	समर्थ हुए ॥१६॥
तान् तान्	उन-उन		

स्त्रीपुंप्रसङ्ग एतादृक्सर्वत्र त्रासमावहः ।
अपीश्वराणां किमुत ग्राम्यस्य गृहचेतसः ॥१७॥

स्त्रीपुंप्रसङ्ग एतादृक् सर्वत्र त्रासं आवहः अपि ईश्वराणां किं उत ग्राम्यस्य गृहचेतसः ॥१७॥

ईश्वराणां	सामर्थ्य वानोंके लिए	आवहः	देनेवाला है,
अपि	भी	गृहचेतसः	गृहासक्त चित्त
स्त्रीपुंप्रसंग	स्त्री-पुरुषका सम्बन्ध	ग्राम्यस्य	विषयी पुरुषोंकी
एतादृक्	इसी प्रकारका	उत किं	फिर क्या चर्चा
सर्वत्र त्रासं	सर्वत्र त्रास		॥१७॥

तत ऊर्ध्वं ब्रह्मचर्यं धारयन्नजुहोत् प्रभुः ।
त्रयोदशाब्दसाहस्रमग्निहोत्रमखण्डितम् ॥१८॥

तत ऊर्ध्वं ब्रह्मचर्यं धारयन् अजुहोत् प्रभुः त्रयोदश अब्द साहस्रं अग्निहोत्रं अखण्डितम् ॥१८॥

तत ऊर्ध्वं	इसके पश्चात्	अब्द साहस्रं	हजार वर्ष तक
प्रभुः	प्रभु (श्रीराम) ने	अखण्डितं	अखण्डित रूपसे
ब्रह्मचर्यं	ब्रह्मचर्य	अग्निहोत्रं	अग्नि होत्र किया
धारयन्	धारण करके		॥१८॥
त्रयोदश	तेरह		

स्मरतां हृदि विन्यस्य विद्धं दण्डककण्टकैः ।
स्वपादपल्लवं राम आत्मज्योतिरगात् ततः ॥१९॥

स्मरतां हृदि विन्यस्य विद्धं दण्डककण्टकैः स्वपाद पल्लवं राम आत्मज्योतिः अगात् ततः ॥१९॥

ततः राम	तब श्रीराम	हृदि	हृदयमें
दण्डककण्टकैः	दण्डक वनके कांटोंसे	विन्यस्य	स्थापित करके
विद्धं स्वपाद	विंधे अपने चरण	आत्मज्योतिः	अपनी ज्योति (धाम) में
पल्लवं	पल्लवोंको		
स्मरतां	स्मरण करनेवालोंके	अगात्	चले गये ॥१९॥

नेदं यशो रघुपतेः सुरयाच्ञयाऽऽत्त-
लीलातनोरधिकसाम्यविमुक्तधाम्नः ।
रक्षोवधो जलधिबन्धनमस्त्रपूगैः
किं तस्य शत्रुहनने कपयः सहायाः ॥२०॥

न इदं यशः रघुपतेः सुरयाञ्चया आत्त लीलातनोः अधिक साम्य विमुक्त धाम्नः रक्षः वधः जलधि बन्धनं अस्त्रपूगैः किं तस्य शत्रु हनने कपयः सहायाः ॥२०॥

अधिक	जिनसे अधिक
साम्य	और समान
धाम्नः	शक्ति धाम
विमुक्त	कोई नहीं है
सुरयाञ्चया	देवताओंकी प्रार्थनासे
लीलातनोः	लीला शरीर
आत्त	धारण किये
रघुपतेः	श्रीरघुनाथके लिए
अस्त्रपूगैः	अस्त्र समूहोंसे
रक्षः बधः	राक्षसोंको मार देना और
जलधि बन्धनं	समुद्रको बाँधना
इदं यशः	यह कोई सुयशकी बात
न	नहीं है (नहीं तो)
तस्य शत्रु हनने	उनको शत्रुको मारनेमें
किं कपयः	क्या कपि
सहायाः	सहायक हो सकते थे ॥२०॥

यस्यामलं नृपसदस्सु यशोऽधुनापि
गायन्त्यघघ्नमृषयो दिगिभेन्द्रपट्टम् ।
तं नाकपालवसुपालकिरीटजुष्ट-
पादाम्बुजं रघुपतिं शरणं प्रपद्ये ॥२१॥

यस्य अमलं नृप सदः सु यशः अधुना अपि गायन्ति अघघ्नं ऋषयः दिगिभेन्द्र पट्टं तं नाकपाल वसुपाल किरीट जुष्टं पादाम्बुजं रघुपतिं शरणं प्रपद्ये ॥२१॥

दिग्गजेन्द्र	दिग्गजोंको	गायन्ति	वर्णन करते हैं
पट्टं	आच्छादित करने-वाले वस्त्रके समान	तं नाकपाल वसुपाल	उन देवेन्द्र तथा धनाध्यक्ष कुबेरके
यस्य अमलं	जिनके निर्मल	किरीट जुष्टं	मुकुटोंसे सेवित
अघघ्नं यशः	पापहारी सुयशको	रघुपतिं	श्रीरघुनाथके
अधुना अपि	आज भी	पादाम्बुजं	चरण-कमलोंकी
नृप सदः सु	राजाओंकी सभामें	शरणं प्रपद्ये	हम शरण लेते हैं
ऋषयः	ऋषि लोग		॥२१॥

स यैः स्पृष्टोऽभिदृष्टो वा संविष्टोऽनुगतोऽपि वा ।
कोसलास्ते ययुः स्थानं यत्र गच्छन्ति योगिनः ॥२२॥

स यैः स्पृष्टः अभिदृष्टः वा संविष्टः अनुगतः अपि वा कोसलाः ते ययुः स्थानं यत्र गच्छन्ति योगिनः ॥२२॥

स यैः	वे जिनके द्वारा	ते कोसलाः	वे अयोध्यावासी
स्पृष्टः	छुए या	यत्र योगिनः	जहां योगी लोग
अभिदृष्टः	देखे गये,	गच्छन्ति	जाते हैं उस
वा संविष्टः	अथवा साथ बैठे	स्थानं	स्थान (पद) को
अपि	अथवा जो	ययुः	गये ॥२२॥
वा अनुगतः	पीछे भी चले		

पुरुषो रामचरितं श्रवणैरुपधारयन् ।
आनृशंस्यपरो राजन् कर्मबन्धैर्विमुच्यते ॥२३॥

पुरुषः रामचरितं श्रवणैः उपधारयन् आनृशंस्य परः राजन् कर्म बन्धैः विमुच्यते ॥२३॥

राजन्	राजन् !	पुरुषः	पुरुष
रामचरितं	श्रीरामचरितको	परः	परमात्माको प्राप्त करके
श्रवणैः	कानोंसे		
उपधारयन्	धारण करनेवाला	कर्म बन्धै	कर्म-बन्धनसे
आनृशंस्य	अत्यन्त क्रूर तक	विमुच्यते	छूट जाता है ॥२३॥

राजोवाच

कथं स भगवान् रामो भ्रातॄन् वा स्वयमात्मनः ।
तस्मिन् वा तेऽन्ववर्तन्त प्रजाः पौराश्च ईश्वरे ॥२४॥

कथं स भगवान् रामः भ्रातॄन् वा स्वयं आत्मनः तस्मिन् वा ते अन्ववर्तन्त प्रजाः पौराः च ईश्वरे ॥२४॥

स भगवान्	वे भगवान	च प्रजाः पौराः	तथा प्रजा, पुरवासी
रामः स्वयं	राम स्वयं	तस्मिन्	उन
आत्मनः	अपने अंश	ईश्वरे च	ईश्वरके साथ भी
भ्रातॄन्	भाइयोंके साथ	अन्ववर्तन्त	व्यवहार करते थे
कथं ते	कैसे और वे		॥२४॥

श्रीशुक उवाच–

अथादिशद् दिग्विजये भ्रातॄंस्त्रिभुवनेश्वरः ।
आत्मानं दर्शयन् स्वानां पुरीमैक्षत सानुगः ॥२५॥

अथ आदिशत् दिग्विजये भ्रातॄन् त्रिभुवन ईश्वरः आत्मानं दर्शयन् स्वानां पुरीं ऐक्षत स अनुगः ॥२५॥

त्रिभुवन	उन तीनों लोकोंके	आत्मानं	अपना
ईश्वरः	स्वामीने	दर्शयन्	दर्शन देनेके लिए
अथ भ्रातॄन्	फिर भाइयोंको	स अनुगः	अनुचरोंके साथ
दिग्विजये	दिग्विजय करनेका	पुरीं ऐक्षत	नगर-दर्शन किया
आदिशत्	आदेश दिया		॥२५॥
स्वानां	अपने जनोंको		

आसिक्तमार्गां गन्धोदैः करिणां मदशीकरैः ।
स्वामिनं प्राप्तमालोक्य मत्तां वा सुतरामिव ॥२६॥

आसिक्त मार्गां गन्धोदैः करिणां मदशीकरैः स्वामिनं प्राप्तं आलोक्य मत्तां वा सुतरां इव ॥२६॥

गन्धोदैः	सुगन्धित जलसे तथा	स्वामिनं प्राप्तं	स्वामीको आया
करिणां	हाथियोंके	आलोक्य सुतरां	देखकर उस समय
मदशीकरैः	मद-विन्दुओंसे	इव मत्तां वा	वहां मतवाली-सी
आसिक्त	सींचे गये		लग रही थी ॥२६॥
मार्गां	मार्गोंवाली अयोध्या		

प्रासादगोपुरसभाचैत्यदेवगृहादिषु ।
विन्यस्तहेमकलशैः पताकाभिश्च मण्डिताम् ॥२७॥

प्रसाद गोपुर सभा चैत्य देवगृह आदिषु विन्यस्त हेम कलशैः पताकाभिः च मण्डिताम् ॥२७॥

प्रासाद गोपुर	भवन, नगर-द्वार,	विन्यस्त	लगे
चैत्य	सभा-भवन,	हेम कलशैः	स्वर्ण कलशोंसे
देवगृह	देव-मन्दिर	च पताकाभिः	तथा झण्डोंसे
आदिषु	आदिपर	मण्डितां	सुसज्जित थी ॥२७॥

पूगैः सवृन्तैरम्भाभिः पट्टिकाभिः सुवाससाम् ।
आदर्शैरंशुकैः स्रग्भिः कृतकौतुकतोरणाम् ॥२८॥

पूगैः सवृन्तै रम्भाभिः पट्टिकाभिः सुवाससां आदर्शैः अंशुकैः स्रक्भिः कृत कौतुक तोरणाम् ॥२८॥

सवृन्तैः	फलोंके गुच्छों सहित	आदर्शैः अंशुकैः	दर्पण, वस्त्र,
पूगैः	सुपारी,	स्रक्भिः कृत	मालाओंसे बने
रम्भाभिः	केलेके वृक्ष,	कौतुक	उत्सवके सिए
सुवाससां	उत्तम वस्त्रोंकी	तोरणां	तोरण द्वारोंसे सजी
पट्टिकाभिः	पट्टियों		थी ॥२८॥

तमुपेयुस्तत्र तत्र पौरा अर्हणपाणयः ।
आशिषो युयुजुर्देव पाहीमां प्राक् त्वयोद्धृताम् ॥२९॥

तं उपेयुः तत्र तत्र पौरा अर्हण पाणयः आशिषः युयुजुः देव पाहि इमां प्राक् त्वया उद्धृताम् ॥२६॥

तत्र तत्र	जहां-तहां
अर्हण पाणयः	हाथोंमें पूजोपहार लिए
पौरा तं	नागरिक उनके
उपेयुः	समीप आये और
आशिषः युयुजुः	आशीर्वाद दिया
देव प्राक्	'देव ! पहिले
त्वया	आपके द्वारा ही
उद्धृतां	उद्धार की गयी
इमां	इस (पृथ्वी) का
पाहि	पालन कीजिए' ॥२६॥

ततः प्रजा वीक्ष्य पतिं चिरागतं
दिदृक्षयोत्सृष्टगृहाः स्त्रियो नराः ।
आरुह्य हर्म्याण्यरविन्दलोचन-
मतृप्तनेत्राः कुसुमैरवाकिरन् ॥३०॥

ततः प्रजा वीक्ष्य पतिं चिर आगतं दिदृक्षय उत्सृष्ट गृहाः स्त्रियः नराः आरुह्य हर्म्याणि अरविन्द लोचनं अतृप्त नेत्राः कुसुमैः अवाकिरन् ॥३०॥

ततः प्रजा	तब प्रजाके
स्त्रियः नराः	स्त्री-पुरुषोंने
चिर	बहुत दिनों पर
आगतं	आये
पतिं वीक्ष्य	स्वामीको देखकर
दिदृक्षय	दर्शन करनेकी इच्छासे
उत्सृष्ट गृहाः	घर छोड़कर
हर्म्याणि	कोठोंपर
आरह्य	चढ़कर
अरविन्द	उन कमल-
लोचन	लोचनको (देखकर) क्योंकि
नेत्राः अतृप्त	नेत्र तृप्त नहीं होते थे
कुसुमैः	(उनपर) पुष्पोंकी
अवाकिरन्	वर्षा करने लगे ॥३०॥

अथ प्रविष्टः स्वगृहं जुष्टं स्वैः पूर्वराजभिः ।
अनन्ताखिलकोशाढ्यमनर्घ्योरुपरिच्छदम् ॥३१॥

अथ प्रविष्टः स्वगृहं जुष्टं स्वैः पूर्वं राजभिः अनन्त अखिल कोश आढ्यं अनर्घ्यैः उरु परिच्छदम् ॥३१॥

अथ स्वैः	फिर अपनेसे	अनर्घ्यैः	बहुमूल्य
पूर्व राजभिः	पहिलेके नरेशोंसे	उरु	बहुत अधिक
जुष्टं	सेवित	परिच्छदं	सामग्री वाले
अनन्त	अनन्त	स्वगृहं	अपने भवनमें
अखिल	सब प्रकारके	प्रविष्टः	प्रवेश किया ॥३१॥
कोश आढ्यं	कोशोंसे परिपूर्ण		

विद्रुमोदुम्बरद्वारैर्वैदूर्यस्तम्भपङ्क्तिभिः ।
स्थलैर्मारकतैः स्वच्छैर्भातस्फटिकभित्तिभिः ॥३२॥

विद्रुम औदुम्बर द्वारैः वैदूर्य स्तम्भ पंक्तिभिः स्थलैः मारकतैः स्वच्छैः भात स्फटिक भित्तिभिः ॥३२॥

विद्रुम	विद्रुमकी देहलियोंमें	मारकतैः	मरकत मणियोंसे
औदुम्बर	उदुम्बरके		बना
द्वारैः	किवाड़ लगे थे,	स्थलैः	फर्श था,
वैदूर्य	वैदूर्य मणिके	स्फटिक	स्फटिककी
स्तम्भ	खम्भोंकी	भित्तिभिः	दीवारोंसे
पङ्क्तिभिः	पंक्तियां थीं,	भात	सुशोभित था ॥३२॥
स्वच्छैः	स्वच्छ		

चित्रस्रग्भिः पट्टिकाभिर्वासोमणिगणांशुकैः ।
मुक्ताफलैश्चिदुल्लासैः कान्तकामोपपत्तिभिः ॥३३॥

चित्र स्रक्भिः पट्टिकाभिः वासः मणिगण अंशुकैः मुक्ताफलैः विदुल्लासैः कान्त काम उपपत्तिभिः ॥३३॥

चित्र	अनेक रंगोंकी	वासः	वस्त्रकी
स्रक्भिः	मालाओं	पट्टिकाभिः	पट्टिकाओं,

मणिगण	मणियोंकी	मुक्ताफलैः	मोतियोंसे
अंशुकैः	किरणोंसे	कान्तकाम	प्रिय भोग
चिदुल्लासैः	शुद्ध चेतनके समान झलमलाती	उपपत्तिभिः	सामग्रियोंसे भरा था ॥३३॥

धूपदीपैः सुरभिभिर्मण्डितं पुष्पमण्डनैः ।
स्त्रीपुम्भिः सुरसंकाशैर्जुष्टं भूषणभूषणैः ॥३४॥

धूपदीपैः सुरभिभिः मण्डितं पुष्पमण्डनैः स्त्री पुम्भिः सुरसंकाशैः जुष्टं भूषण भूषणैः ॥३४॥

धूपदीपैः	धूप, दीप,	भूषण	आभूषणोंको भी
सुरभिभिः	सुगन्धियोंसे तथा	भूषणैः	भूषित करनेवाले
पुष्पमण्डनैः	पुष्पोंकी सजावटसे	स्त्री पुम्भिः	स्त्री-पुरुषोंसे
मण्डितं	सजा हुआ था,	जुष्टं	सेवित था ॥३४॥
सुरसंकाशैः	देवताओंके समान		

तस्मिन् स भगवान् रामः स्निग्धया प्रिययेष्टया ।
रेमे स्वारामधीराणामृषभः सीतया किल ॥३५॥

तस्मिन् स भगवान् रामः स्निग्धया प्रियया इष्टया रेमे स्वाराम धीराणां ऋषभः सीतया किल ॥३५॥

स्वाराम	आत्मराम	स्निग्धया	प्रेमपूर्ण
धीराणां	धीरजनोंमें	इष्टया प्रियया	अपनी अभीष्ट प्रिया
ऋषभः	सर्वश्रेष्ठ	सीतया किल	अहो, सीताजीके साथ
स भगवान्	वे भगवान्	रेमे	विहार करते रहे ॥३५॥
रामः	राम		
तस्मिन्	उस भवनमें		

बुभुजे च यथाकालं कामान् धर्ममपीडयन् ।
वर्षपूगान् बहून् नृणामभिध्याताङ्घ्रिपल्लवः ॥३६॥

बुभुजे च यथाकालं कामान् धर्मं अपीडयन् वर्षपूगान् बहून् नृणां अभिध्यात अङ्घ्रि पल्लवः ॥३६॥

नृणां	मनुष्यों द्वारा	धर्मं	धर्मको
अङ्घ्रि पल्लवः	चरण-पल्लवोंका	अपीडयन्	क्षति पहुँचाये बिना
अभिध्यात	ध्यान किये जानेवाले (रामने)	कामान् च	भोगोंको भी
		बहून् वर्षपूगान्	बहुत वर्षों तक
यथाकालं	समयानुसार	बुभुजे	भोगा ॥३६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे श्रीरामपाख्यानें एकादशोऽध्यायः ॥११॥

अथ द्वादशोऽध्यायः

श्रीशुक उवाच

कुशस्य चातिथिस्तस्मान्निषधस्तत्सुतो नभः ।
पुण्डरीकोऽथ तत्पुत्रः क्षेमधन्वाभवत्ततः ॥१॥

कुशस्य च अतिथिः तस्मात् निषधः तत् सुतः नभः पुण्डरीकः अथ तत् पुत्रः क्षेमधन्वा अभवत् ततः ॥१॥

कुशस्य च	कुशके तो	अथ तत् पुत्रः	फिर उसका पुत्र
अतिथिः	अतिथि हुआ,	पुण्डरीकः	पुण्डरीक
तस्मात् निषधः	उससे निषध;	ततः क्षेमधन्वा	उससे क्षेमधन्वा
तत् सुतः नभः	उसका पुत्र नभ,	अभवत्	उत्पन्न हुआ ॥१॥

देवानीकस्ततोऽनीहः पारियात्रोऽथ तत्सुतः ।
ततो बलस्थलस्तस्माद् वज्रनाभोऽर्कसंभवः ॥२॥

देवानीकः ततः अनीहः पारियात्रः अथ तत् सुतः ततः बलस्थलः तस्मात् वज्रनाभः अर्क सम्भवः ॥२॥

ततः देवानीकः	उससे देवानीक,	बलस्थलः	बलस्थल
अनीहः	(उससे) अनीह,	तस्मात्	उससे
अथ तत् सुतः	फिर उसका पुत्र	अर्क सम्भवः	सूर्यके अंशसे उत्पन्न
पारियात्रः	पारियात्र,	वज्रनाभः	वज्रनाभ हुआ ॥२॥
ततः	उसका		

खगणस्तत्सुतस्तस्माद् विधृतिश्चाभवत् सुतः ।
ततो हिरण्यनाभोऽभूद् योगाचार्यस्तु जैमिनेः ॥३॥

खगणः तत् सुतः तस्मात् विधृतिः च अभवत् सुतः ततः हिरण्यनाभः अभूत् योगाचार्यः तु जैमिनेः ॥३॥

तत् सुतः	उसका पुत्र	ततः	उससे
खगणः	खगण	तु जैमिनेः	तो जैमिनीका शिष्य
तस्मात्	उससे भी	योगाचार्यः	योगाचार्य
विधृतिः	विधृति	हिरण्यनाभः	हिरण्यनाभ
सुतः अभवत्	पुत्र उत्पन्न हुआ,	अभूत्	उत्पन्न हुआ ॥३॥

शिष्यः कौसल्य आध्यात्मं याज्ञवल्क्योऽध्यगाद् यतः ।
योगं महोदयमृषिर्हृदयग्रन्थिभेदकम् ॥४॥

शिष्यः कौसल्य आध्यात्मं याज्ञवल्क्यः अध्यगात् यतः योगं महोदयं ऋषिः हृदय ग्रन्थि भेदकम् ॥४॥

यतः शिष्यः	जिससे शिष्य होकर	भेदकं	नाशक
कौसल्य	कोशल देशवासी	महोदयं	महान् उन्नतिप्रद
याज्ञवल्क्यः	याज्ञवल्क्य	आध्यात्मं योगं	अध्यात्म योग
ऋषिः	ऋषिने	आध्यगात्	प्राप्त किया था ॥४॥
हृदय ग्रन्थि	हृदय-ग्रन्थि		

पुष्यो हिरण्यनाभस्य ध्रुवसन्धिस्ततोऽभवत् ।
सुदर्शनोऽथाग्निवर्णः शीघ्रस्तस्य मरुः सुतः ॥५॥

पुष्यः हिरण्यनाभस्य ध्रुवसन्धिः ततः अभवत् सुदर्शनः अथ अग्नि वर्णः शीघ्रः तस्य मरुः सुतः ॥५॥

हिरण्यनाभस्य	हिरण्यनाभ (पुत्र)	सुदर्शनः अथ	सुदर्शन फिर
पुष्यः ततः	पुष्य, उससे	अग्निवर्णः	अग्नि वर्ण, (उससे)
ध्रुवसन्धिः	ध्रुवसन्धि	शीघ्रः तस्य सुतः	शीघ्र, उसका पुत्र
अभवत्	उत्पन्न हुआ (उससे)	मरुः	मरु हुआ ॥५॥

योऽसावास्ते योगसिद्धः कलापग्राममाश्रितः ।
कलेरन्ते सूर्यवंशं नष्टं भावयिता पुनः ॥६॥

यः असाः आस्ते योगसिद्धः कलाप ग्रामं आश्रितः कलेः अन्ते सूर्यवंशं नष्टं भावयिता पुनः ॥६॥

यः योगसिद्धः	जो योगसे सिद्ध होकर	कलेः अन्ते	कलियुगके अन्तमें
असाः कलाप	इस कलाप	नष्टं	नष्ट हुए
ग्रामं	ग्राममें	सूर्यवंशं	सूर्यवशको
आश्रितः आस्ते	रह रहा है,	पुनः भावयिता	फिर चलानेवाला होगा ॥६॥

तस्मात् प्रसुश्रुतस्तस्य सन्धिस्तस्याप्यमर्षणः ।
महस्वांस्तत्सुतस्तस्माद् विश्वसाह्वोऽन्वजायत ॥७॥

तस्मात् प्रसुश्रुतः तस्य सन्धिः तस्य अपि अमर्षणः महस्वान् तत् सुतः तस्मात् विश्वसाह्वः अन्वजायत ॥७॥

तस्मात् प्रसुश्रुतः	उससे प्रसुश्रुत,	महस्वान्	महस्वान्,
तस्य सन्धिः	उसका सन्धि,	तस्मात्	उससे
तस्य अपि	उसका भी	विश्वसाह्वः	विश्वसाह्व
अमर्षणः	अमर्षण,	अन्वजायत	उत्पन्न हुआ ॥७॥
तत् सुतः	उसका पुत्र		

ततः प्रसेनजित् तस्मात् तक्षको भविता पुनः ।
ततो बृहद्बलो यस्तु पित्रा ते समरे हतः ॥८॥

ततः प्रसेनजित् तस्मात् तक्षकः भविता पुनः ततः बृहद्बलः यः तु पित्रा ते समरे हतः ॥८॥

ततः प्रसेनजित्	उससे प्रसेनजित्	यः तु	जिसे तो
तस्मात् पुनः	उससे फिर	ते पित्रा	तुम्हारे पिता (अभिमन्यु) ने
तक्षकः भविता	तक्षक उत्पन्न होगा,	समरे हतः	युद्धमें मारा था ॥८॥
ततः	उससे		
बृहद्बलः	बहद्बल हुआ,		

एते हीक्ष्वाकुभूपाला अतीताः शृण्वनागतान् ।
बृहद्बलस्य भविता पुत्रो नाम बृहद्रणः ॥९॥

एते हि इक्ष्वाकुभूपाला अतीताः शृणु अनागतान् बृहद्बलस्य भविता पुत्रः नाम बृहद्रणः ॥९॥

इक्ष्वाकुभूपाला	इक्ष्वाकुवंशी राजा	शृणु	सुनो
एते हि	इतने ही	बृहद्बलस्य	बृहद्बलको
अतीताः	बीत चुके हैं	बृहद्रणः नाम	बृहद्रण नामक
अनागतान्	आगे होने वालोंको	पुत्रः भविता	पुत्र होगा ॥९॥

उरुक्रियस्ततस्तस्य वत्सवृद्धो भविष्यति ।
प्रतिव्योमस्ततो भानुर्दिवाको वाहिनीपतिः ॥१०॥

उरुक्रियः ततः तस्य वत्सवृद्धः भविष्यति प्रतिव्योमः ततः भानुः दिवाकः वाहिनीपतिः ॥१०॥

ततः उरुक्रियः	उसका उरुक्रिय	ततः प्रतिव्योमः	उससे प्रतिव्योम
तस्य	उसका पुत्र	वाहिनीपतिः	(उससे) सेनापति
वत्सवृद्धः	वत्सवृद्ध	दिवाकः	दिवाक होगा ॥१०॥
भविष्यति	होगा,		

सहदेवस्ततो वीरो बृहदश्वोऽथ भानुमान् ।
प्रतीकाश्वो भानुमतः सुप्रतीकोऽथ तत्सुतः ॥११॥

सहदेवः ततः वीरः बृहदश्वः अथ भानुमान् प्रतीकाश्वः भानुमतः सुप्रतीकः अथ तत् सुतः ॥११॥

ततः वीरः	उससे वीर	भानुमान्	(उससे) भानुमान्
सहदेवः	सहदेव	भानुमतः	भानुमानसे
अथ	फिर (उससे)	अथ तत् सुतः	फिर उसका पुत्र
बृहदश्वः	वृहदश्व	सुप्रतीकः	सुप्रतीक होगा ॥११॥

भविता मरुदेवोऽथ सुनक्षत्रोऽथ पुष्करः ।
तस्यान्तरिक्षस्तत्पुत्रः सुतपास्तदमित्रजित् ॥१२॥

भविता मरुदेवः अथ सुनक्षत्रः अथ पुष्करः तस्य अन्तरिक्षः तत् पुत्रः सुतपाः तत् अमित्रजित् ॥१२॥

मरुदेवः भविता	उससे मरुदेव होगा,	सुतपाः	सुतपा,
अथ सुनक्षत्रः	फिर सुनक्षत्र,	तत्	उससे
अथ पुष्करः	फिर पुष्कर,	अमित्रजित्	अमित्रजित् होगा ॥१२॥
तस्य अन्तरिक्षः	उसका अन्तरिक्ष,		
तत् पुत्रः	उसका पुत्र		

बृहद्राजस्तु तस्यापि बर्हिस्तस्मात् कृतञ्जयः ।
रणञ्जयस्तस्य सुतः सञ्जयो भविता ततः ॥१३॥

बृहद्राजः तु तस्य अपि बर्हिः तस्मात् कृतञ्जयः रणञ्जयः तस्य सुतः सञ्जयः भविता ततः ॥१३॥

बृहद्राजः तु	उसका तो बृहद्राज,	तस्य तः	उसका पुत्र
तस्य अपि	उसका भी	रणञ्जयः	रणञ्जय,
बर्हिः तस्मात्	बर्हि, उससे	ततः सञ्जयः	उससे सञ्जय
कृतञ्जयः	कृतञ्जय	भविता	होगा ॥१३॥

तस्माच्छाक्योऽथ शुद्धोदो लाङ्गलस्तत्सुतः स्मृतः ।
ततः प्रसेनजित् तस्मात् क्षुद्रको भविता ततः ॥१४॥

तस्मात् शाक्यः अथ शुद्धोदः लांगलः तत् सुतः स्मृतः ततः प्रसेनजित् तस्मात् क्षुद्रकः भविता ततः ॥१४॥

तस्मात् शाक्यः	उससे शाक्य,	ततः प्रसेनजित्	उससे प्रसेनजित्
अथ शुद्धोदः	फिर शुद्धोद,	ततः तस्मात्	फिर उससे
तत् सुतः	उसका पुत्र	क्षुद्रकः भविता	क्षुद्रक उत्पन्न होगा ॥१४॥
लांगलः स्मृतः	लाङ्गल कहा गया है,		

रणको भविता तस्मात् सुरथस्तनयस्ततः ।
सुमित्रो नाम निष्ठान्त एते बार्हद्बलान्वयाः ॥१५॥

रणकः भविता तस्मात् सुरथः तनयः ततः सुमित्रः नाम निष्ठान्त एते बार्हद्बल अन्वयाः ॥१५॥

तस्मात् रणकः	उससे रणक	सुमित्रः नाम	सुमित्र नामक
भविता	होगा (उससे)	निष्ठान्त	अन्तिम राजा होगा।
सुरथः ततः	सुरथ, उसका	एते बार्हद्बल	इतने बार्हद्बलके
तनयः	पुत्र	अन्वयाः	वंशधर होंगे ॥१५॥

इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति ।
यतस्तं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥१६॥

इक्ष्वाकूणां अयं वंशः सुमित्र अन्तः भविष्यति यतः तं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥१६॥

अयं इक्ष्वाकूणां	यह इक्ष्वाकुका	राजानं प्राप्य	राजा होनेपर
वंशः	वंश	वै कलौ	निश्चय कलियुगमें
सुमित्र अन्तः	सुमित्र पर्यन्त	संस्थां	समाप्त
भविष्यति	रहेगा	प्राप्स्यति	हो जायगा ॥१६॥
यतः तं	क्योंकि उसके		

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
नवमस्कन्धे इक्ष्वाकुवंशवर्णनं नाम द्वादशोऽध्यायः ॥१२॥

अथ त्रयोदशोऽध्यायः

श्रीशुक उवाच

निमिरिक्ष्वाकुतनयो वसिष्ठमवृतर्त्विजम् ।
आरभ्य सत्रं सोऽप्याह शक्रेण प्राग्वृतोऽस्मि भोः ॥१॥

निमिः इक्ष्वाकु तनयः वसिष्ठं अवृत ऋत्विजम् आरभ्य सत्रं सः अपि आह शक्रेण प्राक् वृतः अस्मि भोः ॥१॥

इक्ष्वाकु तनयः	इक्ष्वाकुके पुत्र	सः अपि	किन्तु उन्होंने भी
निमिः	निमिने	आह	कहा—
सत्रं आरभ्य	यज्ञ प्रारम्भ करके	भोः प्राक्	'हे राजन् ! पहिलेसे
वसिष्ठं	उसके लिए वसिष्ठ-जीको	शक्रेण	इन्द्र द्वारा मैं
		वृतः अस्मि	वरण किया गया
ऋत्विजं	ऋत्विज		हूँ ॥१॥
अवृत	वरण किया,		

तं निर्वर्त्यागमिष्यामि तावन्मां प्रतिपालय ।
तूष्णीमासीद् गृहपतिः सोऽपीन्द्रस्याकरोन्मखम् ॥२॥

तं निर्वर्त्य आगमिष्यामि तावत् मां प्रतिपालय तूष्णीं आसीत् गृहपतिः सः अपि इन्द्रस्य अकरोत् मखम् ॥२॥

तं निर्वर्त्य	उसे पूरा करके	तूष्णीं आसीत्	चुप रह गये,
आगमिष्यामि	आऊँगा	सः अपि	वे भी
तावत् मां	तब तक मेरी	इन्द्रस्य	इन्द्रका
प्रतिपालय	प्रतीक्षा करो'	मखं अकरोत्	यज्ञ करने लगे ॥२॥
गृहपतिः	(यह सुनकर) यजमान (निमि)		

निमिश्चलमिदं विद्वान् सत्रमारभतात्मवान् ।
ऋत्विग्भिरपरैस्तावन्नागमद् यावता गुरुः ॥३॥

निमिः चलं इदं विद्वान् सत्रं आरभत आत्मवान् ऋत्विक् भिः अपरैः तावत् न आगमत् यावता गुरुः ॥३॥

आत्मवान्	आत्मज्ञानी	न आगमत्	नहीं आये थे
निमिः	निमिने	अपरैः	दूसरे
इदं चलं	इस जीवनको चञ्चल	ऋत्विक् भिः	ऋत्विजों द्वारा
विद्वान्	समझकर	सत्रं आरभत	यज्ञ आरम्भ कर दिया ॥३॥
यावता गुरुः	जब तक गुरु वसिष्ठ		

शिष्यव्यतिक्रमं वीक्ष्य निर्वर्त्य गुरुरागतः ।
अशपत् पतताद् देहो निमेः पण्डितमानिनः ॥४॥

शिष्य व्यतिक्रमं वीक्ष्य निर्वर्त्य गुरुः आगतः अशपत् पतताद् देहः निमेः पण्डित मानिनः ॥४॥

निर्वर्त्य	(इन्द्र यज्ञ) निबटाकर	अशपत्	शाप दिया
आगतः गुरुः	आये गुरु (वसिष्ठ) ने	पण्डित	'अपनेको पण्डित
शिष्य	शिष्यका	मानिनः	माननेवाले
व्यतिक्रमं	आज्ञोल्लंघन	निमेः देहः	निमिका शरीर
वीक्ष्य	देखकर	अपतात्	गिर जाय' ॥४॥

निमिः प्रतिददौ शापं गुरवेऽधर्मवर्तिने ।
तवापि पतताद् देहो लोभाद् धर्ममजानतः ॥५॥

निमिः प्रति ददौ शापं गुरवे अधर्म वर्तिने तव अपि पतताद् देहः लोभात् धर्मं अजानतः ॥५॥

अधर्म वर्तिने	अधर्म करनेवाले	धर्मं	धर्म
गुरवे निमिः	गुरुको निमिने भी	अजानतः	न समझनेवाले
प्रति शापं ददौ	बदलेमें शाप दिया	तव अपि देहः	तुम्हारा भी शरीर
लोभात्	'लोभके कारण	पतताद्	गिर जाय' ॥५॥

इत्युत्ससर्ज स्वं देहं निमिरध्यात्मकोविदः ।
मित्रावरुणयोर्जज्ञे उर्वश्यां प्रपितामहः ॥६॥

इति उत्ससर्ज स्वं देहं निमिः अध्यात्म कोविदः मित्रावरुणयोः जज्ञे उर्वश्यां प्रपितामहः ॥६॥

इति	इस प्रकार (शाप मिलनेपर)	प्रपितामहः	हमारे वृद्ध प्रपितामह (वसिष्ठ) जी भी
अध्यात्म कोविदः	आत्मविद्यामें निपुण	उर्वश्यां	(देह त्यागकर) उर्वशीसे
निमिः स्वं देहं	निमिने अपने शरीर-को	मित्रावरुणयोः जज्ञे	मित्रावरण द्वारा उत्पन्न हुए ॥६॥
उत्ससर्ज	त्याग दिया तथा		

गन्धवस्तुषु तद्देहं निधाय मुनिसत्तमाः ।
समाप्ते सत्रयागेऽथ देवानूचुः समागतान् ॥७॥

गन्धवस्तुषु तत् देहं निधाय मुनि सत्तमाः समाप्ते सत्रयागे अथ देवान् ऊचुः समागतान् ॥७॥

तत्	(राजा निमिके) उस	अथ सत्रयागे	जब सत्रयाग
देहं	शरीरको	समाप्ते	समाप्त हुआ तब
गन्धवस्तुषु	सुगन्धित वस्तुमें	समागतान्	वहां आये हुए
निधाय	सुरक्षित रखकर	देवान् ऊचुः	देवताओंसे कहा ॥७॥
मुनि सत्तमाः	श्रेष्ठ मुनियोंने		

राज्ञो जीवतु देहोऽयं प्रसन्नाः प्रभवो यदि ।
तथेत्युक्ते निमिः प्राह मा भून्मे देहबन्धनम् ॥८॥

राज्ञः जीवतु देहः अयं प्रसन्नाः प्रभवः यदि तथा इति उक्ते निमिः प्राह मा भूत् मे देह बन्धनम् ॥८॥

यदि प्रभवः	'यदि आप समर्थ लोग	उक्ते	(देवताओंके) कहने-पर
प्रसन्नाः	प्रसन्न हैं तो	निमिः प्राह	निमिने कहा—
राज्ञः अयं देहः	राजाका यह शरीर	मे देह	'मुझे शरीरका
जीवतु	जीवित हो जाय।'	बन्धनं	बन्धन
तथा इति	'ऐसा हो' इस प्रकार	मा भूत्	न प्राप्त हो ॥८॥

यस्य योगं न वाञ्छन्ति वियोगभयकातराः ।
भजन्ति चरणाम्भोजं मुनयो हरिमेधसः ॥९॥

यस्य योगं न वाञ्छन्ति वियोग भय कातराः भजन्ति चरणाम्भोजं मुनयः हरिमेधसः ॥९॥

हरिमेधसः	श्रीहरिमें लगी बुद्धि-वाले	यस्य योगं	जिसका संयोग
मुनयः	मुनिगण	न वाञ्छन्ति	नहीं चाहते
वियोग	जिसके वियोगके	चरणाम्भोजं	(श्रीहरिके) चरण-कमलोंका
भय	भयसे	भजन्ति	भजन करते हैं ॥९॥
कातराः	व्याकुल होकर		

देहं नावरुरुत्सेऽहं दुःखशोकभयावहम् ।
सर्वत्रास्य यतो मृत्युर्मत्स्यानामुदके यथा ॥१०॥

देहं न अवरुरुत्से अहं दुःख शोक भय आवहं सर्वत्र अस्य यतः मृत्युः मत्स्यानां उदके यथा ॥१०॥

दुःख शोक	दुःख, शोक	यथा उदके	जैसे पानीमें
भय आवहं	भय ढोनेवाले	मत्स्यानां	मछलियोंकी (है)
देहं	शरीरमें	अस्य सर्वत्र	इस (शरीर) की सर्वत्र
न	नहीं	मृत्युः	मृत्यु ही है' ॥१०॥
अवरुरुत्से	आरूढ़ होना चाहता		
यतः	क्योंकि		

देवा ऊचुः

विदेह उष्यतां कामं लोचनेषु शरीरिणाम् ।
उन्मेषणनिमेषाभ्यां लक्षितोऽध्यात्मसंस्थितः ॥११॥

विदेह उष्यतां कामं लोचनेषु शरीरिणां उन्मेषण निमेषाभ्यां लक्षितः अध्यात्म संस्थितिः ॥११॥

कामं	(आप) इच्छानुसार	उन्मेषण	पलकोंके
शरीरिणां	देहधारियोंके	निमेषाभ्यां	उठने गिरनेसे
लोचनेषु	नेत्रोंमें	अध्यात्म	शरीरमें आपकी
विदेह	बिना शरीरके	संस्थितिः	उपस्थिति
उष्यतां	निवास करें ।	लक्षितः	जानी जायगी ॥११॥

श्रीशुक उवाच*

अराजकभयं नृणां मन्यमाना महर्षयः ।
देहं ममन्थुः स्म निमेः कुमारः समजायत ॥१२॥

अराजक भयं नृणां मन्यमाना महर्षयः देहं ममन्थुः स्म निमेः कुमारः सम् अजायत ॥१२॥

महर्षयः	महर्षियोंने	निमेः देहं	निमिके शरीरका
नृणां	मनुष्योंमें	ममन्थुः स्म	मन्थन किया
अराजक	अराजकताका	कुमारः	उससे एक कुमार
भयं मन्यमाना	भय मानकर	सम् अजायत	उत्पन्न हुआ ॥१२॥

जन्मना जनकः सोऽभूद् वैदेहस्तु विदेहजः ।
मिथिलो मथनाज्जातो मिथिला येन निर्मिता ॥१३॥

जन्मना जनकः सः अभूत् वैदेहः तु विदेहजः मिथिलः मथनात् जातः मिथिला येन निर्मिता ॥१३॥

*यह उवाच अन्य प्रतियोंमें नहीं है ।

जन्मना	जन्म लेनेके कारण	मथनात्	मन्थनसे
जनकः	जनक	जातः	उत्पन्न होनेसे
विदेहजः	(माताके) शरीरसे न उत्पन्न होनेके	सः मिथिलः	वह मिथिल
		अभूत्	हुआ,
तु	कारणसे	येन मिथिला	जिसने मिथिलापुरी
वैदेहः	वैदेह और	निर्मिता	निर्माण की ॥१३॥

तस्मादुदावसुस्तस्य पुत्रोऽभून्नन्दिवर्धनः ।
ततः सुकेतुस्तस्यापि देवरातो महीपते ॥१४॥

तस्मात् उदावसुः तस्य पुत्रः अभूत् नन्दिवर्धनः ततः सुकेतः तस्य अपि देवरातः महीपते ॥१४॥

महीपते	राजन् !	अभूत्	हुआ,
तस्मात्	उससे	ततः सुकेतः	उससे सुकेत
उदावसुः	उदावसु,	तस्य अपि	उसका भी
तस्य पुत्रः	उसका पुत्र	देवरातः	देवरात हुआ ॥१४॥
नन्दिवर्धनः	नन्दिवर्धन		

तस्माद् बृहद्रथस्तस्य महावीर्यः सुधृत्पिता ।
सुधृतेर्धृष्टकेतुर्वै हर्यश्वोऽथ मरुस्ततः ॥१५॥

तस्मात् बृहद्रथः तस्य महावीर्यः सुधृत् पिता सुधृतेः धृष्टकेतुः वै हर्यश्वः अथ मरुः ततः ॥१५॥

तस्मात् बृहद्रथः	उससे बृहद्रथ	धृष्टकेतुः	धृष्टकेतु
तस्य सुधृत्	उससे सुधृतिका	अथ हर्यश्वः	फिर हर्यश्व
पिता	पिता	ततः मरुः	उससे मरु हुआ ॥१५॥
महावीर्यः	महावीर्य,		
सुधृतेः वै	सुधृतिसे तो		

मरोः प्रतीपकस्तस्माज्जातः कृतिरथो यतः ।
देवमीढस्तस्य सुतो विश्रुतोऽथ महाधृतिः ॥१६॥

मरो. प्रतीपकः तस्मात् जातः कृतिरथः यतः देवमीढः तस्य सुतः विश्रुतः अथ महाधृतिः ॥१६॥

मरोः प्रतीपकः	मरुसे प्रतीपक,	तस्य सुतः	उसका पुत्र
तस्मात् कृतिरथः	उससे कृति रथ	बिश्रुतः	विश्रुत
जातः	उत्पन्न हुआ	अथ	फिर उससे
अतः यतः	फिर जिससे	महाधृतिः	महाधृति हुआ
देवमीढः	देवमीढ		॥१६॥

कृतिरातस्ततस्तस्मान्महारोमाथ तत्सुतः ।
स्वर्णरोमा सुतस्तस्य ह्रस्वरोमा व्यजायत ॥१७॥

कृतिरातः ततः तस्मात् महारोमा अथ तत् सुतः स्वर्णरोमा सुतः तस्य ह्रस्वरोमा व्यजायत ॥१७॥

तत् कृतिरातः	उससे कृतिरात	स्वर्ण रोमा	स्वर्णरोमा
तस्मात्	उससे	तस्य सुतः	उसका पुत्र
महारोमा	महारोमा	ह्रस्वरोमा	ह्रस्वरोमा
अथ तत् सुतः	फिर उसका पुत्र	व्यजायत	उत्पन्न हुआ ॥१७॥

ततः सीरध्वजो जज्ञे यज्ञार्थं कर्षतो महीम् ।
सीता सीराग्रतो जाता तस्मात् सीरध्वजः स्मृतः ॥१८॥

ततः सीरध्वजः जज्ञे यज्ञ अर्थं कर्षतः महीं सीता सीराग्रतः जाता तस्मात् सीरध्वजः स्मृतः ॥१८॥

ततः	उससे	सीराग्रतः	सीर (हल) के नोकसे
सीरध्वजः	सीरध्वज उत्पन्न	सीता जाता	सीताजी उत्पन्न हुईं
जज्ञे	हुए	तस्मात्	इसलिए वे
यश अर्थ	यज्ञके लिए	सीरध्वजः	सीरध्वज
महीं कर्षतः	पृथ्वी जोतते समय	स्मृतः	कहलाये ॥१८॥

कुशध्वजस्तस्य पुत्रस्ततो धर्मध्वजो नृपः ।
धर्मध्वजस्य द्वौ पुत्रौ कृतध्वजमितध्वजौ ॥१९॥

कुशध्वजः तस्य पुत्रः ततः धर्मध्वजः नृपः धर्मध्वजस्य द्वौ पुत्रौ कृतध्वज मितध्वजौ ॥१९॥

तस्य पुत्रः	उनके पुत्र	द्वौ पुत्रौ	दो पुत्र हुए
कुशध्वजः	कुश ध्वज	कृतध्वज	कृतध्वज
ततः नृपः	उनसे राजा	मितध्वजौ	और मितध्वज
धर्मध्वजः	धर्मध्वज हुए,		॥१९॥
धर्मध्वजस्य	धर्मध्वजके		

कृतध्वजात् केशिध्वजः खाण्डिक्यस्तु मितध्वजात् ।
कृतध्वजसुतो राजन्नात्मविद्याविशारदः ॥२०॥

कृतध्वजात् केशिध्वजः खाण्डिक्यः तु मितध्वजात् कृतध्वज सुतः राजन् आत्मविद्या विशारदः ॥२०॥

कृतध्वजात्	कृतध्वजसे	कृतध्वज	कृतध्वजका पुत्र
केशिध्वजः	केशिध्वज और	सुतः	(केशिध्वज)
मितध्वजः	मितध्वजसे	आत्मविद्या	अध्यात्मविद्यामें
खाण्डिक्यः तु	खाण्डिक्य हुआ	विशारदः	निपुण था ॥२०॥
राजन्	राजन् !		

खाण्डिक्यः कर्मतत्त्वज्ञो भीतः केशिध्वजाद् द्रुतः ।
भानुमांस्तस्य पुत्रोऽभूच्छतद्युम्नस्तु तत्सुतः ॥२१॥

खाण्डिक्यः कर्म तत्त्वज्ञः भीतः केशिध्वजात् द्रुतः भानुमान् तस्य पुत्रः अभूत् शतद्युम्नः तु तत् सुतः ॥२१॥

खाण्डिक्यः	खाण्डिक्य	तत्त्वज्ञः	तत्त्वज्ञ था,
कर्म	कर्म-मार्गका	केशिध्वजात्	केशिध्वजसे

भीतः द्रुतः	डरकर भाग गया,	अभूत्	हुआ,
तस्य	उस (केशिध्वज) का	तु तत् सुतः	फिर उसका पुत्र
पुत्रः	पुत्र	शतद्युम्नः	शतद्युम्न हुआ
भानुमान्	भानुमान		॥२१॥

शुचिस्तत्तनयस्तस्मात् सनद्वाजस्ततोऽभवत् ।
ऊर्ध्वकेतुः सनद्वाजादजोऽथ पुरुजित्सुतः ॥२२॥

शुचिः तत् तनयः तस्मात् सनद्वाजः ततः अभवत् ऊर्ध्वकेतुः सनद्वाजात् अजः अथ पुरुजित् सुतः ॥२२॥

तस्मात तनयः	उससे पुत्र	ऊर्ध्वकेतुः	उर्ध्वकेतु
शुचिः ततः	शुचि, उससे	अथ अजः	फिर अज,
सनद्वाजः	सनद्वाज	तत् सुतः	उसका पुत्र
अभवत्	उत्पन्न हुआ	पुरुजित	पुरुजित हुआ ॥२२॥
सनद्वाजत्	सनद्वाजसे		

अरिष्टनेमिस्तस्यापि श्रुतायुस्तत्सुपार्श्वकः ।
ततश्चित्ररथो यस्य क्षेमधिर्मिथिलाधिपः ॥२३॥

अरिष्टनेमिः तस्य अपि श्रुतायुः तत् सुपार्श्वकः ततः चित्ररथः यस्य क्षेमधिः मिथिलाधिपः ॥२३॥

तस्य अपि	उसका भी	ततः चित्ररथः	उससे चित्ररथ
अरिष्टनेमिः	अरिष्टनेमि	यस्य	जिसके
श्रतायुः	(उसके) श्रुतायु	मिथिलाधिपः	मिथिलाका राजा
तत् सुपार्श्वकः	उससे सुपार्श्वक	क्षेमधिः	क्षेमधी हुआ ॥२३॥

तस्मात् समरथस्तस्य सुतः सत्यरथस्ततः ।
आसीदुपगुरुस्तस्मादुपगुप्तोऽग्निसंभवः ॥२४॥

तस्मात् समरथः तस्य सुतः सत्यरथः ततः आसोत् उपगुरुः तस्मात् उपगुप्तः अग्नि सम्भवः ॥२४॥

तस्मात्	उससे	उपगुरुः आसीत्	उपगुरु हुआ
समरथः	समरथ,	तस्मात्	उससे
तस्य सुतः	उसका पुत्र	अग्नि सम्भवः	अग्निके अंशसे उत्पन्न
सत्यरथः	सत्यरथ,	उपगुप्तः	उपगुप्त हुआ ॥२४॥
ततः	उससे		

वस्वनन्तोऽथ तत्पुत्रो युयुधो यत् सुभाषणः ।
श्रुतस्ततो जयस्तस्माद् विजयोऽस्मादृतः सुतः ॥२५॥

वस्वनन्तः अथ तत् पुत्रः युयुधः यत् सुभाषणः श्रुतः ततः जयः तस्मात् विजयः अस्मात् ऋतः सुतः ॥२५॥

अथ	फिर	ततः श्रुतः	उससे श्रुत
वस्वनन्तः	वस्वनन्त,	जयः	(उससे) जय,
तत् पुत्रः	उसका पुत्र	तस्मात् विजयः	उससे विजय,
युयुधः	युयुध,	अस्मात सुतः	इसका पुत्र
यत् सुभाषणः	जिससे सुभाषण,	ऋतः	ऋत हुआ ॥२५॥

शुनकस्तत्सुतो जज्ञे वीतहव्यो धृतिस्ततः ।
बहुलाश्वो धृतेस्तस्य कृतिरस्य महावशी ॥२६॥

शुनकः तत् सुतः जज्ञे वीतहव्यः धृतिः ततः बहुलाश्वः धृतेः तस्य कृतिः अस्य महावशी ॥२६॥

तत सुतः	उसका पुत्र	धृतेः बहुलाश्वः	धृतिके बहुलाश्व
शुनकः जज्ञे	शुनक उत्पन्न हुआ,	तस्य कृतिः	उसके कृति
वीतहव्यः	(उससे) वीतहव्य	अस्य	इसके
ततः धृतिः	उससे धृति	महावशी	महावशी हुआ ॥२६॥

एते वै मैथिला राजन्नात्मविद्याविशारदाः ।
योगेश्वरप्रसादेन द्वन्द्वैर्मुक्ता गृहेष्वपि ॥२७॥

एते वै मैथिला राजन् आत्मविद्या विशारदाः योगेश्वर प्रसादेन द्वन्द्वैः मुक्ता गृहेषु लपि ॥२७॥

राजन्	राजन् !	योगेश्वर	योगेश्वरोंकी
एते मैथिला	ये मिथिला नरेश	प्रसादेन	कृपासे
वै	निश्चय	गृहेषु अपि	घरमें रहते हुए भी
आत्मविद्या	अध्यात्मविद्यामें	द्वन्द्वैः मुक्ता	द्वन्द्वोंसे मुक्त थे
विशारदाः	निपुण थे,		॥२७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे निमिवंशानुवर्णनं नाम त्रयोदशोऽध्यायः ॥१३॥

अथ चतुर्दशोऽध्यायः

श्रीशुक उवाच–

अथातः श्रूयतां राजन् वंशः सोमस्य पावनः ।
यस्मिन्नैलादयो भूपाः कीर्त्यन्ते पुण्यकीर्तयः ॥१॥

अथ अतः श्रूयतां राजन् वंशः सोमस्य पावनः यस्मिन् ऐल आदयः भूपाः कीर्त्यन्ते पुण्यकीर्तयः ॥१॥

राजन् अथ	राजन् ! अब	पुण्यकीर्तयः	पवित्रकीर्ति
अतः सोमस्य	इसलिए चन्द्रमाका	ऐल आदयः	पुरुखा आदि
पावनः वंशः	पवित्र वंश	भूपाः	राजाओंका
श्रूयतां	सुनो	कीर्त्यन्ते	वर्णन किया गया
यस्मिन्	जिसमें		है ॥१॥

सहस्रशिरसः पुंसो नाभिह्रदसरोरुहात् ।
जातस्यासीत् सुतो धातुरत्रिः पितृसमो गुणैः ॥२॥

सहस्रशिरसः पुंसः नाभिह्रद सरोरुहात् जातस्य आसीत् सुतः धातुः अत्रिः पितृसमः गुणैः ॥२॥

सहस्रशिरसः	सहस्र सिरवाले	जातस्य धातुः	उत्पन्न ब्रह्माजी के
पुंसः	परम पुरुषकी	गुणैः पितृसमः	गुणोंसे पिताके समान
नाभिह्रद	नाभि-कुण्ड	सुतः अत्रिः	पुत्र अत्रि
सरोरुहात्	कमलसे	आसीत्	हुए ॥२॥

तस्य दृग्भ्योऽभवत् पुत्रः सोमोऽमृतमयः किल ।
विप्रौषध्युडुगणानां ब्रह्मणा कल्पितः पतिः ॥३॥

तस्य दृक्भ्यः अभवत् पुत्रः सोमः अमृतमयः किल विप्र औषधि उडुगणानां ब्रह्मणा कल्पितः पतिः ॥३॥

तस्य दृक्भ्यः	उनके नेत्रोंसे
किल	अहो,
अमृतमयः	अमृतमय
विप्र	ब्राह्मणों,
औषधि	औषधियों एवं
उडुगणानां	तारागणोंका
ब्रह्मणा	ब्रह्माजी द्वारा
कल्पितः	बनाया गया
पतिः सोमः	स्वामी चन्द्रमा
पुत्रः	पुत्र रूपसे
अभवत्	उत्पन्न हुआ ॥३॥

सोऽयजद् राजसूयेन विजित्य भुवनत्रयम् ।
पत्नीं बृहस्पतेर्दर्पात् तारां नामाहरद् बलात् ॥४॥

सः अयजत् राजसूयेन विजित्य भुवनत्रयं पत्नीं बृहस्पतेः दर्पात् तारां नाम अहरत् बलात् ॥४॥

सः भुवनत्रयं	उसने तीनों लोकों- को
विजित्य	जीतकर
राजसूयेन	राजसूय-यज्ञ द्वारा
अयजत्	यज्ञन किया,
दर्पात्	फिर घमण्डवश
तारां नाम	तारा नामक
बृहस्पतेः पत्नीं	बृहस्पतिकी पत्नीका
बलात्	बलपूर्वक
अहरत्	हरण कर लिया ॥४॥

यदा स देवगुरुणा याचितोऽभीक्ष्णशो मदात् ।
नात्यजत् तत्कृते जज्ञे सुरदानवविग्रहः ॥५॥

यदा स देवगुरुणा याचितः अभीक्ष्णशः मदात् न अत्यजत् तत् कृते जज्ञे सुर दानव विग्रहः ॥५॥

देवगुरुणा	देवगुरु बृहस्पति द्वारा
अभीक्ष्णशः	बार-बार
याचितः	मांगनेपर भी
स यदा	उस (चन्द्र) ने जब
मदात् न	गर्ववश नहीं
अत्यजत्	(ताराको) छोड़ा तब
तत् कृते	उस (तारा) के लिए
सुर-दानव	देव-दानवोंका
विग्रहः जज्ञे	युद्ध आरम्भ हो गया ॥५॥

शुक्रो बृहस्पतेर्द्वेषादग्रहीत् सासुरोडुपम् ।
हरो गुरुसुतं स्नेहात् सर्वभूतगणावृतः ॥६॥

शुक्रः बृहस्पतेः द्वेषात् अग्रहीत् स असुरः उडुपं हरः गरुसुतं स्नेहात् सर्वभूतगण आवृतः ॥६॥

बृहस्पतेः	बृहस्पतिसे	हरः	शंकरजीने
द्वेषात्	द्वेष होनेके कारण	स्नेहात्	स्नेहवश
स असुरः	असुरोंके साथ	सर्वभूतगणः	सब भूतगणोंसे
शुक्रः उडुपं	शुक्राचार्यने चन्द्रमा-का	आवृतः	घिरे हुए
अग्रहीत्	पक्ष ग्रहण किया,	गुरुसुतं	गुरुपुत्र* का (पक्ष लिया) ॥६॥

सर्वदेवगणोपेतो महेन्द्रो गुरुमन्वयात् ।
सुरासुरविनाशोऽभूत् समरस्तारकामयः ॥७॥

सर्वदेवगण उपेतः महेन्द्रः गुरुं अनु अगात् सुर असुर विनाशः अभूत् समरः तारकामयः ॥७॥

सर्वदेवगण	सभी देवगणोंके	समरः	युद्धमें
उपेतः महेन्द्रः	साथ इन्द्र	सुर असुर	देव-असुरोंका
गुरुं अनु	गुरुके पीछे	विनाशः	(बहुत) बिनाश
अगात्	गये,	अभूत्	हुआ ॥७॥
तारकामयः	इस ताराके लिए होनेवाले		

निवेदितोऽथाङ्गिरसा सोमं निर्भर्त्स्य विश्वकृत् ।
तारां स्वभर्त्रे प्रायच्छदन्तर्वत्नीमवैत् पतिः ॥८॥

निवेदितः अथ आंगिरसा सोमं निर्भर्त्स्य विश्वकृत् तारां स्वभर्त्रे प्रायच्छत् अन्तर्वत्नीं अवैत् पतिः ॥८॥

---

* शंकरजीने महर्षि अंगिरासे विद्या पढ़ी है, अतः अंगिराके पुत्र बृहस्पतिजी उनके गुरुभाई हैं ।

अथ आंगिरसा	फिर अंगिराजीके	स्वभर्त्रे	अपने पति (बृहस्पति) को
निवेदितः	निवेदन करनेपर	प्रायच्छत्	दिलवा दी,
विश्वकृत	विश्वसृष्टा ब्रह्मा-जीने	पत्नीं	पत्नीको
सोमं	चन्द्रमाको	अन्तर्वत्नि	गर्भवती
निर्भत्स्य	झिड़कर	पतिः	पति (बृहस्पति) ने
तारां	तारा	अवैत्	जाना ॥८॥

त्यज त्यजाशु दुष्प्रज्ञे मत्क्षेत्रादाहितं परैः ।
नाहं त्वां भस्मसात् कुर्यां स्त्रियं सान्तानिकः सति ॥९॥

त्यज त्यज आशु दुष्प्रज्ञे मत् क्षेत्रं आहितं परैः न अहं त्वां भस्मसात् कुर्यां स्त्रियं सान्तानिकः सति ॥९॥

दुष्प्रज्ञे	(बोले) दुर्बुद्धिवाली !	सान्तानिकः	सन्तान देनेवाली
मत् क्षेत्रं	मेरे क्षेत्रमें	स्त्रियं सति	स्त्री होनेके कारण
परैः	दूसरे द्वारा	अहं त्वां	मैं तुझे
आहितं	स्थापित (इस गर्भको)	भस्मसात् न	भस्म नहीं
त्यज आशु त्यज	त्याग, शीघ्र त्याग	कुर्यां	करूँगा' ॥९॥

तत्याज व्रीडिता तारा कुमारं कनकप्रभम् ।
स्पृहामाङ्गिरसश्चक्रे कुमारे सोम एव च ॥१०॥

तत्याज व्रीडिता तारा कुमारं कनकप्रभं स्पृहां आङ्गिरसः चक्रे कुमारे सोम एव च ॥१०॥

व्रीडिता	लज्जित होकर	कुमारे	उस कुमारके लिए
तारा	ताराने	आंगिरसः	बृहस्पतिने
कनकप्रभं	स्वर्ण-सी कान्तिवाला	च सोम एव	तथा चन्द्रमाने भी
कुमारं	कुमार	स्पृहां चक्रे	लेनेकी इच्छा की ॥१०॥
तत्याज	त्यागा (उत्पन्न किया)		

ममायं न तवेत्युच्चैस्तस्मिन् विवदमानयोः ।
पप्रच्छुर्ऋषयो देवा नैवोचे व्रीडिता तु सा ॥११॥

मम अयं न तव इति उच्चैः तस्मिन् विवदमानयोः पप्रच्छुः ऋषयः देवा न एव ऊचे व्रीडिता तु सा ॥११॥

अयं मम	यह मेरा (पुत्र) है	विवदमानयोः	(दोनोंके) विवाद करते समय
तव न	तुम्हारा नहीं'	ऋषयः	ऋषियों और
इति उच्चैः	इस प्रकार जोर-जोरसे	देवा	देवताओंने
तस्मिन्	उस (बालक) के सम्बन्धमें	पप्रच्छुः	(तारासे) पूछा
		तु सा व्रीडिता न एव ऊचे	किन्तु वह लज्जावश नहीं ही बोली ॥११॥

कुमारो मातरं प्राह कुपितोऽलीकलज्जया ।
किं न वोचस्यसद्वृत्ते आत्मावद्यं वदाशु मे ॥१२॥

कुमारः मातरं प्राह कुपितः अलीकलज्जया किं न वोचसि दुर्वृत्ते आत्म अवद्यं वद आशु मे ॥१२॥

कुमारः	(तब वह) कुमार	वोचसि	बोलती
अलीकलज्जया	व्यर्थ लज्जासे	किं न	क्यों नहीं,
कुपितः	क्रुद्ध होकर	आत्म अवद्यं	अपना पाप
मातरं प्राह	मातासे बोला	आशु मे वद	शीघ्र मुझे बता' ॥१२॥
दुर्वृत्ते	'दुराचारिणी, !		

ब्रह्मा तां रह आहूय समप्राक्षीच्च सान्त्वयन् ।
सोमस्येत्याह शनकैः सोमस्तं तावदग्रहीत् ॥१३॥

ब्रह्मा तां रह आहूय सम प्राक्षीत् च सान्त्वयन् सोमस्य इति आह शनकैः सोमः तं तावत् अग्रहीत् ॥१३॥

ब्रह्मा तां	ब्रह्माजीने उसे	शनकैः सोमस्य	धीरेसे 'चन्द्रमाका'
रह आहूय	एकान्तमें बुलाकर	इति आह	यह कहा
सान्त्वयन्	सान्त्वना देते हुए	तावत् सोमः	इसलिए चन्द्रमाने
सम प्राक्षीत्	समझाकर पूछा	तं अग्रहीत्	उस (बालक) को ले लिया ॥१३॥
च	और		

तस्यात्मयोनिरकृत बुध इत्यभिधां नृप ।
बुद्धचा गम्भीरया येन पुत्रेणापोडुराण् मुदम् ॥१४॥

तस्य आत्मयोनिः अकृत बुध इति अभिधां नृप बुद्धचा गम्भीरया येन पुत्रेण आप उडुराड् मुदम् ॥१४॥

नृप	राजन् !	गम्भीरया	गम्भीर
आत्मयोनिः	ब्रह्माजीने	बुद्धचा	बुद्धि
तस्य अभिधां	उस (बालक) का नाम	येन पुत्रेण	जिस पुत्रसे
		उडुराड्	चन्द्रमाने
बुध इति अकृत	बुध ऐसा रखा,	मुदं आप	आनन्द पाया ॥१४॥

ततः पुरूरवा जज्ञे इलायां य उदाहृतः ।
तस्य रूपगुणौदार्यशीलद्रविणविक्रमान् ॥१५॥

ततः पुरूरवा जज्ञे इलायां य उदाहृतः तस्य रूप गुण उदार्य शील द्रविण विक्रमान् ॥१५॥

य उदाहृतः	जिसका वर्णन हो चुका है,	तस्य रूप	उनके सौन्दर्य,
		गुण उदार्य	गुण, उदारता,
इलायां	उस इलासे	शील द्रविण	शील, धन तथा
ततः	इस (बुध) को	विक्रमान्	पराक्रमों को ॥१५॥
पुरूरवा जज्ञे	पुरूरवा उत्पन्न हुए,		

श्रुत्वोर्वशीन्द्रभवने गीयमानान् सुरर्षिणा ।
तदन्तिकमुपेयाय देवी स्मरशरार्दिता ॥१६॥

श्रुत्वा उर्वशी इन्द्रभवने गीयमानान् सुरर्षिणा तत् अन्तिकं उपेयाय देवी स्मरशर अर्दिता ॥१६॥

सुरर्षिणा	देवर्षि नारद द्वारा	स्मरशर	कामदेवके वाणसे
इन्द्रभवने	इन्द्रके भवनमें	अर्दिता	पीड़ित होकर
गीयमानान्	गाया जाता	तत्	उस (पुरूरवा) के
उर्वशी	उर्वशी	अन्तिक	समीप
श्रुत्वा देवी	देवीने सुनकर	उपेयाय	उपस्थित हुई ॥१६॥

मित्रावरुणयोः शापादापन्ना नरलोकताम् ।
निशम्य पुरुषश्रेष्ठं कन्दर्पमिव रूपिणम् ।
धृतिं विष्टभ्य ललना उपतस्थे तदन्तिके ॥१७॥

मित्रावरुणयोः शापात् आपन्ना नरलोकतां निशम्य पुरुषश्रेष्ठं कन्दर्पं इव रूपिणम् धृतिं विष्टभ्य ललना उपतस्थे तत् अन्तिके ॥१७॥

मित्रावरुणयोः	मित्रावरुणके	पुरुषश्रेष्ठं	पुरुषोंमें श्रेष्ठ
शापात्	शापसे	निशम्य	सुनकर
नरलोकतां	मनुष्य-लोकमें	धृतिं विष्टभ्य	धैर्य धारण करके
आपन्ना	आ पहुँची	ललना	वह सुन्दरी
रूपिणं	रूपधारी	तत् अन्तिके	उसके समीप
कन्दर्पं इव	कामदेवके समान	उपतस्थे	उपस्थित हुई ॥१७॥

स तां विलोक्य नृपतिर्हर्षेणोत्फुल्ललोचनः ।
उवाच श्लक्ष्णया वाचा देवीं हृष्टतनूरुहः ॥१८॥

स तां विलोक्य नृपतिः हर्षेण उत्फुल्ल लोचनः उवाच श्लक्ष्णया वाचा देवीं हृष्ट तनूरुहः ॥१८॥

स नृपतिः	वह राजा	उत्फुल्ल लोचनः	खिले नेत्र
तां देवीं	उस देवीको	हृष्ट तनूरुहः	पुलकित शरीर
विलोक्य	देखकर	श्लक्ष्णया वाचा	मधुर वाणीसे
हर्षेण	हर्षसे	उवाच	बोला ॥१८॥

पुरूरवोवाच*

स्वागतं ते वरारोहे आस्यतां करवाम किम् ।
संरमस्व मया साकं रतिर्नौ शाश्वतीः समाः ॥१९॥

स्वागतं ते वरारोहे आस्यतां करवाम किं संरमस्व मया साकं रतिः नौ शाश्वतीः समाः ॥१९॥

---

* अन्य प्रतियोंमें यहां 'राजोवाच' है ।

वरारोहे	वरारोहे !
ते स्वागतं	तुम्हारा स्वागत है !
आस्यतां	आओ,
किं	(तुम्हारी) क्या
करवाम	(सेवा) करूँ
मया साकं	मेरे साथ
संरमस्व	भली प्रकार रमण करो,
नौ रतिः	हम दोनोंका विहार
शाश्वतीः समाः	अनन्त काल तक रहे ॥१६॥

उर्वश्युवाच

कस्यास्त्वयि न सज्जेत मनो दृष्टिश्च सुन्दर ।
यदंगान्तरमासाद्य च्यवते ह रिरंसया ॥२०॥

कस्याः त्वयि न सज्जेत मनः दृष्टिः च सुन्दर यत् अंग अन्तरं आसाद्य च्यवते ह रिरंसया ॥२०॥

सुन्दर	सुन्दर !
त्वयि कस्याः	तुममें किसकी
मनः च दृष्टिः	मन और दृष्टि
सज्जेत न	आसक्त नहीं होगी,
यत्	जिनकी
अंग अन्तरं	भुजाके मध्य
आसाद्य	पहुँचकर
ह रिरंसया	निश्चय ही रमणेच्छासे
च्यवते	(स्त्री) स्खलित होने लगती है ॥२०॥

एतावुरणकौ राजन् न्यासौ रक्षस्व मानद ।
संरंस्ये भवता साकं श्लाघ्यः स्त्रीणांवरः स्मृतः ॥२१॥

एताः उरणकौ राजन् न्यासौ रक्षस्व मानद संरंस्ये भवता साकं श्लाघ्यः स्त्रीणां वरः स्मृतः ॥२१॥

स्त्रीणां	स्त्रियोंके लिए
श्लाघ्यः	प्रशंसनीय (पुरुष)
वरः स्मृतः	वर कहा गया है,
मानद	अतः मानद !
एताः उरणकौ	ये भेड़के दो बच्चे
न्यासौ	(मेरी) धरोहर हैं,
रक्षस्व	इनकी रक्षा करो,
भवता साकं	आपके साथ
संरंस्ये	रमण करूँगी ॥२१॥

घृतं मे वीर भक्ष्यं स्यान्नेक्षे त्वान्यत्र मैथुनात् ।
विवाससं तत तथेति प्रतिपेदे महामनाः ॥२२॥

घृतं मे वीर भक्ष्यं स्यात् न ईक्षे त्वा अन्यत्र मैथुनात् विवाससं तत तथा इति प्रतिपेदे महामनाः ॥२२॥*

वीर मे भक्ष्यं	वीर ! मेरा आहार	तत तथा	इसको 'बहुत अच्छा'
घृतं स्यात्	केवल घी होगा,	इति	इस प्रकार
मैथुनात्	मैथुनके	महामनाः	उदारता पूर्वक (पुरूरवाने)
अन्यत्र त्वा	अतिरिक्त तुमको		
विवाससं न	वस्त्रहीननहीं	प्रतिपेदे	स्वीकार कर लिया ॥२२॥
ईक्षे	देख सकूँगी'		

अहो रूपमहो भावो नरलोकविमोहनम् ।
को न सेवेत मनुजो देवीं त्वां स्वयमागताम् ॥२३॥

अहो रूपं अहो भावः नरलोक विमोहनं कः न सेवेत मनुजः देवीं त्वां स्वयं आगताम् ॥२३॥

अहो	(बोला) 'अहो कैसा	आगतां	आयी
रूपं	रूप है,	देवीं कः	देवीका कौन
नरलोक	मनुष्य-लोकको	मनुजः	मनुष्य
विमोहनं	सम्मोहित करनेवाला	सेवेत न	सेवन नहीं करेगा' ॥२३॥
अहो भावः	कैसी चेष्टा है,		
तां स्वयं	तुम स्वयं		

तया स पुरुषश्रेष्ठो रमयन्त्या यथार्हतः ।
रेमे सुरविहारेषु कामं चैत्ररथादिषु ॥२४॥

---

* इस श्लोकमें दूसरे चरणके 'विवाससं' के बाद 'श्रीशुक उवाच' प्रारम्भ हो जाता है; किन्तु चरणके मध्यमें होनेसे पृथक नहीं दिया जा सकता ।

तया स पुरुषश्रेष्ठः रमयन्त्या यथा अर्हतः रेमे सुर विहारेषु कामं चैत्ररथ आदिषु ॥२४॥

यथा अर्हतः	यथायोग्य	सुर	देवताओंके
रमयन्त्या	रमण करनेवाली	विहारेषु	विहारस्थलोंमें
तया स	उसके साथ वह	कामं रेमे	यथेच्छ
पुरुषश्रेष्ठः	पुरुषश्रेष्ठ		विहार करता रहा
चैत्ररथ आदिषु	चैत्ररथ आदि		॥२४॥

रममाणस्तया देव्या पद्मकिञ्जल्कगन्धया ।
तन्मुखामोदमुषितो मुमुदेऽहर्गणान् बहून् ॥२५॥

रममाणः तया देव्या पद्मकिञ्जल्क गन्धया तत् मुख आमोद मुषितः मुमुदे अहर्गणान् बहून् ॥२५॥

तया	उस	आमोद	सुगन्धिसे
पद्मकिञ्जल्क	पद्म-पराग जैसी	मुषितः	चुराये चित्तवाला वह
गन्धया	सुगन्धवाली	बहून्	बहुत
देव्या	देवीके साथ	अहर्गणान्	वर्षों तक
रममाणः	रमण करते हुए	मुमुदे	आनन्द भोगता
तत् मुख	उसके मुखकी		रहा ॥२५॥

अपश्यन्नुर्वशीमिन्द्रो गन्धर्वान् समचोदयत् ।
उर्वशीरहितं मह्यमास्थानं नातिशोभते ॥२६॥

अपश्यत् उर्वशीं इन्द्रः गन्धर्वान् समचोदयत् उर्वशी रहितं मह्यं आस्थानं न अतिशोभते ॥२६॥

उर्वशीं	उर्वशीको	आस्थानं	स्वर्ग
अपश्यत्	न देखकर	अतिशोभते	बहुत शोभित
इन्द्रः	इन्द्रने	न	नहीं लगता
मह्यं	(यह कहकर कि) मुझे	गन्धर्वान्	गन्धर्वोंको
उर्वशी रहितं	उर्वशीसे रहित	समचोदयत	(बुलाने) भेजा ॥२६॥

ते उपेत्य महारात्रे तमसि प्रत्युपस्थिते ।
उर्वश्या उरणौ जह्रुर्न्यस्तौ राजनि जायया ॥२७॥

ते उपेत्य महारात्रे तमसि प्रति उपस्थिते उर्वश्या उरणौ जह्रुः न्यस्तौ राजनि जायया ॥२७॥

ते	उन्होंने	जायया	उस पत्नी द्वारा
महारात्रे	महारात्रिको*	राजनि	राजाके पास
प्रति तमसि	उसमें अन्धकार	न्यस्तौ	धरोहर रूपमें रखे हुओंको
उपस्थिते	हो जानेपर	जह्रुः	हरण कर लिया ॥२७॥
उपेत्य	पहुँचकर		
उर्वश्या	उर्वशीके		
उरणौ	भेड़के बच्चोंको		

निशम्याक्रन्दितं देवी पुत्रयोर्नीयमानयोः ।
हतास्म्यहं कुनाथेन नपुंसा वीरमानिना ॥२८॥

निशम्य आक्रन्दितं देवी पुत्रयोः नीयमानयोः हता अस्मि अहं कुनाथेन नपुंसा वीरमानिना ॥२८॥

नीयमानयोः	ले जाये जाते	वीरमानिना	वीराभिमानी
पुत्रयोः	उन पुत्र तुल्य (भेड़ों) का	नपुंसा	इस नपुंसक
आक्रन्दितं	उच्च क्रन्दन	कुनाथेन	निन्दित पति द्वारा
निशम्य	सुनकर वह	अहं हता	मैं मारी
देवी	देवी (बोली)	अस्मि	गयी हूँ ॥२८॥

यद्विश्रम्भादहं नष्टा हृतापत्या च दस्युभिः ।
यः शेते निशि संत्रस्तो यथा नारी दिवा पुमान् ॥२९॥

यत विश्रम्भात् अहं नष्टा हृत अपत्या च दस्युभिः यः शेते निशि संत्रस्तः यथा नारी दिवा पुमान् ॥२९॥

---

* दीपावलीकी रातको शास्त्र महारात्रि कहते हैं ।

यत् विश्रम्भात्	जिसके विश्वासपर
दस्युभिः	डाकुओं द्वारा
अपत्य च	पुत्रोंके
हृत	हरण होनेसे
अहं नष्टा	मैं नष्ट हो गयी
यः दिवा	जो दिनमें
पुमान्	मर्द बननेवाला
नारी यथा	स्त्रीके समान
संत्रस्तः	भयभीत होकर
निशि शेते	रातमें सो रहा है' ॥२९॥

इति वाक्सायकैर्विद्धः प्रतोत्त्रैरिव कुञ्जरः ।
निशि निस्त्रिंशमादाय विवस्त्रोऽभ्यद्रवद् रुषा ॥३०॥

इति वाक् सायकैः विद्धः प्रतोत्त्रैः इव कुञ्जरः निशि निस्त्रिंशं आदाय विवस्त्रः अभ्यद्रवत् रुषा ॥३०॥

प्रतोत्त्रैः	अंकुशसे
कुञ्जरः इव	हाथीके समान
इति	इस प्रकार
वाक् सायकैः	वाग्वाणोंसे
विद्धः निशि	बींधे जानेपर रातमें
रुषा	क्रोधके कारण
विवस्त्रः	वस्त्रहीन ही
निस्त्रिंशं	तलवार
आदाय	लेकर
अभ्यद्रवत्	उनके पीछे दौड़ पड़ा ॥३०॥

ते विसृज्योरणौ तत्र व्यद्योतन्त स्म विद्युतः ।
आदाय मेषावायान्तं नग्नमैक्षत सा पतिम् ॥३१॥

ते विसृज्य उरणौ तत्र व्यद्योतन्त स्म विद्युतः आदाय मेषाः आयान्तं नग्नं ऐक्षत सा पतिम् ॥३१॥

ते	उन (गन्धर्वोंने)
उरणौ	भेड़के बच्चोंको
तत्र विसृज्य	वहीं छोड़कर
विद्युतः	बिजलीको
व्यद्योतन्त स्म	प्रकाशित करने लगे
सा	उस (उर्वशी) ने
मेषाः आदाय	भेड़ोंको लेकर
आयान्तं पतिं	आते हुए पतिको
नग्नं ऐक्षत	नंगा देखा ॥३१॥

ऐलोऽपि शयने जायामपश्यन् विमना इव ।
तच्चित्तोविह्वलः शोचन् बभ्रामोन्मत्तवन्महीम् ॥३२॥

ऐलः अपि शयने जायां अपश्यन् विमना इव तत् चित्तः विह्वलः शोचन् बभ्राम उन्मत्तवत् महीम् ॥३२॥

ऐलः	इलानन्दन	विह्वलः	व्याकुल होकर
अपि	(पुरुखाने) भी	तत् चित्तः	उसीमें आसक्ति चित्त
जायां शयने	पत्नीको शयनागारमें	उन्मत्तवत्	पागलके समान
अपश्यन्	न देखकर	महीं बभ्राम	पृथ्वीपर घूमने
विमना इव	अनमना सा होकर		लगा ॥३२॥
शोचन्	शोकसे		

स तां वीक्ष्य कुरुक्षेत्रे सरस्वत्यां च तत्सखीः ।
पञ्च प्रहृष्टवदनाः प्राह सूक्तं पुरूरवाः ॥३३॥

स तां वीक्ष्य कुरुक्षेत्रे सरस्वत्यां च तत् सखीः पञ्च प्रहृष्ट वदनाः प्राह सूक्तं पुरूरवाः ॥३३॥

स कुरुक्षेत्रे	उसने कुरुक्षेत्रमें	पञ्च सखीः	पांच सखियोंको
सरस्वत्यां	सरस्वतीके किनारे	च तां वीक्ष्य	तथा उसे देखकर
प्रहृष्ट वदनाः	प्रसन्नमुखी	पुरूरवाः	पुरूरवाने
तत्	उसकी	सूक्तं प्राह	सूक्त कहा ॥३३॥*

अहो जाये तिष्ठ तिष्ठ घोरे न त्यक्तुमर्हसि ।
मां त्वमद्याप्यनिर्वृत्य वचांसि कृणवावहै ॥३४॥

अहो जाये तिष्ठ तिष्ठ घोरे न त्यक्तुं अर्हसि मां त्वं अद्य अपि अनिर्वृत्य वचांसि कृणव आवहै ॥३४॥

अहो जाये	अरी प्रिये !	अद्य अपि	आज भी
तिष्ठ तिष्ठ	ठहर ! ठहर !	घोरे	इस घोर दुःखमें

* यह आख्यान वेदोंमें है । वहां पुरूरवाके वचन सूक्त हैं ।

मां त्वं	मुझे तू	आवहै	हम दोनों
अनिर्वृत्य	आनन्दित किये बिना	वचांसि	कुछ बातचीत
त्यक्तुं	तुम्हें त्यागना	कृणव	कर लें ॥३४॥
न अर्हसि	नहीं चाहिए,		

सुदेहोऽयं पतत्यत्र देवि दूरं हृतस्त्वया ।
खादन्त्येनं वृका गृध्रास्त्वत्प्रसादस्य नास्पदम् ॥३५॥

सुदेहः अयं पतति अत्र देवि दूरं हृतः त्वया खादन्ति एनं वृका गृध्राः त्वत् प्रसादस्य न आस्पदम् ॥३५॥

देवि त्वया	देवि ! तुम्हारे द्वारा	वृका गृध्राः	भेड़िये-गीध
दूरं हृतः	दूर छोड़ा गया	खादन्ति	खा लेंगे
अयं सुदेहः	यह सुन्दर शरीर	त्वत् प्रसादस्य	तुम्हारी कृपाका
अत्र पतति	यहीं गिर आयगा,	आस्पदं न	(यह) पात्र नहीं
एनं	इसे		रहा ॥३५॥

उर्वश्युवाच

मा मृथाः पुरुषोऽसि त्वं मा स्म त्वाद्युर्वृका इमे ।
क्वापि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ॥३६॥

मा मृथाः पुरुषः असि त्वं मा स्म तु अद्युः वृका इमे क्व अपि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ॥३६॥

मृथाः मा	मरो मत,	वै क्व अपि	निश्चय कहीं भी
त्वं पुरुषः असि	तुम पुरुष हो,	सख्यं न	मित्रता नहीं होती,
इमे वृका तु	ये भेड़िये तो	वृकाणां यथा	भेड़ियोंके समान
मा अद्युः स्म	मत खावें,	हृदयं	(इनका) हृदय (क्रूर)
स्त्रीणां	स्त्रियोंकी		होता है ॥३६॥

स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः ।
घ्नन्त्यल्पार्थेऽपि विश्रब्धं पतिं भ्रातरमप्युत ॥३७॥

स्त्रियः हि अकरुणाः क्रूरा दुर्मषाः प्रिय साहसाः घ्नन्ति अल्प अर्थे अपि विश्रब्धं पतिं भ्रातरं अपि उत ॥३७॥

हि स्त्रियः	क्योंकि स्त्रियां	अपि	भी
अकरुणाः	निष्ठुर,	विश्रब्धं	विश्वास करनेवाले
क्रूरा	क्रूर, अत्यन्त	पतिं	पति
दुर्मषाः	असहनशील,	उत भ्रातरं	अथवा भाईको
प्रिय साहसाः	साहसका काम पसन्द करनेवाली	अपि घ्नन्ति	भी मार देती हैं ॥३७॥
अल्प अर्थे	थोड़ेसे स्वार्थके लिए		

विधायालीकविश्रम्भमज्ञेषु त्यक्तसौहृदाः ।
नवं नवमभीप्सन्त्यः पुंश्चल्यः स्वैरवृत्तयः ॥३८॥

विधाय अलीक विश्रम्भं अज्ञेषु त्यक्त सौहृदाः नवं नवं अभीप्सन्त्यः पुंश्चल्यः स्वैर वृत्तयः ॥३८॥

अलीक	झूठे	त्यक्त सौहृदाः	सौहार्द्र त्यागकर
विश्रम्भं	विश्वास	नवं नवं	नया-नया (पुरुष)
अज्ञेषु विधाय	अज्ञ लोगोंको देकर	अभीप्सन्त्यः	चाहती रहती हैं ॥३८॥
स्वैर वृत्तयः	स्वेच्छा चारिणी		
पुंश्चल्यः	कुलटा स्त्रियां		

संवत्सरान्ते हि भवानेकरात्रं मयेश्वर ।
वत्स्यत्यपत्यानि च ते भविष्यन्त्यपराणि भोः ॥३९॥

संवत्सर अन्ते हि भवान् एकरात्रं मया ईश्वर वत्सति अपत्यानि च ते भविष्यन्ति अपराणि भोः ॥३९॥

भोः ईश्वर	हे (राजराजेश्वर) !	मया वत्सति	मेरे साथ रहोगे,
भवान्	आप	च ते	और आपके
संवत्सर	एक वर्षके	अपराणि	दूसरी भी
अन्ते	बीतनेपर	अपत्यानि	सन्तानें
एकरात्रं	एक रात्रि	भविष्यन्ति	होंगी ॥३९॥

श्रीशुक उवाच*

अन्तर्वत्नीमुपालक्ष्य देवीं स प्रययौ पुरम् ।
पुनस्तत्र गतोऽब्दान्ते उर्वशीं वीरमातरम् ॥४०॥

अन्तर्वत्नीं उपालक्ष्य देवीं स प्रययौ पुरं पुनः तत्र गतः अब्द अन्ते उर्वशीं वीर मातरम् ॥४०॥

स देवीं	वह देवी (उर्वशी) को	पुनः तत्र	फिर वहां
अन्तर्वत्नीं	गर्भवती	अब्द अन्ते	एक वर्ष बीतनेपर
उपालक्ष्य	जानकर	गतः	गया और
पुरं प्रययौ	अपने नगर चला गया,	वीर मातरं	वीर माता
		उर्वशीं	उर्वशी को ॥४०॥

उपलभ्य मुदा युक्तः समुवास तया निशाम् ।
अथैनमुर्वशी प्राह कृपणं विरहातुरम् ॥४१॥

उपलभ्य मुदा युक्तः सम उवास तया निशां अथ एनं उर्वशी प्राह कृपणं विरह आतुरम् ॥४१॥

उपलभ्य	पाकरके	अथ एनं	फिर इस
मुदा युक्तः	आनन्द पूर्वक	विरह आतुरं	विरह व्याकुल
तया निशां	उसके साथ रातमें	कृपणं	दीन हुएसे
सम उवास	भली प्रकार रहा,	उर्वशी प्राह	उर्वशीने कहा ॥४१॥

गन्धर्वानुपधावेमांस्तुभ्यं दास्यन्ति मामिति ।
तस्य संस्तुवतस्तुष्टा अग्निस्थालीं ददुर्नृप ।
उर्वशीं मन्यमानस्तां सोऽबुध्यत चरन् वने ॥४२॥

गन्धर्वान् उपधाव इमान् तुभ्यं दास्यन्ति मां इति तस्य संस्तुवतः तुष्टा अग्नि स्थालीं ददुः नृप उर्वशीं मन्यमानः तां सः अबुध्यत चरन् वने ॥४२॥

---

*यह उवाच अन्य प्रतियोंमें नहीं है ।

नृप इमान्	'राजन् इन	अग्नि	(उन्होंने) अग्नि
गन्धर्वान्	गन्धर्वोंकी	स्थालीं	स्थाली
उपधाव	स्तुति करो,	ददुः	दी
मां तुभ्यं	(ये) मुझको तुम्हें	तां उर्वशीं	उसे उर्वशी
दास्यन्ति	दे देंगे।'	मन्यमानः	मानता हुआ
इति	(उर्वशीके) ऐसा कहनेपर	सः वने	वह वनमें
		चरन्	घूमता रहा,
स्तुवतः	स्तुति करते हुए	अबुध्यत	जब होश आया
तस्य तुष्टा	उसपर प्रसन्न होकर		॥४२॥

स्थालीं न्यस्य वने गत्वा गृहानाध्यायतो निशि ।
त्रेतायां संप्रवृत्तायां मनसि त्रय्यवर्तत ॥४३॥

स्थालीं न्यस्य वने गत्वा गृहान् आध्यायतः निशि त्रेतायां संप्रवृत्तायां मनसि त्रयि अवर्तत ॥४३॥

स्थालीं वने	उस स्थालीको वनमें	संप्रवृत्तायं	ठीक प्रारम्भ होनेसे
न्यस्य निशि	रखकर रातको	मनसि	उसके मनमें
गृहान् गत्वा	घर जाकर	त्रयि	वेदत्रयीका
आध्यायतः	(उर्वशीका) प्रगाढ़ ध्यान करनेसे	अवर्तत	आविर्भाव हुआ ॥४३॥
त्रेतायां	त्रेतायुगका		

स्थालीस्थानं गतोऽश्वत्थं शमीगर्भं विलक्ष्य सः ।
तेन द्वे अरणी कृत्वा उर्वशीलोककाम्यया ॥४४॥

स्थाली स्थानं गतः अश्वत्थं शमीगर्भं विलक्ष्य सः तेन द्वे अरणी कृत्वा उर्वशी लोकं काम्यया ॥४४॥

स्थाली	उस स्थालीके	तेन द्वे	उससे दो अरणि (मन्थन-काष्ठ)
स्थानं	स्थानपर		
गतः सः	जाकर उसने	कृत्वा	बनाकर
शमीगर्भं	शमी वृक्षके भीतर	उर्वशी	उर्वशीका
अश्वत्थं	पीपल उगा	लोक काम्यया	लोक पानेकी इच्छा-से ॥४४॥
विलक्ष्य	देखकर		

उर्वशीं मन्त्रतो ध्यायन्नधरारणिमुत्तराम् ।
आत्मानमुभयोर्मध्ये यत् तत् प्रजननं प्रभुः ॥४५॥

उर्वशीं मन्त्रतः ध्यायन् अधर अरणिं उत्तरां आत्मानं उभयोः मध्ये यत् तत् प्रजननं प्रभुः ॥४५॥

अधर अरणिं	नीचेकी अरणिको	तत्	उसे उत्पन्न होनेवाले
उर्वशीं उत्तरां	उर्वशी और ऊपरकी को	प्रजननं	पुत्रके रूपमें
		मन्त्रतः	मन्त्रपूर्वक
आत्मानं	अपना स्वरूप	प्रभुः	उस समर्थने (मन्थन किया) ॥४५॥
ध्यायन्	ध्यान करने		
यत् मध्ये	जो बीचका स्थान था		

तस्य निर्मन्थनाज्जातो जातवेदा विभावसुः ।
त्रय्या स विद्यया राज्ञा पुत्रत्वे कल्पितस्त्रिवृत् ॥४६॥

तस्य निर्मन्थनात् जातः जातवेदा विभावसुः त्रय्या स विद्यया राज्ञा पुत्रत्वे कल्पितः त्रिवृत् ॥४६॥

तस्य	उसके	त्रिवृत्	तीन (आवहनीय, गार्हस्पत्य, दक्षिणा) रूपोंमें
निर्मन्थनात्	मन्थन करनेसे		
जातः जातवेदा	उत्पन्न जातवेदा नामक	पुत्रत्वे	पुत्र बनाकर
		कल्पितः	स्वीकार कर लिया ॥४६॥
विभावसुः	अग्निको		
स राज्ञा	उस राजाने		
त्रय्या विद्यया	त्रयी विद्याके द्वारा		

तेनायजत यज्ञेशं भगवन्तमधोक्षजम् ।
उर्वशीलोकमन्विच्छन् सर्वदेवमयं हरिम् ॥४७॥

तेन अयजत यज्ञेशं भगवन्तं अधोक्षजं उर्वशीलोकं अन्विच्छन् सर्वदेवमयं हरिम् ॥४७॥

तेन	उसके द्वारा	अन्विच्छन्	पानेकी कामनासे
उर्वशीलोकं	उर्वशीके लोकको	यज्ञेशं भगवन्तं	यज्ञेश भगवान

अधोक्षजं	हृषीकेश	हरिं अयजत	श्रीहरिकी आराधना
सर्वदेवमयं	सर्वदेवमय		की ॥४७॥

एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः ।
देवो नारायणो नान्य एकोऽग्निर्वर्ण एव च ॥४८॥

एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः देवः नारायणः न अन्य एकः अग्निः वर्ण एव च ॥४८॥

पुरा	इससे पूर्व (सतयुगमें)	देवः	देवता (आराध्य) थे
सर्ववाङ्मयः	सर्ववाणीमय	अन्य न	दूसरा कोई नहीं था
प्रणवः	प्रणव ही	अग्निः	अग्नि और
एक एव वेदः	एकमात्र वेद था,	वर्ण एव एकः	वर्ण भी एक (हस
नारायणः	(एक मात्र) नारायण		नामक) था ॥४८॥

पुरूरवस एवासीत् त्रयी त्रेतामुखे नृप ।
अग्निना प्रजया राजा लोकं गान्धर्वमेयिवान् ॥४९॥

पुरूरवस एव आसीत् त्रयी त्रेतामुखे नृप अग्निना प्रजया राजा लोकं गान्धर्वं एयिवान् ॥४९॥

नृप	राजन् !	राजा	उस राजाने
पुरूरवस एव	पुरूरवासे ही	अग्निना प्रजया	अग्नि रूपी पुत्र द्वारा
त्रेतामुखे	त्रेताके प्रारम्भमें	गान्धर्वं लोकं	गन्धर्व-लोकको
त्रयी	वेदत्रयी	एयिवान्	प्राप्त किया ॥४९॥
आसीत्	विद्या प्रारम्भ हुई*		

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे ऐलोपाख्याने चतुर्दशोऽध्यायः ॥१४॥

---

*वेद तो नित्य हैं। वे पहिले भी पूरे थे; किन्तु सतयुगके तपस्वी पुरुष केवल प्रणवका उपयोग करते थे। त्रेताके प्रारम्भमें कर्म, ज्ञान, उपासनात्मक वैदिक भागका उपयोग प्रारम्भ हुआ।

अथ पञ्चदशोऽध्यायः

श्रीशुक उवाच

ऐलस्य चोर्वशीगर्भात् षडासन्नात्मजा नृप ।
आयुः श्रुतायुः सत्यायू रयोऽथ विजयो जयः ॥१॥

ऐलस्य च उर्वशी गर्भात् षट् आसन् आत्मजा नृप आयुः श्रुतायुः सत्यायूः रयः अथ विजयः जयः ॥१॥

नृप	राजन् !	आयुः श्रुतायुः	आयु, श्रुतायु,
उर्वशी गर्भात्	उर्वशीके गर्भसे	सत्यायूः रयः	सत्यायु, रय,
ऐलस्य च	पुरूरवाके भी	विजयः अथ	विजय और
षट् आत्मजा	छः पुत्र	जयः	जय ॥१॥
आसन्	थे,		

श्रुतायोर्वसुमान् पुत्रः सत्यायोश्च श्रुतञ्जयः ।
रयस्य सुत एकश्च जयस्य तनयोऽमितः ॥२॥

श्रुतायोः वसुमान् पुत्रः सत्यायोः च श्रुतञ्जयः रयस्य सुत एकः च जयस्य तनयः अमितः ॥२॥

श्रुतायोः पुत्रः	श्रुतायुका पुत्र	रयस्य सुत	रयका पुत्र
वसुमान्	वसुमान हुआ,	एकः च जवस्य	एक, और जयका
च सत्यायोः	तथा सत्यायुका	तनयः अमितः	पुत्र अमित हुआ
श्रुतञ्जयः	श्रुतंजय,		॥२॥

मीमस्तु विजयस्याथ काञ्चनो होत्रकस्ततः ।
तस्य जह्नुः सुतो गङ्गां गण्डूषीकृत्य योऽपिबत् ।
जह्नोस्तु पूरुस्तत्पुत्रो बलाकश्चात्मजोऽजकः ॥३॥

भीमः तु विजयस्य अथ काञ्चनः होत्रकः ततः तस्य जह्नुः सुतः गंगां गण्डूषीकृत्य यः अपिबत् जह्नोः तु पुरुः तत् पुत्रः बलाकः च आत्मजः अजकः ॥३॥

विजयस्य	विजयका तो	गण्डूषीकृत्य	अञ्जलीमें लेकर
भीमः	भीम	अपिबत्	पी लिया था,
अथ काञ्चनः	उससे काञ्चन,	जह्नो तु पुरुः	जह्नुका तो पुरु,
ततः होत्रकः	उससे होत्रक,	तत् पुत्रः	उसका पुत्र
तस्य सुतः	उसका पुत्र	बलाकः	बलाक
जह्नुः	जह्नु हुआ	च आत्मजः	और उसका पुत्र
यः गंगां	जिसने गंगाको	अजकः	अजक हुआ ॥३॥

ततः कुशः कुशस्यापि कुशाम्बुस्तनयो वसुः ।
कुशनाभश्च चत्वारो गाधिरासीत् कुशाम्बुजः ॥४॥

ततः कुशः कुशस्य अपि कुशाम्बुः तनयः वसुः कुशनाभः च चत्वारः गाधिः आसीत् कुशाम्बुजः ॥४॥

ततः कुशः	उसके कुश,	कुशनाभः	कुशनाभ
कुशस्य अपि	कुशके भी	चत्वारः	चार पुत्र हुए,
कुशाम्बुः तनयः	कुशाम्बु, तनय,	कुशाम्बुजः	कुशाम्बुसे उत्पन्न
वसुः च	वसु तथा	गाधिः आसीत्	गाधि हुए ॥४॥

तस्य सत्यव्रतां कन्यामृचोकोऽयाचत द्विजः ।
वरं विसदृशं मत्वा गाधिर्भार्गवमब्रवीत् ॥५॥

तस्य सत्यवतीं कन्यां ऋचीकः अयाचत द्विजः वरं विसदृशं मत्वा गाधिः भार्गवं अब्रवीत् ॥५॥

तस्य कन्यां	उनकी कन्या	वरं मत्वा	वरको मानकर
सत्यवतीं	सत्यवतीको	भार्गवं	उस भृगुवंशी
द्विजः ऋचीकः	ब्राह्मण ऋचीकने		ब्राह्मणसे
अयाचत	मांगा,	गाधिः अब्रवीत्	गाधिने कहा ॥५॥
विसदृशं	असमान		

एकतः श्यामकर्णानां हयानां चन्द्रवर्चसाम् ।
सहस्रं दीयतां शुल्कं कन्यायाः कुशिका वयम् ॥६॥

एकतः श्यामकर्णानां हयानां चन्द्रवर्चसां सहस्रं दीयतां शुल्कं कन्यायाः कुशिका वयम् ॥६॥

वयं	हम लोग	श्यामकर्णानां	कान श्याम हो ऐसे
कुशिका	कुशिक-वंशी हैं,	सहस्रं हयानां	सहस्र घोड़े
चन्द्रवर्चसां	चन्द्रोज्वल	कन्यायाः	कन्याका
एकतः	एक	शुल्कं दीयतां	मूल्य दीजिए ॥६॥

इत्युक्तस्तन्मतं ज्ञात्वा गतः स वरुणान्तिकम् ।
आनीय दत्त्वा तानश्वानुपयेमे वराननाम् ॥७॥

इति उक्तः तत् मतं ज्ञात्वा गतः स वरुण अन्तिकं आनीय दत्त्वा तान् अश्वान् उपयेमे वराननाम् ॥७॥

इति उक्तः	ऐसा कहनेपर	तान् अश्वान्	उन अश्वोंको
तत् मतं ज्ञात्वा	उनकी इच्छा समझकर	आनीय दत्त्वा	लाकर देकर
वरुणस्य	वरुणके	वराननां	उस सुमुखीसे
अन्तिकं गतः	समीप जाकर	उपयेमे	विवाह किया ॥७॥

स ऋषिः प्रार्थितः पत्न्या श्वश्वा चापत्यकाम्यया ।
श्रपयित्वोभयैर्मन्त्रैश्चरुं स्नातुं गतो मुनिः ॥८॥

स ऋषिः प्रार्थितः पत्न्या श्वश्वा च अपत्य काम्यया श्रपयित्वा उभयैः मन्त्रैः चरुं स्नातुं गतः मुनिः ॥८॥

स ऋषिः	वे ऋषि	अपत्य	सन्तानकी
पत्न्या	पत्नी द्वारा	काम्यया	कामनासे
श्वश्वा च	अपने और उनकी सासके (अपनी माताके) लिए भी	प्रार्थितः	प्रार्थना करनेपर
		मन्त्रैः	मन्त्रों द्वारा
		उभयैः	दोनोंके लिए

चरुं श्रपयित्वा	चरु अभिमन्त्रित करके	स्नातुं गतः	स्नान करने चले गये ॥८॥
मुनिः	मौन होकर		

तावत् सत्यवती मात्रा स्वचरुं याचिता सती ।
श्रेष्ठं मत्वा तयायच्छन्मात्रे मातुरदत् स्वयम् ॥९॥

तावत् सत्यवती मात्रा स्वचरुं याचिता सती श्रेष्ठं मत्वा तया यच्छत् मात्रे मातुः अदत् स्वयम् ॥९॥

तावत्	तब तक	स्वचरुं	अपना चरु
श्रेष्ठं मत्वा	श्रेष्ठ मानकर	तया यच्छत्	उसको दे दिया
मात्रे	माता द्वारा	मातुः	माताका (चरु)
याचिता सती	मांगे जानेपर	स्वयं अदत्	स्वयं खा लिया ॥९॥

तद् विज्ञाय मुनिः प्राह पत्नीं कष्टमकारषीः ।
घोरो दण्डधरः पुत्रो भ्राता ते ब्रह्मवित्तमः ॥१०॥

तद् विज्ञाय मुनिः प्राह पत्नीं कष्टं अकारषीः घोरः दण्डधरः पुत्रः भ्राता ते ब्रह्मवित् तमः ॥१०॥

तद् विज्ञाय	उसे जानकर	घोरः	उग्र और
मुनिः पत्नीं	मुनिने पत्नीसे	दण्डधरः	दण्डधारी होगा,
प्राह	कहा	भ्राता	और भाई
कष्टं	'तुमने	ब्रह्मवित्	ब्रह्म-ज्ञानियोंमें
अकारषीः	अनर्थ कर डाला,	तमः	श्रेष्ठ होगा ॥१०॥
ते पुत्रः	तुम्हारा पुत्र		

प्रसादितः सत्यवत्या मैवं भूदिति भार्गवः ।
अथ तर्हि भवेत् पौत्रो जमदग्निस्ततोऽभवत् ॥११॥

प्रसादितः सत्यवत्या मा एवं भूत् इति भार्गवः अथ तर्हि भवेत् पौत्रः जमदग्निः ततः अभवत् ॥११॥

एवं मा भूत्	ऐसा न हो,	अथ तर्हि	'अच्छा तब
इति	ऐसा कहकर	पौत्रः भवेत्	ऐसा पौत्र हो'
सत्यवत्या	सत्यवती द्वारा	ततः	इससे उनके
प्रसादितः	प्रसन्न किये जानेपर	जमदग्निः	जमदग्नि
भार्गवः	उन भृगुवंशीने कहा–	अभवत्	उत्पन्न हुए ॥११॥

सा चाभूत् सुमहापुण्या कौशिकी लोकपावनी ।
रेणोः सुता रेणुकां वै जमदग्निरुवाह याम् ॥१२॥

सा च अभूत् सुमहत् पुण्या कौशिकी लोकपावनी रेणोः सुता रेणुकां वै जमदग्निः उवाह याम् ॥१२॥

सा च	वह सत्यवती भी	रेणोः सुता	रेणुकी पुत्री
लोकपावनी	लोकको पवित्र करने-वाली	वै रेणुकां	तो थी रेणुका
सुमहत् पुण्या	महान् पुण्य प्रदायिनी	यां जमदग्निः	जिसे जमदग्निने
कौशिकी अभूत्	कौशिकी नदी हो गयी,	उवाह	विवाहित किया ॥१२॥

तस्यां वै भार्गवऋषेः सुता वसुमदादयः ।
यवीयाञ्जज्ञ एतेषां राम इत्यभिविश्रुतः ॥१३॥

तस्यां वै भार्गवऋषेः सुता वसुमत् आदयः यवीयान् जज्ञ एतेषां राम इति अभिविश्रुतः ॥१३॥

तस्यां	उसमें उन	एतेषां	इनमें
भार्गवऋषेः	भृगुवंशी ऋषिसे	यवीयान्	सबसे छोटे
वै	तो	राम इति	राम इस नामसे
वसुमत् आदयः	वसुमान आदि	अभिविश्रुतः	अत्यन्त प्रसिद्ध हुए ॥१३॥
सुता जज्ञ	पुत्र उत्पन्न हुए,		

यमाहुर्वासुदेवांशं हैहयानां कुलान्तकम् ।
त्रिःसप्तकृत्वो य इमां चक्रे निःक्षत्रियां महीम् ॥१४॥

यं आहुः वासुदेव अंशं हैहयानां कुल अन्तकं त्रिः सप्त कृत्वः य इमां चक्रे निःक्षत्रियां महीम् ॥१४॥

हैहयानां	हैहयवंशी क्षत्रियोंके	य इमां महीं	जिन्होंने इस पृथ्वीको
कुल अन्तकं	कुलका अन्त करने-वाले	त्रिः सप्त कृत्वः	इक्कीस बार
यं वासुदेव	जिनको वासुदेवका	निःक्षत्रियां	क्षत्रिय रहित
अंशं आहुः	अंश कहा गया है	चक्रे	बना दिया ॥१४॥

दुष्टं क्षत्रं भुवो भारमब्रह्मण्यमनीनशत् ।
रजस्तमोवृतमहन् फल्गुन्यपि कृतेंऽहसि ॥१५॥

दुष्टं क्षत्रं भुवः भारं अब्रह्मण्यं अनीनशत् रजः तमः वृतं अहन् फल्गूनि अपि कृते अंहसि ॥१५॥

फल्गूनि अपि	छोटेसे ही	दुष्टं क्षत्रं	दुष्ट क्षत्रियोंको
अंहसि कृते	अपराध करनेपर	अहन्	मारकर
रजः तमः वृतं	रजोगुण-तमोगुण युक्त	अनीनशत्	नष्ट कर दिया ॥१५॥
अब्रह्मण्यं	ब्राह्मण विरोधी		
भुवः भारं	पृथ्वीके भाररूप		

राजोवाच–

किं तदंहो भगवतो राजन्यैरजितात्मभिः ।
कृतं येन कुलं नष्टं क्षत्रियाणामभीक्ष्णशः ॥१६॥

किं तत् अंहः भगवतः राजन्यैः अजितात्मभिः कृतं येन कुलं नष्टं क्षत्रियाणां अभीक्ष्णशः ॥१६॥

अजितात्मभिः	अजितेन्द्रिय	अंहः कृतं	अपराध किया
राजन्यैः	राजाओंने	येन क्षत्रियाणां	जिससे क्षत्रियोंका
भगवतः	भगवान (परशुराम) का	कुलं	कुल
		अभीक्ष्णशः	बार-बार
तत् किं	वह क्या	नष्टं	नष्ट हुआ ॥१६॥

श्रीशुक उवाच—

हैहयानामधिपतिरर्जुनः क्षत्रियर्षभः ।
दत्तं नारायणस्यांशमाराध्य परिकर्मभिः ॥१७॥

हैहयानां अधिपतिः अर्जुनः क्षत्रिय ऋषभः दत्तं नारायणस्य अंशं आराध्य परिकर्मभिः ॥१७॥

क्षत्रिय ऋषभः	क्षत्रिय श्रेष्ठ
हैहयानां	हैहय-
अधिपतिः	राज
अर्जुनः	अर्जुनने
परिकर्मभिः	अनेक प्रकारसे सेवा करके
नारायणस्य	श्रीनारायणके
अंशं दत्तं	अंश दत्तात्रेयजीकी
आराध्य	आराधना करके ॥१७॥

बाहून् दशशतं लेभे दुर्धर्षत्वमरातिषु ।
अव्याहतेन्द्रियौजःश्रीतेजोवीर्य यशोबलम् ॥१८॥

बाहून् दशशतं लेभे दुर्धर्षत्वं अरातिषु अव्याहत इन्द्रिय ओजः श्री तेजः वीर्य यशः बलम् ॥१८॥

दशशतं बाहून्	एक सहस्र भुजाएँ,
अरातिषु	शत्रुओंसे
दुर्धर्षत्वं	अपराजिता,
अव्याहत	अप्रतिहत
इन्द्रिय ओजः	इन्द्रिय बल,
श्री तेजः वीर्य	लक्ष्मी, तेज, वीर्य
यशः बलं	यश, शारीरिक बल
लेभे	प्राप्त किया ॥१८॥

योगेश्वरत्वमैश्वर्यं गुणा यत्राणिमादयः ।
चचाराव्याहतगतिर्लोकेषु पवनो यथा ॥१९॥

योगेश्वरत्वं ऐश्वर्यं गुणा यत्र अणिमा आदयः चचार अव्याहत गतिः लोकेषु पवनः यथा ॥१९॥

यत्र अणिमा आदयः गुणा	जिसमें अणिमा आदि गुण होते हैं,
योगेश्वरत्वं	योगेश्वरत्वके
ऐश्वर्यं	उस ऐश्वर्यको (पाकर)
पवनः यथा	वायुके समान

अव्याहत गतिः	अप्रतिरुद्ध गति	चचार	विचरण करने लगा ॥१९॥
लोकेषु	लोकोंमें		

स्त्रीरत्नैरावृतः क्रीडन् रेवाम्भसि मदोत्कटः ।
वैजयन्तीं स्रजं बिभ्रद् रुरोध सरितं भुजैः ॥२०॥

स्त्री रत्नैः आवृतः क्रीडन् रेवा अम्भसि मद उत्कटः वैजयन्तीं स्रजं विभ्रत् रुरोध सरितं भुजैः ॥२०॥

वैजयन्तीं स्रजं	वैजवन्ती माला	मद उत्कटः	मदोन्मत्त
विभ्रत्	धारण करके	क्रीडन्	क्रीड़ा करता हुआ
रेवा अम्भसि	नर्मदाके जलमें	भुजैः सरितं	भुजाओंसे नदीको
स्त्री रत्नैः	स्त्री रत्नोंसे	रुरोध	रोक दिया ॥२०॥
आवृतः	घिरा		

विप्लावितं स्वशिबिरं प्रतिस्रोतः सरिज्जलैः ।
नामृष्यत् तस्य तद् वीर्यं वीरमानी दशाननः ॥२१॥

विप्लावितं स्वशिबिरं प्रति स्रोतः सरित् जलैः न अमृष्यत् तस्य तत् वीर्यं वीरमानी दशाननः ॥२१॥

सरित्	(इससे) सरिताका	दशाननः	दशग्रीव रावण
जलैः	जल	तस्य तत्	उसके उस
प्रति स्रोतः	उलटा बहनेसे	वीर्यं	पराक्रमको
स्वशिबिरं	अपने शिविरको	अमृश्यत् न	सहन नहीं कर सका ॥२१॥
विप्लावितं	डूबता देखकर		
वीरमानी	अपनेको वीर मानने वाला		

गृहीतो लीलया स्त्रीणां समक्षं कृतकिल्बिषः ।
माहिष्मत्यां संनिरुद्धो मुक्तो येन कपिर्यथा ॥२२॥

गृहीतः लीलया स्त्रीणां समक्षं कृत किल्विषः माहिष्मत्यां सन्निरुद्धः मुक्तः येन कपिः यथा ॥२२॥

येन कृत	जिसने अपना	गृहीतः	पकड़कर
किल्बिषः	अपराध करनेपर	माहिष्मत्यां	माहिष्मती पुरीमें
स्त्रीणां समक्षं	स्त्रियोंके सामने ही	संनिरुद्धः	बन्दी कर दिया
कपिः यथा	बन्दरके समान	मुक्तः	फिर छोड़ दिया
लीलया	(रावणको) खेलमें		॥२२॥

स एकदा तु मृगयां विचरन् विपिने वने ।
यदृच्छयाऽऽश्रमपदं जमदग्नेरुपाविशत् ॥२३॥

स एकदा तु मृगयां विचरन् विपिने वने यदृच्छया आश्रमपदं जमदग्नेः उप आविशत् ॥२३॥

एकदा स तु	एक बार वह तो	जमदग्नेः	ऋषि जमदग्निके
विपिने वने	गहन वनमें	आश्रमपदं	आश्रम-स्थानके
मृगयां विचरन्	आखेट खेलते घूमता	उप आविशत्	समीप पहुँच गया
यदृच्छया	संयोगवश		॥२३॥

तस्मै स नरदेवाय मुनिरर्हणमाहरत् ।
ससैन्यामात्यवाहाय हविष्मत्या तपोधनः ॥२४॥

तस्मै स नरदेवाय मुनिः अर्हणं आहरत् स सैन्य अमात्य वाहाय हविष्मत्या तपोधनः ॥२४॥

तस्मै नरदेवाय	उस राजाका	मुनिः	मुनिने
सैन्य अमात्य	सेना, मन्त्री एवं	हविष्मत्या	अपनी गौ के द्वारा
स वाहाय	वाहनों सहित	अर्हणं आहरत्	सत्कार किया
स तपोधनः	उन तपस्वी		॥२४॥

स वीरस्तत्र तद् दृष्ट्वा आत्मैश्वर्यातिशायनम् ।
तन्नाद्रियताग्निहोत्र्यां साभिलाषः स हैहयः ॥२५॥

स वीरः तत्र तत् दृष्ट्वा आत्म ऐश्वर्य अतिशायनं तत् न अद्रियत् अग्निहोत्र्यां साभिलाषः स हैहयः ॥२५॥

स हैहयः	दूसरे हैहय-वंशियोंके साथ
स वीरः	उस वीर (सहस्रार्जुन) ने
तत्र आत्म	वहाँ अपने
ऐश्वर्य	ऐश्वर्यसे
तत् अतिशायनं	वह अतिशयता
दृष्ट्वा	देखकर
अग्निहोत्र्यां	उस होम-धेनुके लिए
साभिलाषः	अभिलाषा वाला होकर
तत्	उस
अद्रियत्	सत्कारका आदर
न	नहीं किया ॥२५॥

हविर्धानीमृषेर्दर्पान्नरान् हर्तुमचोदयत् ।
ते च माहिष्मतीं निन्युः सवत्सां क्रन्दतीं बलात् ॥२६॥

हविर्धानीं ऋषेः दर्पात् नरान् हर्तुं अचोदयत् ते च माहिष्मतीं निन्युः सवत्सां क्रन्दतीं बलात् ॥२६॥

दर्पात् ऋषेः	घमण्डवश ऋषिकी
हविर्धानीं	कामधेनुको
हर्तुं	हरण करनेके लिए
नरान्	अपने सेवकोंको
अचोदयत्	प्रेरणा दी
ते च क्रन्दन्तीं	वे भी डकराती हुई
सवत्सां बलात्	बछड़ेके साथ उसे
बलात्	बलपूर्वक
माहिष्मतीं	माहिष्मती पुरी
निन्युः	ले गये ॥२६॥

अथ राजनि निर्याते राम आश्रम आगतः ।
श्रुत्वा तत् तस्य दौरात्म्यं चुक्रोधाहिरिवाहतः ॥२७॥

अथ राजनि निर्याते राम आश्रम आगतः श्रुत्वा तत् तस्य दौरात्म्यं चुक्रोध अहिः इव आहतः ॥२७॥

अथ राजनि	फिर राजाके
निर्याते	निकल जानेपर
राम आश्रम	परशुरामने आश्रममें
आगतः	आकर
तस्य तत्	उस (सहस्रार्जुन) की वह
दौरात्म्यं श्रुत्वा	दुष्टता सुनकर
आहतः अहिः	घायल सर्पके
इव	समान
चुक्रोध	कुपित हो गये ॥२७॥

घोरमादाय परशुं सतूणं चर्म कार्मुकम् ।
अन्वधावत दुर्धर्षो मृगेन्द्र इव यूथपम् ॥२८॥

घोरं आदाय परशुं सतूणं चर्म कार्मुकं अन्वधावत दुर्धर्षः मृगेन्द्र इव यूथपम् ॥२८॥

घोरं परशुं	भयंकर परशु एवं	यूथपं	गजराजकी ओर
सतूणं	तरकशके साथ	मृगेन्द्र इव	सिंहके समान
कार्मुकं	धनुष	दुर्धर्षः	असह्य वेग वे
आदाय	लेकर	अन्वधावत	पीछे दौड़ पड़े ॥२८॥
चर्म	मृगचर्म पहिने		

तमापतन्तं भृगुवर्यमोजसा
धनुर्धरं बाणपरश्वधायुधम् ।
ऐणेयचर्माम्बरमर्कधामभि-
र्युतं जटाभिर्ददृशे पुरीं विशन् ॥२९॥

तं आपतन्तं भृगुवर्यं ओजसा धनुःधरं बाण परश्वध आयुधं ऐणेय चर्म अम्बरं अर्कधामभिः युतं जटाभिः ददृशे पुरीं विशन् ॥२९॥

धनुःधरं	धनुषधारी	जटाभिः	जटाजूटवाले
बाण परश्वध	बाण, परशु	तं भृगुवर्यं	उन भृगु श्रेष्ठको
आयुधं	आयुधवाले	ओजसा	बड़े वेगसे
ऐणेय चर्म	कृष्ण-मृग-चर्मके	आपतन्तं	आते
अम्बरं	वस्त्रवाले,	पुरीं विशन्	पुरीमें प्रवेश करते
अर्कधामभिः	सूर्यके समान तेजोमयी	ददृशे	(सहस्रार्जुनने) देखा ॥२९॥

अचोदयद्धस्तिरथाश्वपत्तिभि-
र्गदासिबाणर्ष्टिशतघ्निशक्तिभिः ।
अक्षौहिणीः सप्तदशातिभीषणा-
स्ता राम एको भगवानसूदयत् ॥३०॥

अचोदयत् हस्ति रथ अश्व पत्तिभिः गदा असि बाण ऋष्टि शतघ्नि शक्तिभिः अक्षौहिणीः सप्तदश अति भीषणाः ता राम एकः भगवान् असूदयत् ॥३०॥

गदा असि	गदा, तलवार,	अति भीषणाः	अत्यन्त भयंकर
बाण ऋष्टि	बाण, ऋष्टि,	सप्तदश	सत्रह
शतघ्नि	शतघ्नी,	अक्षौहिणीः	अक्षौहिणी सेना
शक्तिभिः	शक्तिवाली	अचोदयत्	प्रेरित की
हस्ति रथ	हाथी, रथ,	ता एकः	उसे अकेले
अश्व	घोड़े,	भगवान् राम	भगवान रामने
पत्तिभिः	पैदलवाली चतुरंगिणी	असूदयत्	मार डाला ॥३०॥

यतो यतोऽसौ प्रहरत्परश्वधो
मनोऽनिलौजाः परचक्रसूदनः ।
ततस्ततश्छिन्नभुजोरुकन्धरा
निपेतुरुर्व्यां हतसूतवाहनाः ॥३१॥

यतः यतः असौ प्रहरत् परश्वधः मनः अनिल ओजाः पर चक्रसूदनः ततः ततः छिन्न भुज उरु कन्धरा-निपेतुः उर्व्यां हत सूत वाहनाः ॥३१॥

मनः	मन तथा	ततः ततः	वहां-वहां
अनिल	वायुके समान	भुज उरु	भुजा, जांघे,
ओजाः	वेगवाले	कन्धरा	कन्धे
पर चक्रसूदनः	शत्रु सेनाके संहारक	छिन्न सूत	कटे, सारथि तथा
असौ	ये (परशुरामजी)	वाहनाः	वाहन
यतः यतः	जहां-जहां	हत	मारे जानेसे
परश्वधः	परशुका	उर्व्यां निपेतुः	शत्रु पृथ्वीपर गिर पड़े ॥३१॥
प्रहरत	प्रहारते करते थे		

दृष्ट्वा स्वसैन्यं रुधिरौघकर्दमे
रणाजिरे रामकुठारसायकैः ।

विवृक्णचर्मध्वजचापविग्रहं
निपातितं हैहय आपतद् रुषा ॥३२॥

दृष्ट्वा स्वसैन्यं रुधिर ओघ कर्दमे रण अजिरे राम कुठार सायकैः विवृक्ण चर्मध्वज चाप विग्रहं निपातितं हैहय आपतत् रुषा ॥३२॥

राम कुठार	परशुरामके परशू तथा	रुधिर ओघ	रक्तकी बाढ़ एवं
सायकैः	वाणों द्वारा	कर्दमे निपातितं	कीचड़में गिराये गये
चमध्वज	छाल, ध्वजा,	स्वसैन्यं	अपनी सेनाको
चाप विग्रहं	धनुष एवं शरीरोंको	दृष्ट्वा रुषा	देखकर क्रोधसे
विवृक्ण	छिन्न-भिन्न होनेसे	हैहय	हैहयराज स्वय
रण अजिरे	रणाङ्गनमें	आपतत्	आ धमका ॥३२॥

अथार्जुनः पञ्चशतेषु बाहुभि-
र्धनुःषु बाणान् युगपत् स सन्दधे ।
रामाय रामोऽस्त्रभृतां समग्रणी-
स्तान्येकधन्वेषुभिराच्छिनत् समम् ॥३३॥

अथ अर्जुनः पञ्चशतेषु बाहुभिः धनुःषु बाणान् युगपत् स सन्दधे रामाय रामः अस्त्रभृतां समग्रणीः तान् एकधन्व इषुभिः आच्छिनत् समम् ॥३३॥

अथ अर्जुनः	फिर सहस्रार्जुनने	अस्त्रभृतां	अस्त्र-धारियोंमें
बाहुभिः	भुजाओंसे	समग्रणीः	सर्वाग्रगण्य
पञ्चशतेषु	पांच सौ	रामः	परशुरामजीने
धनुःषु	धनुषोंपर	एकधन्व	एक ही धनुषसे
स युगपत्	सबपर एक साथ	इषुभिः	बाणोंसे उनको
बाणान् सन्दधे	बाण चढ़ाकर	समं आच्छिनत्	एक साथ ही काट
रामाय	परशुरामके लिए		डाला ॥३३॥
	छोड़		

पुनः स्वहस्तैरचलान् मृधेऽङ्घ्रिपा-
नुत्क्षिप्य वेगादभिधावतो युधि ।
भुजान् कुठारेण कठोरनेमिना
चिच्छेद रामः प्रसभं त्वहेरिव ॥३४॥

पुनः स्वहस्तैः अचलान् मृधे अङ्घ्रिपान् उत्क्षिप्य वेगात् अभिधावतः युधि भुजान् कुठारेण कठोर नेमिना चिच्छेद रामः प्रसभं तु अहेः इव ॥३४॥

पुनः मृधे	फिर युद्धमें	अभिधावतः	दौड़े आते (सहस्र अर्जुन) की
स्वहस्तैः	अपने हाथोंसे	अहेः इव	सर्पोंके समान
अचलान्	पर्वतोंको तथा	भुजान्	भुजाओंको
अङ्घ्रिपान्	वृक्षोंको	कठोर नेमिना	तीक्ष्ण धारवाले
उत्क्षिप्य	उठाकर फेंकते हुए	कुठारेण	परशूसे
वेगात्	वेगपूर्वक	प्रसभं चिच्छेद	फुर्तीसे काट डाला ॥३४॥
युधि	युद्ध करने सामने		

कृत्तबाहोः शिरस्तस्य गिरेः शृङ्गमिवाहरत् ।
हते पितरि तत्पुत्रा अयुतं दुद्रुवुर्भयात् ॥३५॥

कृत्तबाहोः शिरः तस्य गिरेः शृङ्गं इव आहरत् हते पितरि तत् पुत्रा अयुतं दुद्रुवुः भयात् ॥३५॥

कृत्त बाहोः	भुजाएँ कट जानेपर	पितरि हते	पिताके मारे जानेपर
गिरेः शृंग	पर्वत शिखरके	तत् अयुतं	उसके दस सहस्र
इव	समान	पुत्रा	पुत्र
तस्य शिरः	उसका सिर	भयात् दुद्रुवुः	भयसे भाग गये ॥३५॥
आहरत्	काट लिया,		

अग्निहोत्रीमुपावर्त्य सवत्सां परवीरहा ।
समुपेत्याश्रमं पित्रे परिक्लिष्टां समर्पयत् ॥३६॥

अग्निहोत्रीं उपावर्त्य सवत्सां परवीरहा सम उपेत्य आश्रमं पित्रे परिक्लिष्टां समर्पयत् ॥३६॥

परवीरहा	शत्रु वीरोंके हन्ता (परशुरामजी)	उपावर्त्य	लौटाकर
सवत्सां	बछड़े के साथ	आश्रमं	उसके सहित आश्रममें
परिक्लिष्टां	अत्यन्त पीड़िता	समुपेत्य	आकर
अग्निहोत्रीं	होमधेनुको	पित्रे समर्पयत्	पिताको दे दिया ॥३६॥

स्वकर्म तत्कृतं रामः पित्रे भ्रातृभ्य एव च ।
वर्णयामास तच्छ्रुत्वा जमदग्निरभाषत ॥३७॥

स्व कर्म तत् कृतं रामः पित्रे भ्रातृभ्य एव च वर्णयामास तत् श्रुत्वा जमदग्निः अभाषत ॥३७॥

तत्	उस (गौ) के लिए	रामः	परशुरामने
कृतं	किया हुआ	वर्णयामास	वर्णन किया
स्व कर्म	अपना कर्म	तत् श्रुत्वा	उसे सुनकर
पित्रे च	पितासे और	जमदग्निः	जमदग्निजी
भ्रातृभ्य एव	भाइयोंसे भी	अभाषत	बोले ॥३७॥

राम राम महाबाहो भवान् पापमकारषीत् ।
अवधीन्नरदेवं यत् सर्वदेवमयं वृथा ॥३८॥

राम राम महाबाहो भवान् पापं अकारषीत् अवधीत् नरदेवं यत् सर्व देवमयं वृथा ॥३८॥

राम राम	हे राम, हे राम,	यत् सर्वदेवमयं	क्योंकि सर्वदेवमय
महाबाहो	महाबाहो !	नरदेवं वृथा	राजाको व्यर्थ
भवान्	तुमने	अवधीत्	मारा है ॥३८॥
पापं अकारषीत्	पाप किया है,		

वयं हि ब्राह्मणास्तात क्षमयार्हणतां गताः ।
यया लोकगुरुर्देवः पारमेष्ठ्यमगात् पदम् ॥३९॥

वयं हि ब्राह्मणाः तात क्षमया अर्हणतां गताः यया लोकगुरुः देवः पारमेष्ठ्यं अगात् पदम् ॥३९॥

तात वयं	तात ! हम	लोकगुरुः	लोकगुरु
ब्राह्मणाः हि	ब्राह्मण क्योंकि	पारमेष्ठ्यं	ब्रह्माके
क्षमया	क्षमाके द्वारा	पदं अगात्	पद पर पहुँचे हैं
अर्हणतां गताः	पूजनीय हुए हैं,		॥३९॥
यया देवः	जिससे पूज्य		

क्षमया रोचते लक्ष्मीर्ब्राह्मी सौरी यथा प्रभा ।
क्षमिणामाशु भगवांस्तुष्यते हरिरीश्वरः ॥४०॥

क्षमया रोचते लक्ष्मीः ब्राह्मीः सौरी यथा प्रभा क्षमिणां आशु भगवान् तुष्यते हरिः ईश्वरः ॥४०॥

क्षमया	क्षमाके द्वारा	भगवान् ईश्वरः	भगवान् सर्वेश्वर
ब्राह्मीः लक्ष्मीः	ब्रह्म-सम्पति	हरिः क्षमिणां	श्रीहरि क्षमावानोंसे
सौरी प्रभा	सूर्यकी प्रभाके	आशु तुष्यते	शीघ्र प्रसन्न होते हैं
यथा	समान		॥४०॥
रोचते	प्रकाशित होती है		

राज्ञो मूर्धाभिषिक्तस्य वधो ब्रह्मवधाद् गुरुः ।
तीर्थसंसेवया चांहो जह्यङ्गाच्युतचेतनः ॥४१॥

राज्ञः मूर्धा अभिषिक्तस्य वधः ब्रह्मवधात् गुरुः तीर्थ संसेवया च अंहः जहि अच्युत चेतनः ॥४१॥

मूर्धा	सिरसे	राज्ञः वधः	राजाका वध
अभिषिक्तस्य	अभिषेक सम्पन्न	ब्रह्मवधात्	ब्रह्म-हत्यासे भी

गुरुः	बड़ा (पाप) है,	तीर्थ संसेवया	तीर्थोंके सेवनसे
अच्युत	अच्युत भगवान्में	अंहः च जहि	इस पापको भी नष्ट
चेतनः	चित्त लगाकर		करो ॥४१॥
	(अथवा) भगवदीय		
	अंश होनेपर भी		

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे पञ्चदशोऽध्यायः ॥१५॥

अथ षोडशोऽध्यायः

श्रीशुक उवाच

पित्रोपशिक्षितो रामस्तथेति कुरुनन्दन ।
संवत्सरं तीर्थयात्रां चरित्वाऽऽश्रममाव्रजत् ॥१॥

पित्रः उपशिक्षितः रामः तथा इति कुरुनन्दन संवत्सरं तीर्थयात्रां चरित्वा आश्रमं आव्रजत् ॥१॥

कुरुनन्दन	परीक्षित !	इति	इस प्रकार (स्वीकार करके)
पित्रः	पिता द्वारा	संवत्सरं	एक वर्ष तक
उपशिक्षितः	उपदेश कियेको	तीर्थयात्रां	तीर्थयात्रा
रामः तथा	परशुरामजीने 'अच्छा'	चरित्वा आश्रमं	करके आश्रमपर
		आव्रजत्	लौट आये ॥१॥

कदाचिद् रेणुका याता गंगायां पद्ममालिनम् ।
गन्धर्वराजं क्रीडन्तमप्सरोभिरपश्यत ॥२॥

कदाचित् रेणुका याता गंगायां पद्ममालिनं गन्धर्वराजं क्रीडन्तं अप्सरः भिः अपश्यत ॥२॥

कदाचित्	किसी समय	गन्धर्वराजं	गन्धर्वराजको
रेणुका गंगायां	रेणुका गंगातटपर	अप्सरःभिः	अप्सराओंके साथ
याता	गयीं (वहां)	क्रीडन्तं	क्रीड़ा करते हुए
पद्ममालिनं	कमल-मालाधारी	अपश्यत	देखा ॥२॥

विलोकयन्ती क्रीडन्तमुदकार्थं नदीं गता ।
होमवेलां न सस्मार किञ्चिच्चित्ररथस्पृहा ॥३॥

विलोकयन्ती क्रीडन्तं उदक अर्थं नदीं गता होमवेलां न सस्मार किञ्चित् चित्ररथ स्पृहा ॥३॥

उदक अर्थं	जल लेनेके लिए	चित्ररथ स्पृहा	चित्ररथकी इच्छासे
नदीं गता	नदी-तटपर जाकर	होमवेलां	हवनके समयका
क्रीडन्तं	(उसे) क्रीड़ा करते	सस्मार न	स्मरण नहीं कर
विलोकयन्ती	देखते हुए		सकीं ॥३॥
किञ्चित्	कुछ-कुछ		

कालात्ययं तं विलोक्य मुनेः शापविशङ्किता ।
आगत्य कलशं तस्थौ पुरोधाय कृताञ्जलिः ॥४॥

काल अत्ययं तं विलोक्य मुनेः शाप विशङ्किता आगत्य कलशं तस्थौ पुरः आधाय कृत अञ्जलिः ॥४॥

तं काल	उस हवन कालको	आगत्य	आकर
अत्ययं	बीता	कलशं पुरः	कलश सम्मुख
विलोक्य	देखकर	आधाय	रखकर
मुनेः शाप	मुनिके शापसे	कृत अञ्जलिः	हाथ जोड़कर
विशङ्किता	शंकित होकर	तस्थौ	खड़ी हो गयीं ॥४॥

व्यभिचारं मुनिर्ज्ञात्वा पत्न्याः प्रकुपितोऽब्रवीत् ।
घ्नतैनां पुत्रकाः पापामित्युक्तास्ते न चक्रिरे ॥५॥

व्यभिचारं मुनिः ज्ञात्वा पत्न्याः प्रकुपितः अब्रवीत् घ्नत एनां पुत्रकाः पापां इति उक्ताः ते न चक्रिरे ॥५॥

मुनिः पत्न्याः	मुनि-पत्नीका	पुत्रकाः एनां	'पुत्रो ! इस
व्यभिचारं	(मानसिक) व्यभि-	पापां घ्नत	पापिनीको मार दो !'
	चार	इति उक्ताः	ऐसा कहनेपर
ज्ञात्वा	जानकर बहुत	ते न चक्रिरे	उन्होंने ऐसा नहीं
प्रकुपितः	क्रुद्ध होकर		किया ॥५॥
अब्रवीत्	बोले		

रामः सञ्चोदितः पित्रा भ्रातॄन् मात्रा सहावधीत् ।
प्रभावज्ञो मुनेः सम्यक् समाधेस्तपसश्च सः ॥६॥

रामः सञ्चोदितः पित्रा भ्रातॄन् मात्रा सह अवधीत् प्रभावज्ञः मुनेः सम्यक् समाधेः तपसः च सः ॥६॥

पित्रा:	पिता द्वारा	सः मुनेः	वे मुनिकी
सञ्चोदितः	प्रेरित किये जानेपर	समाधेः	समाधि
रामः भ्रातॄन्	परशुरामने भाइयोंका	च तपसः	तथा तपस्याका
मात्रा सह	माताके साथ	सम्यक्	भली प्रकार
अवधीत्	वध कर दिया; क्योंकि	प्रभावज्ञः	प्रभाव जाननेवाले थे ॥६॥

वरेणच्छन्दयामास प्रीतः सत्यवतीसुतः ।
वव्रे हतानां रामोऽपि जीवितं चास्मृतिं वधे ॥७॥

वरेण छन्दयामास प्रीतः सत्यवती सुतः वव्रे हतानां रामः अपि जीवितं च अस्मृतिं वधे ॥७॥

सत्यवती सुतः	सत्यवतीनन्दन (जमदग्नि) ने	हतानां जीवितं च वधे	मारे लोगोंका जीवन तथा वधके सम्बन्ध-की
प्रीतः	प्रसन्न होकर		
वरेण	इच्छानुसार वरदान	अस्मृतिं वव्रे	स्मृतिहीनता मांगी ॥७॥
छन्दयामास	मांगनेको कहा—		
रामः अपि	परशुरामने भी		

उत्तस्थुस्ते कुशलिनो निद्रापाय इवाञ्जसा ।
पितुर्विद्वांस्तपोवीर्यं रामश्चक्रे सुहृद्वधम् ॥८॥

उत्तस्थुः ते कुशलिनः निद्रा अपाय इव अञ्जसा पितुः विद्वान् तपः वीर्यं रामः चक्रे सुहृत् वधम् ॥८॥

निद्रा अपाय इव	निद्रा टूटनेके समान	अञ्जसा ते कुशलिनः	सरलतासे वे कुशलपूर्वक

उत्तस्थुः	उठ गये,	रामः सुहृत्	परशुरामने सुहृदोंका
पितुः तपः	पिताके तपके	वधं चक्रे	वध किया था ॥८॥
वीर्यं विद्वान्	प्रभावको जानकर		

येऽर्जुनस्य सुता राजन् स्मरन्तः स्वपितुर्वधम् ।
रामवीर्यपराभूता लेभिरे शर्म न क्वचित् ॥९॥

ये अर्जुनस्य सुता राजन् स्मरन्तः स्वपितुः वधं रामवीर्यं पराभूता लेभिरे शर्म न क्वचित् ॥९॥

राजन्	राजन् !	स्वपितुः वधं	अपने पिताके वधका
ये अर्जुनस्य सुता	जो सहस्रार्जुनके पुत्र	स्मरन्तः	स्मरण करते हुए
रामवीर्य	परशुरामके पराक्रमसे	क्वचित् शर्म	कभी शान्ति
पराभूता	पराजित हो गये थे,	न लेभिरे	नहीं पा सके ॥९॥

एकदाऽऽश्रमतो रामे सभ्रातरि वनं गते ।
वैरं सिसाधयिषवो लब्धच्छिद्रा उपागमन् ॥१०॥

एकदा आश्रमतः रामे सभ्रातरि वनं गते वैरं सिसाधयिषवः लब्ध छिद्रा उप आगमन् ॥१०॥

एकदा	एक बार	लब्धछिद्रा	वे अवसर पाकर
आश्रमतः	आश्रमसे	वैरं	शत्रुता
सभ्रातरि	भाइयोंके साथ	सिसाधयिषवः	चुकानेकी इच्छावाले
रामे वनं	परशुरामके वनमें	उप आगमन्	समीप आ गये
गते	चले जानेपर		॥१०॥

दृष्ट्वाग्न्यगार आसीनमावेशितधियं मुनिम् ।
भगवत्युत्तमश्लोके जघ्नुस्ते पापनिश्चयाः ॥११॥

दृष्ट्वा अग्न्य आगार आसीनं आवेशितधियं मुनिं भगवति उत्तम श्लोके जघ्नुः ते पाप निश्चयाः ॥११॥

अग्न्य आगार	अग्निशालामें	भगवति	भगवान
आसीनं	बैठे हुए	उत्तम श्लोके	पवित्र कीर्तिमें

आवेशितधियं	बुद्धि लगाये	निश्चयाः	निश्चय करके
मुनिं	मुनि जमदग्निको	जघ्नुः	(उनको) मार दिया
दृष्ट्वा	देखकर		॥११॥
ते पाप	वे पापका		

याच्यमानाः कृपणया राममात्रातिदारुणाः ।
प्रसह्य शिर उत्कृत्य निन्युस्ते क्षत्रबन्धवः ॥१२॥

याच्यमानाः कृपणया राम मात्रा अतिदारुणाः प्रसह्य शिर उत्कृत्य निन्युः ते क्षत्रबन्धवः ॥१२॥

अतिदारुणाः	अत्यन्त क्रूर	याच्यमानाः	प्रार्थना करनेपर भी
क्षत्रबन्धवः	क्षत्रियाधम	ते प्रसह्य	उन्होंने बलात्कारसे
कृपणया	दीनतापूर्वक	शिर	(उन मुनिका) सिर
राम	परशुरामकी	उत्कृत्य	काटकर
मात्रा	माता द्वारा	निन्युः	ले गये ॥१२॥

रेणुका दुःखशोकार्ता निघ्नन्त्याऽऽत्मानमात्मना ।
राम रामेहि तातेति विचुक्रोशोच्चकैः सती ॥१३॥

रेणुका दुःख शोक आर्ता निघ्नन्ति आत्मानं आत्मना राम राम एहि तात इति विचुक्रोश उच्चकैः सती ॥१३॥

दुःख शोक	दुःख-शोक	राम राम एहि	'राम ! राम आओ !
आर्ता सती	व्याकुल सती	तात इति	बेटा आओ !'
रेणुका	रेणुका	उच्चकैः	यह उच्च स्वरसे
आत्मानं	अपने आप	विचुक्रोश	चिल्लाने लगी
आत्मना	अपना देह (छाती)		॥१३॥
निघ्नन्ति	पीटती हुई		

तदुपश्रुत्य दूरस्थो हा रामेत्यार्तवत्स्वरम् ।
त्वरयाऽऽश्रममासाद्य ददृशे पितरं हतम् ॥१४॥

तत् उपश्रुत्य दूरस्थः हा राम इति आर्तवत् स्वरं त्वरया आश्रमं आसाद्य ददृशे पितरं हतम् ॥१४॥

दूरस्थः	दूरपर स्थित (परशुरामने)	त्वरया	शीघ्रता पूर्वक
		आश्रमं	आश्रमपर
तत् हा राम	वह 'हा राम'	आसाद्य	पहुँचकर
इति आर्तवत्	ऐसा आर्तनाद जैसा	हतं पितरं	मारे गये पिताको
स्वरं उपश्रुत्य	स्वर सुनकर	ददृशे	देखा ॥१४॥

तद् दुःखरोषामर्षार्तिशोकवेगविमोहितः ।
हा तात साधो धर्मिष्ठ त्यक्त्वास्मान् स्वर्गतो भवान् ॥१५॥

तत् दुःख रोष अमर्ष आर्ति शोक वेग विमोहितः हा तात साधो धर्मिष्ठ त्यक्त्वा अस्मान् स्वः गतः भवान् ॥१५॥

तत् दुःख	उस दुःख	हा तात	(फिर बोले) हा तात !
रोष	क्रोध,		
अमर्ष	असहनशीलता,	साधो धर्मिष्ठः	साधो ! धर्मिष्ठ !
आर्ति शोक	व्याकुलता, शोकके	अस्मान्	हम लोगोंको
वेग	वेगसे	त्यक्त्वा	त्यागकर
विमोहितः	मूर्छित हो गये,	भवान् स्वः गतः	आप स्वर्ग चले गये !' ॥१५॥

विलप्यैवं पितुर्देहं निधाय भ्रातृषु स्वयम् ।
प्रगृह्य परशुं रामः क्षत्रान्ताय मनो दधे ॥१६॥

विलप्य एवं पितुः देहं निधाय भ्रातृषु स्वयं प्रगृह्य परशुं रामः क्षत्र अन्ताय मनः दधे ॥१६॥

एवं	इस प्रकार	परशुं प्रगृह्य	परशु लेकर
विलप्य	विलाप करके	क्षत्र	क्षत्रियोंका
पितुः देहं	पिताका शरीर	अन्ताय	अन्त कर डालनेका
भ्रातृषु निधाय	भाइयोंको सौंपकर	मनः दधे	निश्चय कर लिया ॥१६॥
स्वयं रामः	स्वयं परशुरामने		

गत्वा माहिष्मतीं रामो ब्रह्मघ्नविहतश्रियम् ।
तेषां स शीर्षभी राजन् मध्ये चक्रे महागिरिम् ॥१७॥

गत्वा माहिष्मतीं रामः ब्रह्मघ्न विहतश्रियं तेषां स शीर्षभी राजन् मध्ये चक्रे महागिरिम् ॥१७॥

राजन्	राजन् !	मध्ये	बीचमें
रामः	रामने	तेषां शीर्षभी	उनके सिरोंसे
गत्वा	जाकर	स महागिरिं	उन्होंने बड़ा भारी पर्वत
ब्रह्मघ्न	ब्रह्महत्यासें	चक्रे	बना दिया ॥१७॥
विहतश्रियं	श्रीहीन हुई		
माहिष्मतीं	माहिष्मती पुरीकें		

तद्रक्तेन नदीं घोरामब्रह्मण्यभयावहाम् ।
हेतुं कृत्वा पितृवधं क्षत्रेऽमंगलकारिणि ॥१८॥

तत् रक्तेन नदीं घोरां अब्रह्मण्य भय आवहां हेतुं कृत्वा पितृवधं क्षत्रे अमंगल कारिणी ॥१८॥

पितृवधं	पिताके वधको	कारिणी	करनेवाली
हेतुं कृत्वा	कारण बनाकर	घोरां नदीं	एक घोर नदी
क्षत्रे	क्षत्रियोंके लिए	तत् रक्तेन	उनके रक्तसे (बहा दी) ॥१८॥
अमंगल	अमंगल		

त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः ।
समन्तपञ्चके चक्रे शोणितोदान् ह्रदान् नृप ॥१९॥

त्रिः सप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः समन्त पञ्चके चक्रे शोणित उदान् ह्रदान् नव ॥१९॥

प्रभुः	समर्थ परशु रामने	समन्त	समन्तक
पृथिवीं	पृथ्वीको	पञ्चके	पञ्चक क्षेत्रमें
त्रिः सप्तकृत्वः	इक्कीस बार	शोणित उदान्	रक्त रूप जलके
निःक्षत्रियां	क्षत्रियहीन	नव ह्रदान्	नौ सरोवर
कृत्वा	बनाकर	चक्रे	बना दिये ॥१९॥

पितुः कायेन सन्धाय शिर आदाय बर्हिषि ।
सर्वदेवमयं देवमात्मानमयजन्मखैः ॥२०॥

पितुः कायेन सन्धाय शिर आदाय बर्हिषि सर्वदेवमयं देवं आत्मानं अयजन् मखैः ॥२०॥

पितुः कायेन	पिताके शरीरसे	देवं आत्मानं	आराध्य आत्म स्व-
शिर आदाय	उनका सिर लाकर		रूप (श्रीहरिका)
बर्हिषि सन्धाय	कुशसे जोड़कर	मखैः अयजन्	यज्ञों द्वारा यजन
सर्वदेवमयं	सर्व देवमय		किया ॥२०॥

ददौ प्राचीं दिशं होत्रे ब्रह्मणे दक्षिणां दिशम् ।
अध्वर्यवे प्रतीचीं वै उद्गात्रे उत्तरां दिशम् ॥२१॥

ददौ प्राचीं दिशं होत्रे ब्रह्मणे दक्षिणां दिशं अध्वर्यवे प्रतीचीं वै उद्गात्रे उत्तरां दिशम् ॥२१॥

प्राचीं दिशं	पूर्व दिशा	अध्वर्यवे	अध्वर्यु को
होत्रे	होताको,	उत्तरां दिशं	उत्तर दिशा
दक्षिणां दिशां	दक्षिण दिशा	उद्गात्रे ददौ	उद्गाताको दे दी
ब्रह्मणे	ब्रह्माको		॥२१॥
वै प्रतीचीं	फिर पश्चिम		

अन्येभ्योऽवान्तरदिशः कश्यपाय च मध्यतः ।
आर्यावर्तमुपद्रष्ट्रे सदस्येभ्यस्ततः परम् ॥२२॥

अन्येभ्यः अवान्तर दिशः कश्यपाय च मध्यतः आर्यावर्तं उपद्रष्ट्रे सदस्येभ्यः ततः परम् ॥२२॥

अन्येभ्यः	अन्य ऋत्विजोंको	मध्यतः	बीचकी भूमि
अवान्तर	(ईशान आदि)	उपद्रष्ट्रे	उपद्रष्ट्राको
	कोणोंकी	आर्यावर्तं	आर्यावर्त
दिशः	दिशाएँ	ततः सदस्येभ्यः	फिर सदस्योंको
च कश्यपाय	और कश्यपजी को	परं	अन्य देश दिये ॥२२॥

ततश्चावभृथस्नानविधूताशेषकिल्बिषः ।
सरस्वत्यां ब्रह्मनद्यां रेजे व्यभ्र इवांशुमान् ॥२३॥

ततः च अवभृथ स्नान विधूत अशेष किल्बिषः सरस्वत्यां ब्रह्मनद्यां रेजे व्यभ्र इव अंशुमान् ॥२३॥

ततः	फिर	विधूत च	पूर्ण धुल जानेसे
ब्रह्मनद्यां	ब्रह्म नदी	व्यभ्र	मेघावरणहीन
सरस्वत्यां	सरस्वतीमें	अंशुमान् इव	सूर्यके समान
अवभृथ स्नान	अवभृथ स्नान करके	रेजे	शोभित हुए ॥२३॥
अशेष किल्बिषः	समस्त पापोंके		

स्वदेहं जमदग्निस्तु लब्ध्वा संज्ञानलक्षणम् ।
ऋषीणां मण्डले सोऽभूत् सप्तमो रामपूजितः ॥२४॥

स्वदेहं जमदग्निः तु लब्ध्वा संज्ञान लक्षणं ऋषीणां मण्डले सः अभूत् सप्तमः राम पूजितः ॥२४॥

राम पूजितः	परशुरामजीसे पूजित	ऋषीणां मण्डले	सप्तर्षियोंके मण्डलमें
जमदग्निः तु	जमदग्नि भी	सः सप्तमः	वे सातवें
संज्ञान लक्षणं	सङ्कल्पमय	अभूत्	हो गये ॥२४॥
स्वदेहं लब्ध्वा	अपना शरीर पाकर		

जामदग्न्योऽपि भगवान् रामः कमललोचनः ।
आगामिन्यन्तरे राजन् वर्तयिष्यति वै बृहत् ॥२५॥

जामदग्न्यः अपि भगवान् रामः कमललोचनः आगामिनि अन्तरे राजन् वर्तयिष्यति वै बृहत् ॥२५॥

राजन्	राजन् !	अन्तरे	मन्वन्तरेमें
कमललोचनः	कमल-लोचन	वै	निश्चय (सप्तर्षियोंमें होकर)
जामदग्न्यः	जमदग्नि-नन्दन	बृहत्	वेदोंका
भगवान्	भगवान्	वर्तयिष्यति	प्रचार करेंगे ॥२५॥
रामः अपि	परशुराम भी		
आगामिनि	अगले		

आस्तेऽद्यापि महेन्द्राद्रौ न्यस्तदण्डः प्रशान्तधीः ।
उपगीयमानचरितः सिद्धगन्धर्वचारणैः ॥२६॥

आस्ते अद्य अपि महेन्द्र अद्रौ न्यस्त दण्डः प्रशान्त धीः उपगीयमान चरितः सिद्ध गन्धर्व चारणैः ॥२६॥

सिद्ध गन्धर्व	सिद्ध, गन्धर्व,	न्यस्त दण्डः	किसीको भी दण्ड देना त्यागकर
चारणैः	चारणों द्वारा	प्रशान्त धीः	अत्यन्त शान्त चित्त
चरितः	उनके चरित	अद्य अपि	आज भी
उपगीयमान	गाये जाते हैं	आस्ते	विराजमान हैं ॥२६॥
महेन्द्र अद्रौ	महेन्द्राचलपर		

एवं भृगुषु विश्वात्मा भगवान् हरिरीश्वरः ।
अवतीर्य परं भारं भुवोऽहन् बहुशो नृपान् ॥२७॥

एवं भृगुषु विश्वात्मा भगवान् हरिः ईश्वरः अवतीर्य परं भारं भुवः अहन् बहुशः नृपान् ॥२७॥

विश्वात्मा	विश्वात्मा	भुवः परं	पृथ्वीके अत्यधिक
भगवान् ईश्वरः	भगवान सर्वसमर्थ	भारं	भार रूपं
हरिः एवं	श्रीहरिने इस प्रकार	बहुशः नृपान्	बहुतसे राजाओंका
भृगुषु अवतीर्य	भृगुवंशमें अवतार लेकर	अहन्	वध कर दिया ॥२७॥

गाधेरभून्महातेजाः समिद्ध इव पावकः ।
तपसा क्षात्रमुत्सृज्य यो लेभे ब्रह्मवर्चसम् ॥२८॥

गाधेः अभूत् महातेजाः समिद्ध इव पावकः तपसा क्षात्रं उत्सृज्य यः लेभे ब्रह्मवर्चसम् ॥२८॥

गाधेः समिद्ध	गाधिसे प्रज्वलित	यः क्षात्रं	जिन्होंने क्षत्रियत्व
पावकः इव	अग्निके समान	उत्सृज्य	त्यागकर
महातेजाः	महान तेजस्वी (विश्वामित्र)	तपसा	तपस्या द्वारा
अभूत्	उत्पन्न हुए,	ब्रह्मवर्चसं	ब्रह्मतेज
		लेभे	प्राप्त किया ॥२८॥

विश्वामित्रस्य चैवासन् पुत्रा एकशतं नृप ।
मध्यमस्तु मधुच्छन्दा मधुच्छन्दस एव ते ॥२९॥

विश्वामित्रस्य च एव आसन् पुत्रा एकशतं नृप मध्यमः तु मधुच्छन्दा मधुच्छन्दस एव ते ॥२९॥

नृप	राजन् !	मध्यमः तु	उनमें मध्यम पुत्र तो
विश्वामित्रस्य	विश्वामित्र	मधुच्छन्दा	मधुच्छन्दा था
च एव	के भी तो	ते मधुच्छन्दस	वे मधुच्छन्दस
एकशतं	एक सौ	एव	ही कहलाये ॥२९॥
पुत्रा आसन्	पुत्र थे,		

पुत्रं कृत्वा शुनःशेपं देवरातं च भार्गवम् ।
आजीगर्तं सुतानाह ज्येष्ठ एष प्रकल्प्यताम् ॥३०॥

पुत्रं कृत्वा शुनःशेपं देवरातं च भार्गवं आजीगर्तं सुतान् आह ज्येष्ठ एष प्रकल्प्यताम् ॥३०॥

भार्गवं	भृगुवंशी	पुत्रं कृत्वा	पुत्र बनाकर और
आजीगर्तं	अजीगर्तके पुत्र	च	(विश्वामित्रने)
देवरातं	देवता (वरुण) द्वारा बचाये गये	सुतान् आह	अपने पुत्रोंसे कहा
		एष ज्येष्ठ	इसे बड़ा भाई
शुनःशेपं	शुनःशेपको	प्रकल्प्यतां	मान लो ॥३०॥

यो वै हरिश्चन्द्रमखे विक्रीतः पुरुषः पशुः ।
स्तुत्वा देवान् प्रजेशादीन् मुमुचे पाशबन्धनात् ॥३१॥

यः वै हरिश्चन्द्र मखे विक्रीतः पुरुषः पशुः स्तुत्वा देवान् प्रजेश आदीन् मुमुचे पाशबन्धनात् ॥३१॥

वैः यः	निश्चय जो	पुरुषः पशुः	पुरुष पशुके रूपमें
हरिश्चन्द्र	राजा हरिश्चन्द्रके	विक्रीतः	बेचा गया था और
मखे	यज्ञमें	प्रजेश आदीन्	प्रजापति आदि

देवान्	देवताओंकी	मुमुचे	(विश्वामित्रने जिसे)
स्तुत्वा	स्तुति करके		छुड़ाया था ॥३१॥
पाशबन्धनात्	पाशके बन्धनसे		

यो रातो देवयजने देवैर्गाधिषु तापसः ।
देवरात इति ख्यातः शुनःशेपः स भार्गवः ॥३२॥

यः रातः देवयजने देवैः गाधिषु तापसः देवरात इति ख्यातः शुनःशेपः स भार्गव ॥३२॥

स भार्गवः	वह भृगुवंशी	गाधिषु रातः	गाधिकुलमें दिये जानेपर
शुनःशेपः	शुनःशेप	देवरात	देवरात
यः देवयजने	जो देवताओंके यज्ञमें	इति ख्यातः	इस नामसे प्रसिद्ध
देवैः	देवताओं द्वारा	तापसः	तपस्वी हुआ ॥३२॥

ये मधुच्छन्दसो ज्येष्ठाः कुशलं मेनिरे न तत् ।
अशपत् तान्मुनिः क्रुद्धो म्लेच्छा भवत दुर्जनाः ॥३३॥

ये मधुच्छन्दसः ज्येष्ठाः कुशलं मेनिरे न तत् अशपत् तान् मुनिः क्रुद्धः म्लेच्छा भवत दुर्जनाः ॥३३॥

ये	जो	क्रुद्धः	(इससे) कुपित होकर
मधुच्छन्दसः	मधुच्छान्दाओंमें	मुनिः	मुनि (विश्वामित्र)
ज्येष्ठाः	बड़े थे	अशपत्	शाप दे दिया
तत् कुशलं	(उन्होंने) इसको अच्छा	दुर्जनाः	'दुष्टो (तुम लोग)
		म्लेच्छा भवत	म्लेच्छ हो जाओ' ॥३३॥
न मेनिरे	नहीं माना		

स होवाच मधुच्छन्दाः सार्धं पञ्चाशता ततः ।
यन्नो भवान् संजानीते तस्मिंस्तिष्ठामहे वयम् ॥३४॥

स ह उवाच मधुच्छन्दाः स अर्धं पञ्चाशता ततः यत् नः भवान् संजानीते तस्मिन् तिष्ठामहे वयम् ॥३४॥

अर्धं	सबके आधे
पञ्चाशता स	पचास (छोटे) भाइयों सहित
स मधुच्छन्दाः	वह मधुच्छन्दा
ह उवाच	निश्चय पूर्वक बोला
भवान् यत् नः	'आप जो हमारे लिए
सञ्जानीते	उत्तम बतलावेंगे
वयं तस्मिन्	हम उसीपर
तिष्ठामहे	स्थित होंगे ॥३४॥'

ज्येष्ठं मन्त्रदृशं चक्रुस्त्वामन्वञ्चो वयं स्म हि।
विश्वामित्रः सुतानाह वीरवन्तो भविष्यथ।
ये मानं मेऽनुगृह्णन्तो वीरवन्तमकर्त मान् ॥३५॥

ज्येष्ठं मन्त्रदृशं चक्रुः त्वां अन्वञ्चः वयं स्म हि विश्वामित्रः सुतान् आह वीरवन्तः भविष्यथ ये मानं मे अनुगृह्णन्तः वीरवन्तं अकर्त मान् ॥३५॥

मन्त्रदृशं	मन्त्र द्रष्टा (देवरात) को
ज्येष्ठं चक्रुः	बड़ा भाई बना लिया,
वयं त्वां	(बोले) 'हम सब तुम्हारे
अन्वञ्चः स्म	अनुयायी हैं'
विश्वामित्रः	तब विश्वामित्रजी
सुतान् आह	(उन) पुत्रोंसे बोले—
हि मां	'क्योंकि (तुम लोगों-ने) मुझे
वीरवन्तं	पुत्रवान्
अकर्त	बनाया है
अथ वीरवन्तः	अतः (तुम भी) पुत्र-वान्
भविष्यथ	होओगे' ॥३५॥

एष वः कुशिका वीरो देवरातस्तमन्वित।
अन्ये चाष्टकहारीतजयक्रतुमदादयः ॥३६॥

एष वः कुशिका वीरः देवरातः तं अन्वित अन्ये च अष्टक हारीत जय क्रतुमत् आदयः ॥३६॥

कुशिका	कुशिक गणो !
एष वीरः	यह वीर
देवरातः	देवरात भी
वः	तुम्हारा (सगोत्रीय) है,
तं अन्वित	उसका अनुगमन करो'

अन्ये च	(विश्वामित्रके) दूसरे भी	जय क्रतुमत् आदयः	जय, क्रतुमान्, आदि (पुत्र) थे ॥३६॥
अष्टक हारीत	अष्टक, हारीत		

एवं कौशिकगोत्रं तु विश्वामित्रैः पृथग्विधम् ।
प्रवरान्तरमापन्नं तद्धि चैवं प्रकल्पितम् ॥३७॥

एवं कौशिकगोत्रं तु विश्वामित्रैः पृथक् विधं प्रवरान्तरं आपन्नं तत् हि च एवं प्रकल्पितम् ॥३७॥

एवं	इस प्रकार	तत् च	उस (देवरात) को जो
विश्वामित्रैः	विश्वामित्र द्वारा	एवं	इस प्रकार
कौशिकगोत्रं	कौशिक गोत्र	प्रकल्पितं	(कौशिक गोत्रीय) बना दिया
तु	तो	प्रवरान्तरं	वह दूसरे प्रवरका
पृथक् विधं	कई प्रकारका हो गया,	आपन्नं	बन गया ॥३७॥
हि	क्योंकि		

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे षोडशोऽध्यायः ॥१६॥

अथ सप्तदशोऽध्यायः

श्रीशुक उवाच

यः पुरूरवसः पुत्र आयुस्तस्याभवन् सुताः ।
नहुषः क्षत्रवृद्धश्च रजी रम्भश्च वीर्यवान् ॥१॥

यः पुरुरवसः पुत्र आयुः तस्य अभवन् सुताः नहुषः क्षत्रवृद्धः च रजी रम्भः च वीर्यवान् ॥१॥

यः पुरूरवसः	जो पुरूरवाका	नहुषः क्षत्रवृद्धः	नहुषः, क्षत्रवृद्ध
पुत्रः आयुः	पुत्र आयु था	च रजी	तथा रजी
तस्य सुताः	उसके पुत्र	च वीर्यवान्	एवं पराक्रमी
अभवन्	हुए	रम्भः	रम्भ ॥१॥

अनेना इति राजेन्द्र शृणु क्षत्रवृधोऽन्वयम् ।
क्षत्रवृद्धसुतस्यासन् सुहोत्रस्यात्मजास्त्रयः ॥२॥

अनेना इति राजेन्द्र शृणु क्षत्रवृधः अन्वयं क्षत्रवृद्ध सुतस्य आसन् सुहोत्रस्य आत्मजाः त्रयः ॥२॥

अनेना	और अनेना,	क्षत्रवृद्ध	क्षत्रवृद्धके
इति	इस प्रकार (पांच)	सुतस्य	पुत्र
राजेन्द्र	महाराज परीक्षित !	सुहोत्रस्य	सुहोत्रके
क्षत्रवृधः	क्षत्रवृद्धका	त्रयः आत्मजाः	तीन पुत्र
अन्वयं शृणु	वंश सुनो	आसन्	थे ॥२॥

काश्यः कुशो गृत्समद इति गृत्समदादभूत् ।
शुनकः शौनको यस्य बह्वृचप्रवरो मुनिः ॥३॥

काश्यः कुशः गृत्समद इति गृत्समदात् अभूत् शुनकः शौनकः यस्य बह्वृच प्रवरः मुनिः ॥३॥

काश्यः कुशः	काश्य कुश,	यस्य	जिससे
गृत्समद इति	गृत्समद इस प्रकार,	वहृवृच	ऋग्वेदियोंमें
गृत्समदात्	गृत्समदसे	प्रवरः मुनिः	श्रेष्ठ मुनि
शुनकः अभूत्	शुनक उत्पन्न हुआ	शौनकः	शौनक हुए ॥३॥

काश्यस्य काशिस्तत्पुत्रो राष्ट्रो दीर्घतमःपिता ।
धन्वन्तरिर्दैर्घतम आयुर्वेदप्रवर्तकः ॥४॥

काश्यस्य काशिः तत् पुत्रः राष्ट्रः दीर्घतमः पिता धन्वन्तरिः दैर्घतम आयुर्वेद प्रवर्तकः ॥४॥

काश्यस्य	काश्यके	दैर्घतम	दीर्घतमाके पुत्र
काशिः तत्	काशि, उसके	आयुर्वेद	आयुर्वेदके
पुत्रः	पुत्र	प्रवर्तकः	प्रवर्तक
दीर्घतमः पिता	दीर्घतमाके पिता	धन्वन्तरिः	धन्वन्तरि हुए ॥४॥
राष्ट्रः	राष्ट्र,		

यज्ञभुग् वासुदेवांशः स्मृतमात्रार्तिनाशनः ।
तत्पुत्रः केतुमानस्य जज्ञे भीमरथस्ततः ॥५॥

यज्ञभुक् वासुदेव अंशः स्मृतिमात्र आर्ति नाशनः तत् पुत्रः केतुमानस्य जज्ञे भीमरथः ततः ॥५॥

यज्ञभुक्	वे यज्ञभोक्ता,	तत् पुत्रः	उनके पुत्र
वासुदेव	भगवान वासुदेवके	केतुमानस्य	केतुमानके
अंशः	अंश,	ततः भीमरथः	फिर भीमरथ
स्मृतिमात्र	स्मरण मात्रसे	जज्ञे	उत्पन्न हुआ ॥५॥
आर्ति नाशनः	रोगोंके नाशक हैं,		

दिवोदासो द्युमांस्तस्मात् प्रतर्दन इति स्मृतः ।
स एव शत्रुजिद् वत्स ऋतध्वज इतीरितः ।
तथा कुवलयाश्वेति प्रोक्तोऽलर्कादियस्ततः ॥६॥

दिवोदासः द्युमान् तस्मात् प्रतर्दन इति स्मृतः स एव शत्रुजित् वत्स ऋतध्वज इति ईरितः तथा कुवलयाश्व इति प्रोक्तः अलर्क आदयः ततः ॥६॥

दिवोदासः	(उससे) दिवोदास	इति ईरितः	इस नामसे कहा गया है
तस्मात् द्युमान्	उससे द्युमान्	तथा	तथा
प्रतर्दन	जो प्रतर्दन	कुवलयाश्व	कुवलयाश्व
इति स्मृतः	इस नामसे भी कहा गया है,	इति	इस नामसे भी
वत्स स एव	वत्स परीक्षित ! वही	प्रोक्तः	कहा गया है,
शत्रुजित्	शत्रुजित,	ततः	उससे
ऋतध्वज	ऋतध्वज	अलर्क आदयः	अलर्क आदि हुए ॥६॥

षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ।
नालर्कादपरो राजन् मेदिनीं बुभुजे युवा ॥७॥

षष्टि वर्ष सहस्राणि षष्टि वर्ष शतानि च न अलर्कात् अपरः राजन् मेदिनीं बुभुजे युवा ॥७॥

राजन्	राजन् !	शतानि	सौ वर्ष (छियासठ सहस्र वर्ष)
अलर्कात्	अलर्कसे	युवा	युवा रहकर
अपरः	भिन्न किसीने	मेदिनीं	पृथ्वीका
षष्टि	साठ	बुभुजे न	उप भोग नहीं किया ॥७॥
वर्ष सहस्राणि	सहस्र वर्ष		
च षष्टि वर्ष	तथा साठ		

अलर्कात् सन्ततिस्तस्मात् सुनीथोऽथ सुकेतनः ।
धर्मकेतुः सुतस्तस्मात् सत्यकेतुरजायत ॥८॥

अलर्कात् सन्ततिः तस्मात् सुनीथः अथ सुकेतनः धर्मकेतुः सुतः तस्मात् सत्यकेतुः अजायत ॥८॥

अलर्कात्	अलर्कसे	धर्मकेतुः	धर्मकेतु
सन्ततिः	सन्तति,	तस्मात्	उससे
तस्मात् सुनीथः	उससे सुनीथ,	सत्यकेतुः	सत्यकेतु
अथ सुकेतनः	फिर सुकेतन	अजायत	उत्पन्न हुआ ॥८॥
सुतः	उसका पुत्र		

धृष्टकेतुः सुतस्तस्मात् सुकुमारः क्षितीश्वरः ।
वीतिहोत्रस्य भर्गोऽतो भार्गभूमिरभून्नृपः ॥९॥

धृष्टकेतुः सुतः तस्मात् सुकुमारः क्षितीश्वरः वीतिहोत्रस्य भर्गः अतः भार्गभूमिः अभूत् नृपः ॥९॥

सुतः	उसका पुत्र	वीतिहोत्रस्य	उसके पुत्र वीतिहोत्र का
धृष्टकेतुः	धृष्टकेतु,	भर्गः अतः	भर्ग उससे
तस्मात्	उससे	नृपः	राजा
क्षितीश्वरः	पृथ्वीपति	भार्गभूमिः	भार्गभूमि
सुकुमारः	सुकुमार,	अभूत्	उत्पन्न हुआ ॥९॥

इतीमे काशयो भूपाः क्षत्रवृद्धान्वयायिनः ।
रम्भस्य रभसः पुत्रो गम्भीरश्चाक्रियस्ततः ॥१०॥

इति इमे काशयः भूपाः क्षत्रवृद्ध अनुयायिनः रम्भस्य रभसः पुत्रः गम्भीरः च अक्रियः ततः ॥१०॥

इति इमे	इस प्रकार ये	एम्भस्य पुत्रः	रम्भका पुत्र
क्षत्रवृद्ध	क्षत्रवृद्धके	रभसः गम्भीर	रभस उसके गम्भीर
अनुयायिनः	वंशमें	च ततः	और उससे
काशयः	काशि* से उत्पन्न	अक्रियः	अक्रिय हुआ ॥१०॥
भूपाः	राजा हुए ।		

तस्य क्षेत्रे ब्रह्म जज्ञे शृणु वंशमनेनसः ।
शुद्धस्ततः शुचिस्तस्मात् त्रिककुद् धर्मसारथिः ॥११॥

---

* ये काशी (वाराणसी) के राजा हुए, यह अर्थ भी इतिहास-पुराणसे समर्थित है । दिवोदास प्रसिद्ध काशी-नरेश थे ।

तस्य क्षेत्रे ब्रह्म जज्ञे शृणु वंशं अनेनसः शुद्धः ततः शुचिः तस्मात् त्रिककुत् धर्म सारथिः ॥११॥

तस्य क्षेत्रे	उसकी पत्नीसे	ततः शुचिः	उससे शुचि
ब्रह्म जज्ञे	ब्राह्मण सन्तान हुई,	तस्मात्	उससे
अनेनसः	अनेनाका	त्रिककुत्	त्रिककुत्
वंशं शृणु	वंश सुनो	धर्म-	(उससे) धर्म-
ततः शुद्धः	उस (अनेना) से शुद्ध,	सारथिः	सारथि हुआ ॥११॥

ततः शान्तरयो जज्ञे कृतकृत्यः स आत्मवान् ।
रजेः पञ्चशतान्यासन् पुत्राणाममितौजसाम् ॥१२॥

ततः शान्तरयः जज्ञे कृतकृत्यः स आत्मवान् रजेः पञ्चशतानि आसन् पुत्राणां अमित ओजसाम् ॥१२॥

ततः शान्तरयः	उससे शान्तरय	रजेः	रजिके
जज्ञे स	उत्पन्न हुआ, वह	पञ्चशतानि	पाँच सौ
आत्मवान्	आत्मज्ञानी	अमित ओजसां	अपार तेजस्वी
कृतकृत्यः	कृतकृत्य था'	पुत्राणां आसन्	पुत्र हुए ॥१२॥

देवैरभ्यर्थितो दैत्यान् हत्वेन्द्रायाददाद् दिवम् ।
इन्द्रस्तस्मै पुनर्दत्त्वा गृहीत्वा चरणौ रजेः ॥१३॥

देवैः अभ्यर्थितः दैत्यान् हत्वा इन्द्राय अददात् दिवं इन्द्रः तस्मै पुनः दत्त्वा गृहीत्वा चरणौ रजेः ॥१३॥

देवैः	देवताओं द्वारा	रजेः चरणौ	रजिके चरण
अभ्यर्थितः	प्रार्थना किये जानेपर	गृहीत्वा इन्द्रः	पकड़कर इन्द्रने
दैत्यान् हत्वा	दैत्योंको मारकर	पुनः तस्मै	फिर उनको ही
इन्द्राय	इन्द्रको	दत्त्वा	(स्वर्ग) देकर ॥१३॥
दिवं अददात्	स्वर्ग दे दिया,		

आत्मानमर्पयामास प्रह्लादद्यरिशंकितः ।
पितर्युपरते पुत्रा याचमानाय नो ददुः ॥१४॥

आत्मानं अर्पयामास प्रह्लाद आदि अरिशङ्कितः पितरि उपरते पुत्रा याचमानाय नो ददुः ॥१४॥

आत्मानं	अपनेको भी	पितरि उपरते	पिताके मर जानेपर
अर्पयामास	अर्पित कर दिया,	याचमानाय	मांगनेपर भी
प्रह्लाद	(क्योंकि) प्रह्लाद	पुत्रा	(रजिके) पुत्रोंने
आदि	आदि	नो ददुः	नहीं दिया ॥१४॥
अरिशङ्कितः	शत्रुओंसे शंकित थे,		

त्रिविष्टपं महेन्द्राय यज्ञभागान् समाददुः ।
गुरुणा हूयमानेऽग्नौ बलभित् तनयान् रजेः ॥१५॥

त्रिविष्टपं महेन्द्राय यज्ञभागान् सम आददुः गुरुणा हूयमाने अग्नौ बलभित् तनयान् रजेः ॥१५॥

महेन्द्राय	इन्द्रको	सम आददुः	पूरा ही ले लिया (तब)
त्रिविष्टपं	स्वर्ग (तो नहीं दिया ही और)	बलभित्	बल दैत्यको मारने-वाले इन्द्रने
गुरुणा	गुरु वृहस्पति द्वारा	रजेः तनयान्	रजिके पुत्रोंका ॥१५॥
अग्नौ	अग्निमें		
हूयमाने	हवन करनेपर		
यज्ञभागान्	यज्ञके भागोंको		

अवधीद् भ्रंशितान् मार्गान्न कश्चिदवशेषितः ।
कुशात् प्रतिः क्षात्रवृद्धात् सञ्जयस्तत्सुतो जयः ॥१६॥

अवधीत् भ्रंशितान् मार्गात् न कश्चित् अवशेषितः कुशात् प्रतिः क्षात्रवृद्धात् सञ्जयः तत् सुतः जयः ॥१६॥

अवधीत्	वध कर दिया,	क्षात्रवृद्धात्	क्षत्रवृद्धके वंशज
मार्गात्	(क्योंकि वे) सन्मार्ग से	कुशात् प्रतिः	कुशसे प्रति,
भ्रंशितान्	भ्रष्ट हो गये थे	तत् सञ्जयः	उसके संजय
कश्चित्	उनमें कोई भी	सुतः जयः	उसका पुत्र जय हुआ ॥१६॥
न अवशेषितः	नहीं बचा		

ततः कृतः कृतस्यापि जज्ञे हर्यवनो नृपः ।
सहदेवस्ततो हीनो जयसेनस्तु तत्सुतः ॥१७॥

ततः कृतः कृतस्य अपि जज्ञे हर्यवनः नृपः सहदेवः ततः हीनः जयसेनः तु तत् सुतः ॥१७॥

ततः कृतः	उससे कृत,	सहदेवः	सहदेव,
कृतस्य अपि	कृतका भी	ततः हीनः	उससे हीन
नृपः हर्यवनः	राजा हर्यवन	तु तत् सुतः	फिर तो उसका पुत्र
जज्ञे ततः	उत्पन्न हुआ, उससे	जयसेनः	जयसेन हुआ ॥१७॥

संकृतिस्तस्य च जयः क्षत्रधर्मा महारथः ।
क्षत्रवृद्धान्वया भूपाः शृणु वंशं च नाहुषात् ॥१८॥

सङ्कृतिः तस्य च जयः क्षत्रधर्मा महारथः क्षत्रवृद्ध अन्वया भूपाः शृणु वंशं च नाहुषात् ॥१८॥

सङ्कृतिः तस्य	संकृतिके	अन्वया भूपाः	वंशज राजा हुए,
च जयः	भी जय	नाहुषात्	नहुषसे चला
महारथः	उसके महारथी	वंशं च	वंश भी
क्षत्रधर्मा	क्षत्रधर्मा हुआ	शृणु	सुनो ॥१८॥
क्षत्रवृद्ध	ये क्षत्रवृद्धके		

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्ध चन्द्रवंशानुवर्णने सप्तदशोऽध्यायः ॥१८॥

अथ अष्टादशोऽध्यायः

श्रीशुक उवाच

यतिर्ययातिः संयातिरायतिर्वियतिः कृतिः ।
षडिमे नहुषस्यासन्निन्द्रियाणीव देहिनः ॥१॥

यतिः ययातिः संयातिः आयतिः वियतिः कृतिः षट् इमे नहुषस्य आसन् इन्द्रियाणि इव देहिनः ॥१॥

देहिनः	देह धारियोंके	संयातिः	संयाति,
इन्द्रियाणि	इन्द्रियोंके	आयतिः	आयति,
इव	समान	वियतिः कृतिः	वियति और कृति
नहुषस्य	नहुषके	इमे षट्	ये छ (पुत्र)
यतिः ययातिः	यति, ययाति,	आसन्	थे ॥१॥

राज्यं नैच्छद् यतिः पित्रा दत्तं तत्परिणामवित् ।
यत्र प्रविष्टः पुरुष आत्मानं नावबुध्यते ॥२॥

राज्यं न इच्छत् यतिः पित्रा दत्तं तत् परिणामवित् यत्र प्रविष्टः पुरुषः आत्मानं न अवबुध्यते ॥२॥

पित्रा दत्तं	पिताके देनेपर	यत्र प्रविष्टः	जिसमें प्रवेश करके
यतिः राज्यं	यतिने राज्य (लेने)की	पुरुषः	पुरुष
तत् परिणाम-	उसके परिणामको	आत्मानं	आत्मतत्त्वंको
वित्	जाननेवाला होनेसे	न	नहीं
इच्छत् न	इच्छा नहीं की	अवबुध्यते	जान सकता ॥२॥

पितरि भ्रंशिते स्थानादिन्द्राण्या धर्षणाद् द्विजैः ।
प्रापितेऽजगरत्वं वै ययातिरभवन्नृपः ॥३॥

पितरि भ्रंशिते स्थानात् इन्द्राण्या धर्षणात् द्विजैः प्रापिते अजगरत्वं वै ययातिः अभवत् नृपः ॥३॥

इन्द्राण्या	इन्द्राणी (शची) के साथ	भ्रंशिते	भ्रष्ट किये जानेपर और
धर्षणात्	धृष्टता करनेसे	वै	निश्चित रूपसे
द्विजैः	ब्राह्मणों द्वारा	अजगरत्वं	अजगर योनिको
पितरि	पिताके	प्रापिते	पहुँचा दिये जानेपर
स्थानात्	अपने स्थान (स्वर्ग) से	ययातिः	ययाति
		नृपः अभवत्	राजा हुआ ॥३॥

चतसृष्वादिशद् दिक्षु भ्रातॄन् भ्राता यवीयसः ।
कृतदारो जुगोपोर्वीं काव्यस्य वृषपर्वणः ॥४॥

चतसृषु आदिशत् दिक्षु भ्रातॄन् भ्राता यवीयसः कृतदारः जुगोप उर्वीं काव्यस्य वृषपर्वणः ॥४॥

भ्राता	उस (बड़े) भाईने	काव्यस्य	शुक्राचार्य तथा
यवीयसः	छोटे	वृषपर्वणः	वृषपर्वाकी
भ्रातॄन्	भाइयोंको	कृतदारः	पुत्रियोंको पत्नी वनाकर
चतसृषु	चारो		
दिक्षु	दिशाओंमें	उर्वीं जुगोप	पृथ्वीका पालन किया ॥४॥
आदिशत्	नियुक्त कर दिया		

राजोवाच–

ब्रह्मर्षिर्भगवान् काव्यः क्षत्रबन्धुश्च नाहुषः ।
राजन्यविप्रयोः कस्माद् विवाहः प्रतिलोमकः ॥५॥

ब्रह्मर्षिः भगवान् काव्यः क्षत्रबन्धुः च नाहुषः राजन्य विप्रयोः कस्मात् विवाहः प्रतिलोमकः ॥५॥

भगवान् काव्यः	भगवान् शुक्राचार्य	च	और
ब्रह्मर्षि	ब्रह्मर्षि थे	नाहुषः	नहुष कुमार ययाति

क्षत्रबन्धुः	सामान्य क्षत्रिय था,	प्रतिलोमकः	प्रतिलोम (विपरीत)
राजन्य	फिर क्षत्रिय और	विवाहः	विवाह
विप्रयोः	ब्राह्मणका	कस्मात्	क्यों हुआ ॥५॥

श्रीशुक उवाच—

एकदा दानवेन्द्रस्य शर्मिष्ठा नाम कन्यका ।
सखीसहस्रसंयुक्ता गुरुपुत्र्या च भामिनी ॥६॥

एकदा दानवेन्द्रस्य शर्मिष्ठा नाम कन्यका सखी सहस्र संयुक्ता गुरुपुत्र्या च भामिनी ॥६॥

एकदा	एक बार	दानवेन्द्रस्य	दानवेन्द्र (वृषपर्वा) की
गुरुपुत्र्या	गुरुकी पुत्री		
च सखी-	तथा एक-	शर्मिष्ठा नाम	शर्मिष्ठा नामक
सहस्र	सहस्र सखियोंके	भामिनी	सुन्दरी
संयुक्ता	साथ	कन्यका	कन्या ॥६॥

देवयान्या पुरोद्याने पुष्पितद्रुमसङ्कुले ।
व्यचरत् कलगीतालिनलिनीपुलिनेऽबला ॥७॥

देवयान्या पुर उद्याने पुष्पित द्रुम सङ्कुले व्यचरत् कलगीत अलि नलिनी पुलिने अबला ॥७॥

देवयान्या	देवयानीके	नलिनी पुलिने	सरोवरके किनारे
पुष्पित द्रुम	फूले वृक्षोंसे	अबला	वह कन्या
सङ्कुले उद्याने	भरे बगीचेमें	व्यचरत्	विचरण कर रही थी ॥७॥
अलि	भ्रमरोंकी		
कलगीत	मधुर गुंजार युक्त		

ता जलाशयमासाद्य कन्याः कमललोचनाः ।
तीरे न्यस्य दुकूलानि विजह्रुः सिञ्चतीर्मिथः ॥८॥

ता जलाशयं आसाद्य कन्याः कमल लोचनाः तीरे न्यस्य दुकूलानि विजह्रुः सिञ्चतीः मिथः ॥८॥

ता कमल-	वे कमल-	तीरे न्यस्य	किनारे रखकर
लोचनाः	नयनी	मिथः	परस्पर
कन्याः	कन्याएँ	सिञ्चतीः	जल उलीचती
जलाशयं	जलाशयके	विजह्रुः	क्रीड़ा करने लगीं ॥८॥
आसाद्य	समीप पहुँचकर		
दुकूलानि	अपनी साड़ियां		

वीक्ष्य व्रजन्तं गिरिशं सह देव्या वृषस्थितम् ।
सहसोत्तीर्य वासांसि पर्यधुर्व्रीडिताः स्त्रियः ॥९॥

वीक्ष्य व्रजन्तं गिरिशं सह देव्या वृष स्थितं सहसा उत्तीर्य स्व वासांसि पर्यधुः व्रीडिताः स्त्रियः ॥९॥

सह देव्या	देवी उमाके साथ	व्रीडिताः	लज्जित होकर
वृष स्थितं	वृषभपर बैठे	सहसा	सहसा जलसे
गिरिशं	शंकरजी को	उत्तीर्य	निकलकर
व्रजन्तं	जाते हुए	स्व वासांसि	अपने वस्त्र
वीक्ष्य स्त्रियः	देखकर वे स्त्रियां	पर्यधुः	पहिन लिए ॥९॥

शर्मिष्ठाजानती वासो गुरुपुत्र्याः समव्ययत् ।
स्वीयं मत्वा प्रकुपिता देवयानीदमब्रवीत् ॥१०॥

शर्मिष्ठा अजानती वासः गुरुपुत्र्याः समव्ययत् स्वीयं मत्वा प्रकुपिता देवयानी इदं अब्रवीत् ॥१०॥

शर्मिष्ठा	शर्मिष्ठाने	समव्ययत्	उपयोग कर लिया
अजानती	अनजानमें	प्रकुपिता	इससे अत्यन्त कुपित होकर
स्वीयं मत्वा	अपना समझकर		
गुरुपुत्र्याः	गुरु-पुत्रीका	देवयानी	देवयानी
वासः	वस्त्र	इदं अब्रवीत्	यह बोली ॥१०॥

अहो निरीक्ष्यतामस्या दास्याः कर्म ह्यसाम्प्रतम् ।
अस्मद्धार्यं धृतवती शुनीव हविरध्वरे ॥११॥

अहो निरीक्ष्यतां अस्या दास्याः कर्म हि असाम्प्रतं अस्मत् धार्यं धृतवती शुनी इव हविः अध्वरे ॥११॥

अहो अस्या	'अहो, इस	शुनी इव	कुतियाके समान
दास्याः	दासीका	अस्मत्	हमारे
असाम्प्रतं	असामयिक	धार्यं	धारण करने योग्यको
कर्म हि	कर्म तो	धृतवती	इसने धारण कर लिया ॥११॥
निरीक्ष्यतां	देखो,		
अध्वरे हविः	यज्ञमें हविको		

यैरिदं तपसा सृष्टं मुखं पुंसः परस्य ये ।
धार्यते यैरिह ज्योतिः शिवः पन्थाश्च दर्शितः ॥१२॥

यैः इदं तपसा सृष्टं मुखं पुंसः परस्य ये धार्यते यैः इह ज्योतिः शिवः पन्थाः च दर्शितः ॥१२॥

यैः तपसा	जिन्होंने तपोबलसे	ज्योतिः	ज्योति स्वरूप परमात्माको
इदं	इस जगतको	धार्यते	(हृदयमें) धारण करते हैं
सृष्टं	उत्पन्न किया है	च	तथा
ये परस्य पुंसः	जो परम पुरुषके	शिवः पन्थाः	कल्याणकारी मार्ग
मुखं	मुख हैं,	दर्शितः	दिखलाया है ॥१२॥
यैः इह	जो इस लोकमें		

यान् वन्दन्त्युपतिष्ठन्ते लोकनाथाः सुरेश्वराः ।
भगवानपि विश्वात्मा पावनः श्रीनिकेतनः ॥१३॥

यान् वन्दन्ति उपतिष्ठन्ते लोकनाथाः सुर ईश्वराः भगवान् अपि विश्वात्मा पावनः श्रीनिकेतनः ॥१३॥

यान्	जिनको	पावनः	परम पवित्र
लोकनाथाः	लोकपालगण,	भगवान् अपि	भगवान भी
सुर ईश्वराः	देवेश्वर गण	वन्दन्ति	वन्दना करते हैं,
विश्वात्मा	विश्वात्मा	उपतिष्ठन्ति	समीप खड़े होते हैं
श्रीनिकेतनः	लक्ष्मी-निवास,		॥१३॥

वयं तत्रापि भृगवः शिष्योऽस्या नः पितासुरः ।
अस्मद्धार्यं धृतवती शूद्रो वेदमिवासती ॥१४॥

वयं तत्र अपि भृगवः शिष्यः अस्या नः पिता असुरः अस्मत् धार्यं धृतवती शूद्रः वेदं इव असती ॥१४॥

तत्र अपि	उनमें भी	धार्यं	धारण करने योग्यको
वयं भृगवः	हम भृगुवंशी हैं,	शूद्रः	शूद्र द्वारा
अस्या असुरः	इसका असुर	वेदं इव	वेदके समान
पिता	पिता	असती	इस दुष्टाने
नः शिष्यः	हमारा शिष्य है	धृतवती	धारण कर लिया,
अस्मत्	फिर भी हमारे		॥१४॥

एवं शपन्तीं शर्मिष्ठा गुरुपुत्रीमभाषत ।
रुषा श्वसन्त्युरङ्गीव धर्षिता दष्टदच्छदा ॥१५॥

एवं शपन्तीं शर्मिष्ठा गुरुपुत्रीं अभाषत रुषा श्वसन्ति उरंगी इव धर्षिता दष्टवत् छदा ॥१५॥

एवं शपन्तीं	इस प्रकार गाली देती हुई	रुषा	क्रोधसे लम्बी
		श्वसन्ति	श्वास छोड़ती
गुरुपुत्रीं	गुरुपुत्रीसे	दष्टदत् छदा	दांतोंसे ओष्ठ दबाये
धर्षिता	चोट खायी	शर्मिष्ठा	शर्मिष्ठा
उरंगी इव	सर्पिणीके समान	अभाषत	बोली ॥१५॥

आत्मवृत्तमविज्ञाय कत्थसे बहु भिक्षुकि ।
किं न प्रतीक्षसेऽस्माकं गृहान् बलिभुजो यथा ॥१६॥

आत्मवृत्तं अविज्ञाय कत्थसे बहु भिक्षुकि किं न प्रतीक्षसे अस्माकं गृहान् बलिभुजः यथा ॥१६॥

भिक्षुकि	'भिक्षुकी !	बलिभुजः	बलि-भोजी कौए-कुत्ते
आत्मवृत्तं	अपना हाल	अस्माकं गृहान्	हमारे घरोंकी
अविज्ञाय	न जानकर	प्रतीक्षसे न	प्रतीक्षा नहीं करती' ॥१६॥
बहु कत्थसे	बहुत बकवाद कर रही है		
यथा	जैसे		

एवंविधैः सुपरुषैः क्षिप्त्वाऽऽचार्यसुतां सतीम् ।
शर्मिष्ठा प्राक्षिपत् कूपे वास आदाय मन्युना ॥१७॥

एवंविधैः सुपरुषैः क्षिप्त्वा आचार्य सुतां सतीं शर्मिष्ठा प्राक्षिपत् कूपे वास आदाय मन्युना ॥१७॥

एवंविधैः	इस प्रकारके	मन्युना	क्रोधशश
सुपरुषैः	अत्यन्त कठोर वचनोंसे	वास आदाय	उसका वस्त्र छीनकर
सतीं आचार्य	सती आचार्य	शर्मिष्ठा	शर्मिष्ठाने (उसे)
सुतां	पुत्रीका	कूपे	कुएँमें
क्षिप्त्वा	तिरस्कार करके	प्राक्षिपत्	फेंक दिया ॥१७॥

तस्यां गतायां स्वगृहं ययातिर्मृगयां चरन् ।
प्राप्तो यदृच्छया कूपे जलार्थी तां ददर्श ह ॥१८॥

तस्यां गतायां स्वगृहं ययातिः मृगयां चरन् प्राप्तः यदृच्छया कूपे जल अर्थी तां ददर्श ह ॥१८॥

तस्यां स्वगृहं	उसके अपने घर	ययातिः प्राप्तः	ययाति वहां आया
गतायां	चले जानेपर	जल अर्थी	जलके लिए
मृगयां चरन्	आखेट खेलता हुआ	कूपे तां	कुएँपर जाकर उसे
यदृच्छया	संयोगवश	ह ददर्श	निश्चय देखा ॥१८॥

दत्वा स्वमुत्तरं वाससस्तस्यै राजा विवाससे ।
गृहीत्वा पाणिना पाणिमुज्जहार दयापरः ॥१६॥

दत्वा स्वं उत्तरं वासः तस्यै राजा विवाससे गृहीत्वा पाणिना पाणिं उज्जहार दयापरः ॥१६॥

तस्यै विवाससे	उस वस्त्रहीनाको	पाणिना	अपने हाथसे
स्वं उत्तरं	अपना उत्तरीय	पाणिं	उसका हाथ
वासः	वस्त्र	गृहीत्वा	पकड़कर
दत्वा दयापरः	देकर दयालु होकर	उज्जहार	ऊपर खींच लिया
राजा	राजाने		॥१६॥

तं वीरमाहौशनसी प्रेमनिर्भरया गिरा ।
राजंस्त्वया गृहीतो मे पाणिः परपुरञ्जय ॥२०॥

तं वीरं आह औशनसी प्रेमनिर्भरया गिरा राजन् त्वया गृहीतः मे पाणिः परपुरञ्जयः ॥२०॥

औशनसी	शुक्राचार्यकी पुत्री	परपुरञ्जयः	'शत्रु-पुरियोंके विजेता
तं वीरं	उस वीरसे	राजन्	राजन् !
प्रेमनिर्भरया	प्रेमसे परिपूर्ण	त्वया मे पाणिः	आपने मेरा हाथ
गिरा आह	वाणीसे बोली	गृहीतः	पकड़ लिया है ॥२०॥

हस्तग्राहोऽपरो मा भूद् गृहीतायास्त्वया हि मे ।
एष ईशकृतो वीर सम्बन्धो नौ न पौरुषः ।
यदिदं कूपलग्नाया भवतो दर्शनं मम ॥२१॥

हस्तग्राहः अपरः मा भूत् गृहीतायाः त्वया हि मे एष ईशकृतः वीर सम्बन्धः नौ न पौरुषः यत् इदं कूपलग्नाया भवतः दर्शनं मम ॥२१॥

हि त्वया गृहीतायाः	क्योंकि तुम्हारे द्वारा ग्रहण की गयी हूँ'	अपरः मे हस्तग्राहः	दूसरा मेरा पाणिग्रहण करने-वाला

मा भूत्	मत होवे,	पौरुषः न	किसी पुरुषका नहीं
वीर एष	वीर ! यह	यत् इदं	क्योंकि यह
नौ	हम दोनोंका	कूपलग्नाया	कुएँमें गिरी
सम्बन्धः	सम्बन्ध	मम भवतः	मुझे आपका
ईशकृतः	ईश्वरका बनाया है,	दर्शनं	दर्शन हुआ है ॥२१॥

न ब्राह्मणो मे भविता हस्तग्राहो महाभुज ।
कचस्य बार्हस्पत्यस्य शापाद् यमशपं पुरा ॥२२॥

न ब्राह्मणः मे भविता हस्तग्राहः महाभुज कचस्य बार्हस्पत्यस्य शापात् यं अशपं पुरा ॥२२॥

महाभुज	महाबाहो !	शापात्	शापके कारण
यं पुरा	जिसे मैंने पहिले	ब्राह्मणः मे	कोई ब्राह्मण मेरा
अशपं	शाप दिया (उस)	हस्तग्राहः	पाणिग्रहण करने-
बार्हस्पत्यस्य	वृहस्पतिके पुत्र		वाला
कचस्य	कचके	न भविता	नहीं होगा ॥२२॥

ययातिरनभिप्रेतं दैवोपहृतमात्मनः ।
मनस्तु तद्गतं बुद्ध्वा प्रतिजग्राह तद्वचः ॥२३॥

ययातिः अनभिप्रेतं दैव उपहृतं आत्मनः मनः तु तत् गतं बुद्ध्वा प्रतिजग्राह तत् वचः ॥२३॥

ययातिः	ययातिने	तत् गतं	उसमें लगा
अनभिप्रेतं	अनिच्छित	बुद्ध्वा	जानकर
दैव	दैवके द्वारा	तत् वचः	उसकी बातको
आत्मनः	अपनेको	प्रतिजग्राह	स्वीकार कर लिया
उपहृतं	दिये गये		॥२३॥
मनः तु	अपने मनको भी		

गते राजनि सा वीरे तत्र स्म रुदती पितुः ।
न्यवेदयत् ततः सर्वमुक्तं शर्मिष्ठया कृतम् ॥२४॥

गते राजनि सा वीरे तत्र स्म रुदती पितुः न्यवेदयत् ततः सर्वं यत् उक्तं शर्मिष्ठया कृतम् ॥२४॥

वीरे राजनि	उस वीर राजाके	यत् उक्तं	जो कहा और
गते सा	चले जानेपर वह	कृतं	किया गया था
रुदती ततः	रोती हुई वहां	सर्वं पितुः	सब पितासे
शर्मिष्ठया	शर्मिष्ठा द्वारा	न्यवेदयत्	निवेदन किया ॥२४॥

दुर्मना भगवान् काव्यः पौरोहित्यं विगर्हयन् ।
स्तुवन् वृत्तिं च कापोतीं दुहित्रा स ययौ पुरात् ॥२५॥

दुर्मना भगवान् काव्यः पौरोहित्यं विगर्हयन् स्तुवन् वृत्तिं च कापोतीं दुहित्रा स ययौ पुरात् ॥२५॥

भगवान्	(इससे) भगवान्	वृत्तिं	वृत्तिकी
काव्यः	शुक्राचार्य	स्तुवन्	प्रशंसा करते हुए
दुर्मना	दुःखी होकर	स दुहित्रा	पुत्रीके साथ
पौरोहित्यं	पुरोहिती-कर्मकी	पुरात् ययौ	नगरसे चल दिये
विगर्हयन्	निन्दा करते हुए		॥२५॥
च कापोतीं	तथा कबूतरकी शिलोञ्छ		

वृषपर्वा तमाज्ञाय प्रत्यनीकविवक्षितम् ।
गुरुं प्रसादयन् मूर्ध्ना पादयोः पतितः पथि ॥२६॥

वृषपर्वा तं आज्ञाय प्रत्यनीक विवक्षितं गुरुं प्रसादयन् मूर्ध्ना पादयोः पतितः पथि ॥२६॥

वृषपर्वा	वृषपर्वाने	मूर्ध्ना	सिरके बल
तं प्रत्यनीक	उस शत्रु-सेना द्वारा	पथि	मार्गमें
विवक्षितं	अभीष्ट (कि शुक्राचार्य दानवोंको त्याग दें)	पादयोः पतितः	चरणोंपर गिरकर
		गुरुं	गुरुको
आज्ञाय	जानकर	प्रसादयन्	प्रसन्न करने लगा ॥२६॥

क्षणार्धमन्युर्भगवान् शिष्यं व्याचष्ट भार्गवः ।
कामोऽस्याः क्रियतां राजन् नैनां त्यक्तुमिहोत्सहे ॥२७॥

क्षणार्धमन्युः भगवान् शिष्यं व्याचष्ट भार्गवः कामः अस्याः क्रियतां राजन् न एनां त्यक्तुं इह उत्सहे ॥२७॥

भगवान्	भगवान्	अस्याः	इस (देवयानी) की
भार्गवः	शुक्राचार्यका	कामः क्रियतां	इच्छा पूरी कीजिए
क्षणार्धमन्युः	क्रोध तो आधेक्षण रहता है	एनां इह	इसको यहां
		त्यक्तुं	छोड़ देनेका
शिष्यं	(वे) शिष्य	उत्सहे	उत्साह मैं
व्याचष्ट	(वृषपर्वा) से बोले	न	नहीं कर सकता' ॥२७॥
राजन्	'राजन् !		

तथेत्यवस्थिते प्राह देवयानी मनोगतम् ।
पित्रा दत्ता यतो यास्ये सानुगा यातु मामनु ॥२८॥

तथा इति अवस्थिते प्राह देवयानी मनः गतं पित्रा दत्ता यतः यास्ये सानुगा यातु मां अनु ॥२८॥

तथा इति	'अच्छा' इस प्रकार	पित्रा दत्ता	'पिताके देनेपर
अवस्थिते	कहकर खड़े (वृषपर्वा) से	यतः यास्ये	जहां जाऊँगी
		सानुगा	अनुचरियोंके साथ (शर्मिष्ठा)
देवयानी	देवयानीने		
मनः गतं	अपने मनका भाव	मां अनु यातु	मेरे पीछे जावे' ॥२८॥
प्राह	बतलाया		

स्वानां तत् सङ्कटं वीक्ष्य तदर्थस्य च गौरवम् ।
देवयानीं पर्यचरत् स्त्रीसहस्रेण दासवत् ॥२९॥

स्वानां तत् सङ्कटं वीक्ष्य तत् अर्थस्य च गौरवं देवयानीं पर्यचरत् स्त्रीसहस्रेण दासवत् ॥२९॥

स्वानां तत्	अपने लोगोंका वह	दासवत्	दासीकी भांति (शर्मिष्ठा)
सङ्कटं	संकट तथा	देवयानीं	देवयानीकी
च तत्	तथा उनके	पर्यचरत्	सेवा करने लगी ॥२६॥
अर्थस्य	प्रयोजनकी		
गौरवं वीक्ष्य	गम्भीरता देखकर		
स्त्रीसहस्रेण	एक सहस्र सखियोंके साथ		

नाहुषाय सुतां दत्वा सह शर्मिष्ठयोशना ।
तमाह राजञ्छर्मिष्ठामाधास्तल्पे न कर्हिचित् ॥३०॥

नाहुषाय सुतां दत्त्वा सह शर्मिष्ठया उशना तं आह राजन् शर्मिष्ठां आधाः तल्पे न कर्हिचित् ॥३०॥

सह शर्मिष्ठया	शर्मिष्ठाके साथ	राजन्	'राजन् !
नाहुषाय	नहुषकुमार ययाति-को	शर्मिष्ठां	शर्मिष्ठाको
		कर्हिचित्	कभी भी
सुतां दत्त्वा	पुत्री देकर	तल्पे	अपनी शय्यापर
उशना तं	शुक्राचार्यने उनसे	न आधाः	नहीं लेना ॥३०॥
आह	कहा		

विलोक्यौशनसीं राजञ्छर्मिष्ठा सप्रजां क्वचित् ।
तमेव वव्रे रहसि सख्याः पतिमृतौ सती ॥३१॥

विलोक्य औशनसीं राजन् शर्मिष्ठा सप्रजां क्वचित् तं एव वव्रे रहसि सख्याः पतिं ऋतौ सती ॥३१॥

क्वचित्	कभी	सख्याः पतिं	सखीके पतिसे
औशनसीं	उशना-नन्दिनी देवयानीको	रहसि	एकान्तमें
		शर्मिष्ठा	शर्मिष्ठाने
सप्रजां	पुत्रवती	ऋतौ सती	ऋतुदानके लिए
विलोक्य	देखकर	वव्रे	प्रार्थना की ॥३१॥
तं एव	उसी		

राजपुत्र्यार्थितोऽपत्ये धर्मं चावेक्ष्य धर्मवित् ।
स्मरञ्छुक्रवचः काले दिष्टमेवाभ्यपद्यत ॥३२॥

राजपुत्रि अर्थितः अपत्ये धर्मं च अवेक्ष्य धर्मवित् स्मरन् शुक्रवचः काले दिष्टं एव अभ्यपद्यत ॥३२॥

राजपुत्रि	राजपुत्री द्वारा	शुक्रवचः	शुक्राचार्यकी बातका
अपत्ये अर्थितः	सन्तानके लिए प्रार्थना करनेपर	काले स्मरन्	उस समय स्मरण करके
धर्मवित्	धर्मज्ञ (ययाति) ने	दिष्टं एव	भाग्य विधानको ही
धर्मं अवेक्ष्य	अपना धर्म देखकर	अभ्यपद्यत	अपनाया ॥३२॥
च	तथा		

यदुं च तुर्वसुं चैव देवयानी व्यजायत ।
द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥३३॥

यदुं च तुर्वसुं च एव देवयानी व्यजायत द्रुह्युं च अनुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥३३॥

यदुं च	यदुको	च अनुं	तथा अनु
च तुर्वसुं	तथा तुर्वसुको	च पुरुं	और पुरुको
एव	भी	वार्षपर्वणी	वृषपर्वा-पुत्री
देवयानी	देवयानीने,	शर्मिष्ठा	शर्मिष्ठाने
च द्रुह्युं	एवं द्रुह्यु	व्यजायत	उत्पन्न किया ॥३३॥

गर्भसम्भवमासुर्या भर्तुर्विज्ञाय मानिनी ।
देवयानी पितुर्गेहं ययौ क्रोधविमूर्च्छिता ॥३४॥

गर्भ सम्भवं आसुर्या भर्तुः विज्ञाय मानिनी देवयानी पितुः गेहं ययौ क्रोध विमूर्छिता ॥३४॥

आसुर्या	असुर-पुत्री शर्मिष्ठा-को	गर्भ सम्भवं	गर्भ रहा
भर्तुः	अपने पतिसे	विज्ञाय	जानकर
		मानिनी	मानिनी

देवयानी	देवयानी
क्रोध	क्रोधसे
विमूर्छिता	मूर्छितप्राय होकर
पितुः गेहं ययौ	पिताके घर चल पड़ी ॥३४॥

प्रियामनुगतः कामी वचोभिरुपमन्त्रयन् ।
न प्रसादयितुं शेके पादसंवाहनादिभिः ॥३५॥

प्रियां अनुगतः कामी वचः भिः उपमन्त्रयन् न प्रसादयितुं शेके पाद संवाहन आदिभिः ॥३५॥

कामी	कामी (ययति)
प्रियां	प्रिया (देवयानी) के
अनुगतः	पीछे जाकर
वचः भिः	वाणीके द्वारा
उपमन्त्रयन्	मनाता हुआ
पाद संवाहन	चरण दबाने (पकड़ने)
आदिभिः	आदि द्वारा
प्रसादयितुं	प्रसन्न करनेमें
शेके न	समर्थ नहीं हुआ ॥३५॥

शुक्रस्तमाह कुपितः स्त्रीकामानृतपूरुष ।
त्वां जरा विशतां मन्द विरूपकरणी नृणाम् ॥३६॥

शुक्रः तं आह कुपितः स्त्रीकाम अनृत पूरुष त्वां जरा विशतां मन्द विरूपकरणी नृणाम् ॥३६॥

कुपितः शुक्रः	कुपित शुक्राचार्यने
तं आह	उससे कहा—
स्त्रीकाम	'स्त्री कामी
मन्द	मूर्ख,
अनृत पूरुष	मिथ्याभाषी पुरुष !
नृणां	मनुष्योंको
विरूपकरणी	कुरूप करनेवाला
जरा त्वां	वृद्धावस्था तुझमें
विशतां	प्रवेश कर जाय ॥३६॥

ययातिरुवाच

अतृप्तोऽस्म्यद्य कामानां ब्रह्मन् दुहितरि स्म ते ।
व्यत्यस्यतां यथाकामं वयसा योऽभिधास्यति ॥३७॥

अतृप्तः अस्मि अद्य कामानां ब्रह्मन् दुहितरि स्म ते व्यत्यस्यतां यथा कामं वयसा यः अभिधास्यति ॥३७॥

ब्रह्मन्	ब्रह्मन् !	अस्मि	हूँ (तब शुक्रने कहा)
ते दुहितरि	आपकी पुत्रीके साथ	यः यथा कामं	'जो इच्छानुसार
कामानां	विषय भोगोंसे	वयसा	अपनी अवस्था
अद्य	अभी तक	अभिधास्यति	देता हो (उससे)
अतृप्तः	अतृप्त	व्यत्यस्यतां	बदल लो' ॥३७॥

श्रीशुक उवाच*

इति लब्धव्यवस्थानः पुत्रं ज्येष्ठमवोचत ।

इति लब्ध व्यवस्थानः पुत्रं ज्येष्ठं अवोचत

इति	ऐसी	ज्येष्ठं पुत्रं	बड़े पुत्र (यदु) से
व्यवस्थानं	व्यवस्था	अवोचत	बोला
लब्ध	पाकर		

ययातिरुवाच*

यदो तात प्रतीच्छेमां जरां देहि निजं वयः ॥३८॥

यदो तात प्रतीच्छ इमां जरां देहि निजं वयः ॥३८॥

तात यदो	तात यदु !	निजं वयः	अपनी अवस्था
इमां जरां	यह बुढ़ापा	देहि	(मुझे) दे दो ॥३८॥
प्रतीच्छ	ले लो, और		

मातामहकृतां वत्स न तृप्तो विषयेष्वहम् ।
वयसा भवदीयेन रंस्ये कतिपयाः समाः ॥३९॥

मातामह कृता वत्स न तृप्तः विषयेषु अहं वयसा भवदीयेन रंस्ये कतिपयाः समाः ॥३९॥

---

* यह उवाच अन्य प्रतियोंमें नहीं है ।

* यह उवाच अन्य प्रतियोंमें नहीं है ।

मातामह	तुम्हारे नानाका	भवदीयेन	तुम्हारी
कृतां	बनाया (यह विधान) है,	वयसा	अवस्थासे
		कतिपयाः समाः	कुछ वर्षों तक
वत्स विषयेषु	वत्स ! विषय भोगोंसे	रंस्ये	रमण करूँगा ॥३९॥
अहं तृप्तः न	मैं तृप्त नहीं हुआ हूँ,		

यदुरुवाच

नोत्सहे जरसा स्थातुमन्तरा प्राप्तया तव ।
अविदित्वा सुखं ग्राम्यं वैतृष्ण्यं नैति पूरुषः ॥४०॥

न उत्सहे जरसा स्थातुं अन्तरा तव त्वया अविदित्वा सुखं ग्राम्यं वैतृष्ण्यं न एति पूरुषः ॥४०॥

अन्तरा	बीचमें ही	पूरुषः	पुरुष
प्राप्तया	प्राप्त हुए	ग्राम्यं सुखं	काम-सुखको
तव जरसा	आपके बुढ़ापेमें	अविदित्वा	जाने बिना
स्थातुं	स्थित होनेका	वैतृष्ण्यं	उनसे विरक्त
न उत्सहे	उत्साह नहीं करता	न एति	नहीं होता ॥४०॥

श्रीशुक उवाच*

तुर्वसुश्चोदितः पित्रा द्रुह्युश्चानुश्च भारत ।
प्रत्याचख्युरधर्मज्ञा ह्यनित्ये नित्यबुद्धयः ॥४१॥

तुर्वसुः चोदितः पित्रा द्रुह्युः च अनुः च भारत प्रत्याचख्युः अधर्मज्ञा हि अनित्ये नित्य बुद्धयः ॥४१॥

भारत	परीक्षित !	अनित्ये	अनित्य (विषयों) को
पित्रा तुर्वसुः	पिता द्वारा तुर्वसु,	नित्य बुद्धयः	नित्य मानते थे,
द्रुह्युः च अनुः	द्रुह्यु तथा अनु	अधर्मज्ञा	धर्मको न जाननेवाले
चोदितः	प्रेरित किये गये; किन्तु		उन्होंने
		प्रत्याचख्युः	उलटा उत्तर दे दिया ॥४१॥
हि	क्योंकि		

* यह उवाच अन्य प्रतियोंमें नहीं है ।

अपृच्छत् तनयं पूरुं वयसोनं गुणाधिकम् ।
न त्वमग्रजवद् वत्स मां प्रत्याख्यातुमर्हसि ॥४२॥

अपृच्छत् तनयं पूरुं वयसा ऊनं गुण अधिकं न त्वं अग्रजवत् वत्स मां प्रत्याख्यातुं अर्हसि ॥४२॥

वयसा ऊनं	आयुसे छोटेपर	अग्रजवत्	अपने बड़े भाइयों-की भांति
गुण अधिकं	गुणोंमें बड़े	मां प्रत्याख्यातुं	मुझे उलटा उत्तर
तनयं पूरुं	अपने पुत्र पुरुसे	न अर्हसि	नहीं देना चाहिए ॥४२॥
अपृच्छत्	(ययातिने) पूछा—		
वत्स त्वं	बेटा ! तुमको		

पूरुरुवाच

को नु लोके मनुष्येन्द्र पितुरात्मकृतः पुमान् ।
प्रतिकर्तुं क्षमो यस्य प्रसादाद् विन्दते परम् ॥४३॥

कः नु लोके मनुष्येन्द्र पितुः आत्मकृतः पुमान् प्रति कर्तुं क्षमः यस्य प्रसादात् विन्दते परम् ॥४३॥

मनुष्येन्द्र	नरेन्द्र !	कर्तुं	चुकानेमें
लोके नु कः	संसारमें भला कौन	क्षमः	समर्थ है
पुमान्	पुरुष	यस्य प्रसादात्	जिनकी कृपासे
आत्मकृतः	शरीर देनेवाले	परं विन्दते	परम पद प्राप्त होता है ॥४३॥
पितुः प्रति	पिताका बदला		

उत्तमश्चिन्तितं कुर्यात् प्रोक्तकारी तु मध्यमः ।
अधमोऽश्रद्धया कुर्यादकर्तोच्चरितं पितुः ॥४४॥

उत्तमः चिन्तितं कुर्यात् प्रोक्तकारी तु मध्यमः अधमः अश्रद्धया कुर्यात् अकर्तः उच्चरितं पितुः ॥४४॥

उत्तमः	उत्तम (पुत्र वह है जो)	कुर्यात्	कार्यको (स्वयं) कर दे,
चिन्तितं	(पिताके) सोचे	प्रोक्तकारी	कहनेपर करनेवाला

तु	तो
मध्यम	मध्यम है,
अश्रद्धया कुर्यात्	जो बिना श्रद्धाके करे
अधमः	वह अधम है,
अकर्तः	जो करे ही नहीं वह
पितुः उच्चरितं	पिताका उत्सर्जित मल-मूत्र है ॥४४॥

श्रीशुक उवाच*

इति प्रमुदितः पूरुः प्रत्यगृह्णाज्जरां पितुः ।
सोऽपि तद्वयसा कामान् यथावज्जुजुषे नृप ॥४५॥

इति प्रमुदितः पूरुः प्रत्यगृह्णात् जरां पितुः सः अपि तत् वयसा कामान् यथावत् जुजुषे नृप ॥४५॥

नृप	राजन् !
इति	ऐसा कहकर
प्रमुदितः	प्रसन्न होकर
पूरुः पितुः	पुरुने पिताकी
जरां	वृद्धावस्था
प्रत्यगृह्णात्	उनसे ले ली,
सः अपि	वे (ययाति) भी
तत् वयसा	उस (पुरु) की अवस्था से
यथावत्	यथोचित रूपसे
कामान्	काम-भोगोंका
जुजुषे	सेवन करते रहे ॥४५॥

सप्तद्वीपपतिः सम्यक् पितृवत् पालयन् प्रजाः ।
यथोपजोषं विषयाञ्जुजुषेऽव्याहतेन्द्रियः ॥४६॥

सप्तद्वीपपतिः सम्यक् पितृवत् पालयन् प्रजाः यथा उपजोषं विषयान् जुजुषे अव्याहत इन्द्रियः ॥४६॥

सप्तद्वीपपतिः	वह सातों द्वीपोंका स्वामी
पितृवत्	पिताकी भांति
प्रजाः पालयन्	प्रजाका पालन करते हुए
अव्याहत	अक्षुण्ण
इन्द्रियः	इन्द्रिय-शक्ति
विषयान्	विषयोंका
यथा उपजोषं	यथेच्छ उपभोग
जुजुषे	करता रहा ॥४६॥

* यह उवाच अन्य प्रतियोंमें नहीं है ।

देवयान्यप्यनुदिनं मनोवाग्देहवस्तुभिः ।
प्रेयसः परमां प्रीतिमुवाह प्रेयसी रहः ॥४७॥

देवयानि अपि अनुदिनं मनः वाक् देह वस्तुभिः प्रेयसः परमां प्रीतिं उवाह प्रेयसी रहः ॥४७॥

प्रेयसी	प्रियतमा	प्रेयसः	अपने प्रियतमकी
देवयानि अपि	देवयानी भी	परमां प्रीतिं	परम प्रीति
अनुदिनं रहः	प्रतिदिन एकान्तमें	उवाह	सम्पन्न करती रही ॥४७॥
मनः वाक्	मन, वाणी,		
देह वस्तुभिः	शरीर तथा पदार्थोंसे		

अयजद् यज्ञपुरुषं क्रतुभिर्भूरिदक्षिणैः ।
सर्वदेवमयं देवं सर्ववेदमयं हरिम् ॥४८॥

अयजत् यज्ञपुरुषं क्रतुभिः भूरिदक्षिणैः सर्वदेवमयं देवं सर्ववेदमयं हरिम् ॥४८॥

सर्वदेवमयं	सर्वदेवस्वरूप,	भूरिदक्षिणैः	बहुत दक्षिणावाले
सर्ववेदमयं	सर्ववेदमय	क्रतुभिः	यज्ञों द्वारा
यज्ञपुरुषं	यज्ञ-पुरुष	अयजत्	(उसने) यजन किया ॥४८॥
देवं हरिं	परमाराध्य श्रीहरिका		

यस्मिन्निदं विरचितं व्योम्नीव जलदावलिः ।
नानेव भाति नाभाति स्वप्नमायामनोरथः ॥४९॥

यस्मिन् इदं विरचितं व्योम्नि इव जलद अवलिः नाना इव भाति न आभाति स्वप्न माया मनोरथः ॥४९॥

व्योम्नि	आकाशमें	विरचितं	बना हुआ
जलद	मेघ	इदं नाना	यह नानापनाकी
अवलिः इव	समूहके समान	इव	भांति
स्वप्न माया	स्वप्न, माया तथा	भाति	कभी प्रतीत होता है,
मनोरथाः	मनोरथोंके समान	न आभाति	कभी नहीं प्रतीत होता ॥४९॥
यस्मिन्	जिसमें		

तमेव हृदि विन्यस्य वासुदेवं गुहाशयम् ।
नारायणमणीयांसं निराशीरयजत् प्रभुम् ॥५०॥

तं एव हृदि विन्यस्य वासुदेवं गुहाशयं नारायणं अणीयांसं निराशीः अयजत् प्रभुम् ॥५०॥

तं एव	उसी	प्रभुं नारायणं	सर्वेश नारायणको
गुहाशयं	सर्वान्तर्यामी	हृदि विन्यस्य	हृदयमें धारण करके
वासुदेवं	वासुदेव	निराशीः	निष्काम भावसे
अणीयांसं	अत्यन्त सूक्ष्म	अयजत्	आराधना की ॥५०॥

एवं वर्षसहस्राणि मनःषष्ठैर्मनः सुखम् ।
विदधानोऽपि नातृप्यत् सार्वभौमः कदिन्द्रियैः ॥५१॥

एवं वर्षसहस्राणि मनःषष्ठैः मन सुखं विदधानः अपि न अतृप्यत् सार्वभौमः कद इन्द्रियैः ॥५१॥

मनःषष्ठै	जिनमें मन छठवां है उन	मनः सुखं	अपने मनको सुख
		विदधानः अपि	देता हुआ भी
कद इन्द्रियैः	दुष्ट इन्द्रियों द्वारा	सार्वभौमः	वह सार्वभौम राजा
वर्षसहस्राणि	एक सहस्र वर्ष तक	अतृप्यत् न	तृप्त नहीं हुआ ॥५१॥
एवं	इस प्रकार		

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे अष्टादशोऽध्यायः ॥१८॥

अथ एकोनविंशोऽध्यायः

श्रीशुक उवाच

स इत्थमाचरन् कामान् स्त्रैणोऽपह्नवमात्मनः ।
बुद्ध्वा प्रियायै निर्विण्णो गाथामेतामगायत ॥१॥

स इत्थं आचरन् कामान् स्त्रैणः अपह्नवं आत्मनः बुद्ध्वा प्रियायै निर्विण्णः गाथां एतां अगायत ॥१॥

इत्थं	इस प्रकार	स	वह (ययाति उन भोगोंसे)
स्त्रैणः	स्त्रीके वश होकर	निर्विण्णः	खिन्न होकर
कामान्	भोगोंको	प्रियायै	अपनी प्रिया (देव-यानी) से
आचरन्	भोगता हुआ	एतां गाथां	यह गाथा (कल्पित कथा)
आत्मनः	अपना	अगायत	कहने लगा ॥१॥
अपह्नवं	अधःपतन		
बुद्ध्वा	जानकर		

ययाति रुवाच*

शृणु भार्गव्यमूं गाथां मद्विधाचरितां भुवि ।
धीरा यस्यानुशोचन्ति वने ग्रामनिवासिनः ॥२॥

शृणु भार्गवि अमूं गाथां मत् विधा आचरितं भुवि धीरा यस्य अनुशोचन्ति वने ग्राम निवासिनः ॥२॥

भार्गवि	देवयानी !	यस्य	जिनके विषयमें
भुवि धीरा	पृथ्वीपर जितेन्द्रिय पुरुष	अनुशोचन्ति	बराबर चिन्ता करते हैं वैसे

* यह उवाच अन्य प्रतियोंमें नहीं है ।

मत् विधा	मेरे समान	अमूं गाथां	इस गाथाको
ग्राम निवासिनः	ग्राम निवासीकी	शृणु	सुनो ॥२॥
आचरितां	आचरण की हुई		

बस्त एको वने कश्चिद् विचिन्वन् प्रियमात्मनः ।
ददर्श कूपे पतितां स्वकर्मवशगामजाम् ॥३॥

बस्त एकः वने कश्चित् विचिन्वन् प्रियं आत्मनः ददर्श कूपे पतितां स्वकर्म वशगां अजाम् ॥३॥

कश्चित् एकः	किसी एक	स्वकर्म	अपने कर्मके
बस्त वने	बकरेने वनमें	वशगां	वशमें हुई
आत्मनः प्रियं	अपने प्रिय भोगोंको	कूपे पतितां	कुएँमें गिरी
विचिन्वन्	ढूंढ़ते हुए	अजां ददर्श	बकरीको देखा ॥३॥

तस्या उद्धरणोपायं बस्तः कामी विचिन्तयन् ।
व्यधत्त तीर्थमुद्धृत्य विषाणाग्रेण रोधसी ॥४॥

तस्य उद्धरण उपायं बस्तः कामी विचिन्तयन् व्यधत्त तीर्थं उद्धृत्य विषाण अग्रेण रोधसी ॥४॥

कामी तस्य	उस कामीने उसके	रोधसी तीर्थं	कुएँके पासका जल
उद्धरण उपायं	उद्धारका उपाय	उद्धृत्य	खोदकर
विचिन्तयन्	सोचकर	व्यधत्त	बनाया ॥४॥
विषाण अग्रेण	अपनी सींगकी नोकसे		

सोत्तीर्य कूपात् सुश्रोणी तमेव चकमे किल ।
तया वृतं समुद्वीक्ष्य बह्व्योऽजाः कान्तकामिनीः ॥५॥

स उत्तीर्य कूपात् सुश्रोणी तं एव चकमे किल तया वृतं समुद्वीक्ष्य बह्व्यः अजाः कान्त कामिनीः ॥५॥

सः सुश्रोणी	वह सुन्दरी	उत्तीर्य	ऊपर तैरकर
कूपात्	कुएँसे (जल भरजाने-से)	किल तं एव	अरे उसीको
		चकमे	चाहने लगी,

तया वृतं	उसके द्वारा वरण किया गया	बह्व्यः अजाः	बहुत-सी बकरियां (उसके साथ हो गयी) ॥५॥
समुद्वीक्ष्य	उसे देखकर		
कान्त कामिनीः	पति चाहनेवाली		

पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याभकोविदम् ।
स एकोऽजवृषस्तासां बह्वीनां रतिवर्धनः ।
रेमे कामग्रहग्रस्त आत्मानं नावबुध्यत ॥६॥

पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याभकोविदं स एकः अजवृषः तासां बह्वीनां रतिवर्धनः रेमे कामग्रह ग्रस्त आत्मानं न अवबुध्यत ॥६॥

पीवानं	मोटे	तासां बह्वीनां	उन बहुत-सी का
श्मश्रुलं	दाढ़ीवाले,	रतिवर्धनः	रतिसुख बढ़ानेवाला होकर
प्रेष्ठं	प्रिय,		
मीढ्वांसं	रति सुख दायक,	कामग्रह	कामरूपी ग्रहसे
याभकोविदं	मैथुन-शब्द करनेमें कुशल	ग्रस्त रेमे	ग्रस्त होकर रमण करने लगा,
स एकः	वह अकेला	आत्मानं	अपनेको
अजवृषः	बकरा सांड़	न अवबुध्यत	नहीं जान सका ॥६॥

तमेव प्रेष्ठतमया रममाणमजान्यया ।
विलोक्य कामसंविग्ना नामृष्यद् बस्तकर्म तत् ॥७॥

तं एव प्रेष्ठतमया रममाणं अजान्यया विलोक्य काम संविग्ना न अमृष्यत् बस्त कर्म तत् ॥७॥

प्रेष्ठतमया	प्रियतमाके	काम	कामसे
अजान्यया	अनजानमें	संविग्ना	उद्विग्न होकर
एव रममाणं	इस प्रकार रमण करते	बस्त तत् कर्म	बकरेके उस कर्मको
तं विलोक्य	उसे देखकर	अमृष्यत् न	सहन नहीं कर सकी ॥७॥

तं दुर्हृदं सुहृद्रूपं कामिनं क्षणसौहृदम् ।
इन्द्रियारामसुत्सृज्य स्वामिनं दुःखिता ययौ ॥८॥

तं दुर्हृदं सुहृत् रूपं कामिनं क्षण सौहृदं इन्द्रियारामं उत्सृज्य स्वामिनं दु खिता ययौ ॥८॥

तं कामिनं	उस कामी,	इन्द्रियारामं	इन्द्रिय लोलुपको
क्षण	क्षणिक	दुःखिता	दुःखी होकर
सौहृदं	प्रीति करनेवाले,	उत्सृज्य	त्यागकर
सुहृद रूपं	सुहृद रूपी	स्वामिनं	अपने स्वामीके पास
दुर्हृदं	दुष्ट हृदय	ययौ	जाने लगी ॥८॥

सोऽपि चानुगतः स्त्रैणः कृपणस्तां प्रसादितुम् ।
कुर्वन्निडविडाकारं नाशक्नोत् पथि संधितुम् ॥९॥

सः अपि च अनुगतः स्त्रैणः कृपणः तां प्रसादितुं कुर्वन् इडविडाकारं नाशक्नोत् पथि सन्धितुम् ॥९॥

सः स्त्रैणः अपि	वह स्त्रीजित भी	इडविडाकारं	इडविडाकार (बकरे का शब्द विशेष)
कृपणः तां	दीन होकर उसे		
प्रसादितुं	प्रसन्न करनेके लिए	कुर्वन्	करके भी
अनुगतः	उसके पीछे गया	पथि संधितुं	मार्गमें मनानेमें
च	तथा	ना शक्नोत्	सफल नहीं हुआ ॥९॥

तस्यास्तत्र द्विजः कश्चिदजास्वाम्यच्छिनद् रुषा ।
लम्बन्तं वृषणं भूयः सन्दधेऽर्थाय योगवित् ॥१०॥

तस्याः तत्र द्विजः कश्चित् अजास्वामि अच्छिनत् रुषा लम्बन्तं वृषणं भूयः सन्दधे अर्थाय योगवित् ॥१०॥

तत्र तस्याः	वहां उस	लम्बन्तं	लटकते
अजास्वामि	बकरीके स्वामी	वृषणं	अण्डकोशको
कश्चित् द्विजः	किसी ब्राह्मणने	अच्छिनत्	काट दिया
रुषा	क्रोधमें आकर		

योगवित्	उस उपाय जानने-वालेने	अर्थाय भूयः सन्दधे	प्रयोजनवश फिर जोड़ दिया ॥१०॥

सम्बद्धवृषणः सोऽपि ह्यजया कूपलब्धया ।
कालं बहुतिथं भद्रे कामैर्नाद्यापि तुष्यति ॥११॥

सम्बद्ध वृषणः सः अपि हि अजया कूप लब्धया कालं बहुतिथं भद्रे कामैः न अद्य अपि तुष्यति ॥११॥

सः अपि	वह भी	बहुतिथं	बहुत लम्बे समयके
सम्बद्ध वृषणः	अंडकोश जुड़जाने-पर	कालं	कालमें
		कामैः	भोगोंसे
हि कूप लब्धया	क्योंकि कुएँसे मिली	अद्य अपि	अब तक भी
अजया	बकरीके साथ	तुष्यति न	सन्तुष्ट नहीं होता है ॥११॥
भद्रे	कल्याणी !		

तथाहं कृपणः सुभ्रु भवत्याः प्रेमयन्त्रितः ।
आत्मानं नाभिजानामि मोहितस्तव मायया ॥१२॥

तथा अहं कृपणः सुभ्रु भवत्याः प्रेम यन्त्रितः आत्मानं न अभि जानामि मोहितः तव मायया ॥१२॥

सुभ्रु	सुन्दर भौंहों वाली !	तव मायया	तुम्हारी मायासे
तथा अहं	उसी प्रकार मैं	मोहितः	मोहित होकर
भवत्याः	तुम्हारे	आत्मानं	अपने आपको
प्रेम यन्त्रितः	प्रेमके वश हुआ	न	नहीं
कृपणः	दीन हुआ	अभि जानामि	पहिचानता हूँ ॥१२॥

यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
न दुह्यन्ति मनःप्रीतिं पुंसः कामहतस्य ते ॥१३॥

यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः न दुह्यन्ति मनः प्रीतिं पुंसः कामहतस्य ते ॥१३॥

पृथिव्यां यत्	पृथ्वीमें जितना
व्रीहियवं	जौ आदि अन्न है,
हिरण्यं पशवः	स्वर्ण, पशु और
स्त्रियः	स्त्रियां हैं (वे सब)
कामहतस्य	जो विषय-पीड़ित
पुंसः ते	पुरुष हैं उनकी
मनः प्रीतिं	मनकी प्रसन्नता (तृप्ति)
न दुह्यन्ति	नहीं दे सकते ॥१३॥

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥१४॥

न जातु कामः कामानां उपभोगेन शाम्यति हविषा कृष्णवर्त्मा इव भय एव अभिवर्धते ॥१४॥

कामानां	भोगोंको
उपभोगेन	भोगनेसे
कामः जातु	कामना कभी
शाम्यति न	शान्त नहीं हो सकती,
हविषा	घीसे
कृष्णवर्त्मा इव	अग्निके समान
भूय एव	अधिक ही
अभिवर्धते	बढ़ती है ॥१४॥

यदा न कुरुते भावं सर्वभूतेष्वमङ्गलम् ।
समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः ॥१५॥

यदा न कुरुते भावं सर्वभूतेषु अमङ्गलं समदृष्टेः तदा पुंसः सर्वाः सुखमया दिशः ॥१५॥

यदा	जब
सर्वभूतेषु	सब प्राणियोंके प्रति
अमंगलं	अमंगलकी
भावं	भावना
न कुरुते	नहीं करता
तदा समदृष्टेः	तब उस समदर्शी
पुंसः सर्वाः	पुरुषके लिए सब
दिशः	दिशाएँ
सुखमया	सुखमय हो जाती हैं ॥१५॥

या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न जीर्यते ।
तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् ॥१६॥

या दुस्त्यजा दुर्मतिभिः जीर्यतः या न जीर्यते तां तृष्णां दुःख निवहां शर्मकामः द्रुतं त्यजेत् ॥१६॥

दुर्मतिभिः	दुर्बुद्धि लोगों द्वारा	तां दुःख	उस दुःख
या	जो त्यागने में	निवहां	बहुल
दुस्त्यजा	बहुत कठिन है,	तृष्णां	तृष्ण को
या	जो (शरीरके)	शर्मकामः	शान्ति चाहनेवाला
जीर्यतः	वृद्ध होनेपर भी	द्रुतं त्यजेत्	शीघ्र त्याग दे ॥१६॥
जीर्यते न	बूढ़ी (शिथिल) नहीं होती		

मात्रा स्वस्रा दुहित्रा वा नाविविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥१७॥

मात्रा स्वस्रा दुहित्रा वा ना विविक्त आसनः भवेत् बलवान् इन्द्रियग्रामः विद्वांसं अपि कर्षति ॥१७॥

मात्रा स्वस्रा	माता, बहिन	इन्द्रियग्रामः	इन्द्रिय समूह
वा दुहित्रा	अथवा पुत्रीके साथ	बलवान्	बलवान् है,
विविक्त	एकान्तमें	विद्वांसं अपि	विद्वानको भी
आसनः	बैठनेवाला	कर्षति	अपनी ओर खींच
ना भवेत्	न बने,		लेते हैं ॥१७॥

पूर्णं वर्षसहस्रं मे विषयान् सेवतोऽसकृत् ।
तथापि चानुसवनं तृष्णा तेषूपजायते ॥१८॥

पूर्णं वर्ष सहस्रं मे विषयान् सेवतः असकृत् तथा अपि च अनुसवनं तृष्णा तेषु उपजायते ॥१८॥

मे असकृत्	मुझे निरन्तर	तथा अपि च	ऐसा होनेपर भी
विषयान्	भोगोंका	तेषु अनुसवनं	उनमें नित्यप्रति
सेवतः	सेवन करते हुए	तृष्णा	तृष्णा
सहस्रं	सहस्र	उपजायते	बढ़ती जाती है
वर्षं पूर्णं	वर्ष पूरे हो गये		॥१८॥

तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ।
निर्द्वन्द्वो निरहंकारश्चरिष्यामि मृगैः सह ॥१९॥

तस्मात् एतां अहं त्यक्त्वा ब्रह्मणि आधाय मानसं निर्द्वन्द्वः निरहंकारः चरिष्यामि मृगैः सह ॥१६॥

तस्मात्	इसलिए	निर्द्वन्द्वः	(शीत-उष्णादि) द्वन्द्वों को छोड़कर
अहं एतां	मैं इसको	निरहंकारः	अहंकारहीन होकर
त्यक्त्वा	त्यागकर	मृगैः सह	मृगोंके साथ (वनमें)
मानसं	चित्तको	चरिष्यामि	विचरण करूँ ॥१६॥
ब्रह्मणि	परमब्रह्ममें		
आधाय	लगाकर		

दृष्टं श्रुतमसद् बुद्ध्वा नानुध्यायेन्न संविशेत् ।
संसृतिं चात्मनाशं च तत्र विद्वान् स आत्मदृक् ॥२०॥

दृष्टं श्रुतं असत् बुद्ध्वा न अनुध्यायेत् न संविशेत् संसृतिं च आत्मनाशं च तत्र विद्वान् स आत्मदृक् ॥२०॥

दृष्टं	देखे (लौकिक)	च	तथा
श्रुतं	सुने (पार लौकिक)	आत्मनाशं च	अपने पतनको भी
असत् बुद्ध्वा	(भोगोंको) असत् जानकर	तत्र	उस
		विद्वान्	(चिन्तन तथा सेवन) में जाननेवाला
न अनुध्यायेत्	न उनका चिन्तन करे		
न संविशेत्	न उनमें स्थित हो,	स	वही
संसृतिं	(इससे) जन्म-मरण	आत्मदृक्	आत्मज्ञानी है ॥२०॥

श्रीशुक उवाच—*

इत्युक्त्वा नाहुषो जायां तदोयं पूरवे वयः ।
दत्त्वा स्वां जरसं तस्मादाददे विगतस्पृहः ॥२१॥

इति उक्त्वा नाहुषः जायां तदीयं पूरवे वयः दत्त्वा स्वां जरसं तस्मात् आददे विगतस्पृहः ॥२१॥

जायां इति	पत्नीसे यह	पूरवे तदीयं	पुरुको उसकी
उक्त्वा	यहकर	वयः दत्त्वा	युवावस्था देकर

* यह उवाच अन्य प्रतियोंमें नहीं है ।

विगतस्पृहः	लालसाहीन होकर	जरसं आददे	बुढ़ापा ले लिया
तस्मात् स्वां	उससे अपना		॥२१॥

दिशि दक्षिणपूर्वस्यां द्रुह्युं दक्षिणतो यदुम् ।
प्रतीच्यां तुर्वसुं चक्र उदीच्यामनुमीश्वरम् ॥२२॥

दिशि दक्षिण पूर्वस्यां द्रुह्यं दक्षिणतः यदुं प्रतीच्यां तुर्वसुं चक्रे उदीच्यां अनुं ईश्वरम् ॥२२॥

दक्षिण	दक्षिण-	तुर्वसुं	तुर्वसुको
पूर्वस्यां	पूर्व (आग्नेय कोण)	उदीच्यां अनुं	उत्तरका अनुको
दिशि द्रुह्यं	दिशा या द्रुह्युको,	ईश्वरं चक्रे	राजा बना दिया
दक्षिणतः यदुं	दक्षिणका यदुको,		॥२२॥
प्रतीच्यां	पश्चिमका		

भूमण्डलस्य सर्वस्य पूरुमर्हत्तमं विशाम् ।
अभिषिच्याग्रजांस्तस्य वशे स्थाप्य वनं ययौ ॥२३॥

भूमण्डलस्य सर्वस्य पूरुं अर्हत्तमं विशां अभिषिच्य अग्रजान् तस्य वशे स्थाप्य वनं ययौ ॥२३॥

सर्वस्य	सम्पूर्ण	अभिषिच्य	अभिषेक करके
भूमण्डलस्य	पृथ्वी-मण्डलके	अग्रजान्	बड़े भाइयोंको
विशां	व्यापारियोंके	तस्य वेश स्थाप्य	उसके अधीन बनाकर
अर्हत्तमं	परमपूजनीय पदपर	वनं ययौ	वनमें चले गये ॥२३॥
पूरुं	पुरुका		

आसेवितं वर्षपूगान् षड्वर्गं विषयेषु सः ।
क्षणेन मुमुचे नीडं जातपक्ष इव द्विजः ॥२४॥

आसेवितं वर्ष पूगान् षड्वर्गं विषयेषु सः क्षणेन मुमुचे नीडं जात पक्ष इव द्विजः ॥२४॥

जात पक्ष	पंख उत्पन्न हो जाने पर	आसेवितं	भली प्रकार भोगे हुए
		विषयेषु	भोगोंको
नीडं द्विजः	घोंसलेको पक्षीकी	सः	उन्होंने एक
इव	भांति	क्षणेन मुमुचे	क्षणमें त्याग दिया
वर्ष पूगान्	बहुत वर्षों तक		॥२४॥
षड्वर्गं	शब्दादि छहो वर्गके		

स तत्र निर्मुक्तसमस्तसङ्ग
आत्मानुभूत्या विधुतत्रिलिङ्गः ।
परेऽमले ब्रह्मणि वासुदेवे
लेभे गतिं भागवतीं प्रतीतः ॥२५॥

स तत्र निर्मुक्त समस्त संगः आत्म अनुभूत्या विधुत त्रिलिंगः परे अमले ब्रह्मणि वासुदेवे लेभे गतिं भागवतीं प्रतीतः ॥२५॥

स	उन (राजा ययाति)ने	परे अमले	परम निर्मल
तत्र	वहां (वनमें)	ब्रह्मणि	परमब्रह्म
समस्त संगः	सम्पूर्ण आसक्तियोंसे	वासुदेवे	वासुदेवमें
निर्मुक्त	छूटकर	प्रतीतः	प्रत्यक्ष
आत्म अनुभूत्या	आत्मानुभव द्वारा	भागवतीं गतिं	भागवती गति
त्रिलिंगः	त्रिगुणमय देहसे	लेभे	प्राप्त की ॥२५॥
विधुत	मुक्त होकर		

श्रुत्वा गाथां देवयानी मेने प्रस्तोभमात्मनः ।
स्त्रीपुंसोः स्नेहवैक्लव्यात् परिहासमिवेरितम् ॥२६॥

श्रुत्वा गाथां देवयानी मेने प्रस्तोभं आत्मनः स्त्री पुंसोः स्नेह वैक्लव्यात् परिहासं इव इरितम् ॥२६॥

देवयानी	देवयानीने	आत्मनः	अपनेको
गाथां श्रुत्वा	उस गाथाको सुनकर	प्रस्तोभं मेने	उलाहना समझा

स्त्री पुंसोः	स्त्री-पुरुषकी	परिहासं इव	परिहासके समान
स्नेह	स्नेह जन्य	इरितं	(यह गाथा) कही
वैक्लव्यात्	व्याकुलतासे		गयी है ॥२६॥

सा संनिवासं सुहृदां प्रपायामिव गच्छताम् ।
विज्ञायेश्वरतन्त्राणां मायाविरचितं प्रभोः ॥२७॥

सा सन्निवासं सुहृदां प्रपायां इव गच्छतां विज्ञाय ईश्वर तन्त्राणां माया विरचितं प्रभोः ॥२७॥

ईश्वर तन्त्राणां	ईश्वराधीन	इव	समान
सुहृदां	सुहृदोंका	प्रभोः माया	भगवानकी मायासे
सन्निवासं	एक साथ रहना	विरचितं	निर्मित
गच्छतां	जानेवालों (यात्रियों)	सा विज्ञाय	उसने जान लिया
प्रपायां	प्याऊपर (मिलने) के		॥२७॥

सर्वत्र संगमुत्सृज्य स्वप्नौपम्येन भार्गवी ।
कृष्णे मनः समावेश्य व्यधुनोल्लिंगमात्मनः ॥२८॥

सर्वत्र संगं उत्सृज्य स्वप्न औपम्येन भार्गवी कृष्णे मनः सम आवेश्य व्यधुनोत् लिगं आत्मनः ॥२८॥

भार्गवी	भृगुवंशीया देवयानी	मनः कृष्णे	मनको श्रीकृष्णमें
सर्वत्र संगं	सब कहींकी आसक्ति	सम आवेश्य	भली प्रकार लगाकर
स्वप्न	स्वप्नके समान	आत्मनः लिंगं	अपना लिंग देह
औपम्येन	समझकर	व्यधुनोत्	नष्ट कर दिया ॥२८॥
उत्सृज्य	त्यागकर		

नमस्तुभ्यं भगवते वासुदेवाय वेधसे ।
सर्वभूताधिवासाय शान्ताय बृहते नमः ॥२९॥

नमः तुभ्यं भगवते वासुदेवाय वेधसे सर्वभूत अधिवासाय शान्ताय बृहते नमः ॥२९॥

वेधसे	जगन्निर्माता;	भगवते	भगवान
सर्वभूत	सम्पूर्ण प्राणियोंमें	वासुदेवाय	वासुदेव
अधिवासाय	निवास करनेवाले	तुभ्यं नमः	आपको नमस्कार ॥२६॥
शान्ताय	शान्त		
बृहते नमः	ब्रह्म स्वरूपको नमस्कार		

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे एकोनविंशोऽध्यायः ॥१९॥

अथ विंशोऽध्यायः

श्रीशुक उवाच

पूरोर्वंशं प्रवक्ष्यामि यत्र जातोऽसि भारत ।
यत्र राजर्षयो वंश्या ब्रह्मवंश्याश्च जज्ञिरे ॥१॥

पूरोः वंशं प्रवक्ष्यामि यत्र जातः असि भारत यत्र राजर्षयः वंश्या ब्रह्म वंश्याः च जज्ञिरे ॥१॥

भारत	परीक्षित !	ब्रह्म वंश्या	ब्राह्मण वंशधर
यत्र	जिसमें (तुम)	जज्ञिरे	उत्पन्न हुए हैं
जातः आसि	उत्पन्न हुए हो	पूरोः वंशं	उस पुरुका वंश
यत्र राजर्षयः	जिसके राजर्षि लोग	प्रवक्ष्यामि	वर्णन करता हूँ ॥१॥
वंश्या च	वंशधर तथा		

जनमेजयोह्यभूत् पूरोः प्रचिन्वांस्तत्सुतस्ततः ।
प्रवीरोऽथ नमस्युर्वै तस्माच्चारुपदोऽभवत् ॥२॥

जनमेजयः हि अभूत् पूरोः प्रचिन्वान् तत् सुतः ततः प्रवीरः अथ नमस्युः वै तस्मात् चारुपदः अभवत् ॥२॥

पूरोः हि	पुरुका तो	ततः प्रवीरः	उससे प्रवीर
जनमेजयः	जनमेजय	अथ वै नमस्युः	फिर तो नमस्यु
अभूत्	उत्पन्न हुआ,	तस्मात्	उससे
तत् सुतः	उसका पुत्र	चारुपदः	चारुपद
प्रचिन्वान्	प्रचिन्वान्	अभवत्	उत्पन्न हुआ ॥२॥

तस्य सुद्यु रभूत् पुत्रस्तस्माद् बहुगवस्ततः ।
संयातिस्तस्याहंयाती रौद्राश्वस्तत्सुतः स्मृतः ॥३॥

तस्य सुद्युः अभूत् पुत्रः तस्मात् बहुगवः ततः संयातिः तस्य अहंयातिः रौद्राश्वः तत् सुतः स्मृतः ॥३॥

तस्य पुत्रः	उसका पुत्र	तस्य अहंयातिः	उससे अहंयाति
सुद्युः अभूत्	सुद्यु हुआ,	तत् सुतः	उसका पुत्र
तस्मात् बहुगवः	उससे बहुगव	रौद्राश्वः स्मृतः	रौद्राश्व कहा गया है ॥३॥
ततः संयातिः	उससे संयाति		

ऋतेयुस्तस्य कुक्षेयुः स्थण्डिलेयुः कृतेयुकः ।
जलेयुः सन्ततेयुश्च धर्मसत्यव्रतेयवः ॥४॥

ऋतेयुः तस्य कुक्षेयुः स्थण्डिलेयुः कृतेयुकः जलेयुः सन्ततेयुः च धर्म सत्य व्रतेयवः ॥४॥

तस्य ऋतेयुः	उसके ऋतेयु,	सन्ततेयुः च	सन्ततेयु तथा
कुक्षेयुः	कुक्षेयु,	धर्म सत्य	धर्मेयु, सत्येयु,
स्थण्डिलेयुः	स्थण्डिलेयु,	व्रतेयवः	व्रतेयु ॥४॥
कृतेयुकः जलेयुः	कृतेयु, जलेयु,		

दशैतेऽप्सरसः पुत्रा वनेयुश्चावमः स्मृतः ।
घृताच्यामिन्द्रियाणीव मुख्यस्य जगदात्मनः ॥५॥

दश एते अप्सरसः पुत्रा वनेयुः च अवमः स्मृतः घृताच्यां इन्द्रियाणि इव मुख्यस्य जगत आत्मनः ॥५॥

जगत आत्मनः	विश्वात्मा	दश पुत्रा	ये दस पुत्र हुए
मुख्यस्य	मुख्य प्राणसे	च अवमः	तथा उनमें सबसे छोटा
इन्द्रियाणि इव	इन्द्रियोंके समान	वनेयुः स्मृतः	वनेयु कहा गया है ॥५॥
अप्सरसः	अप्सरा		
घृताच्यां एते	घृताचीसे इतने		

ऋतेयो रन्तिभारोऽभूत् त्रयस्तस्यात्मजा नृप ।
सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ॥६॥

ऋतेयोः रन्तिभारः अभूत् त्रयः तस्य आत्मजा नृप सुमतिः ध्रुवः अप्रतिरथः कण्वः अप्रतिरथ आत्मजः ॥६॥

नृप	राजन् !	आत्मजाः	पुत्र हुए
ऋतेयोः	ऋतेयुसे	सुमतिः ध्रुवः	सुमति, ध्रुव,
रन्तिभारः	रन्तिभार	अप्रतिरथः	अप्रतिरथ,
अभूत्	उत्पन्न हुआ	अप्रतिरथ	अप्रतिरथका
तस्य त्रयः	उसके तीन	आत्मजः कण्वः	पुत्र कण्व हुआ ॥६॥

तस्य मेधातिथिस्तस्मात् प्रस्कण्वाद्या द्विजातयः ।
पुत्रोऽभूत् सुमते रैभ्यो दुष्यन्तस्तत्सुतो मतः ॥७॥

तस्य मेधातिथिः तस्मात् प्रस्कण्व आद्या द्विजातयः पुत्रः अभूत् सुमते रैभ्यः दुष्यन्तः तत् सुतः मतः ॥७॥

तस्य	उसके	सुमते पुत्रः	सुमतिका पुत्र
मेधातिथिः	मेधातिथि	रैभ्यः अभूत्	रैभ्य हुआ
तस्मात्	उससे	तत् मतः सुतः	उसका प्रिय पुत्र
प्रस्कण्व आद्या	प्रस्कण्व आदि	दुष्यन्तः	दुष्यन्त था ॥७॥
द्विजातयः	अनेक ब्राह्मण हुए		

दुष्यन्तो मृगयां यातः कण्वाश्रमपदं गतः ।
तत्रासीनां स्वप्रभया मण्डयन्तीं रमामिव ॥८॥

दुष्यन्तः मृगयां यातः कण्व आश्रम पदं गतः तत्र आसीनां स्वप्रभया मण्डयन्तीं रमां इव ॥८॥

दुष्यन्तः	दुष्यन्त	गतः	पहुँचा तो
मृगयां यातः	आखेट खेलने जाकर	तत्र रमां इव	वहां लक्ष्मीके समान
कण्व आश्रम	कण्वाश्रम	मण्डयन्तीं	शोभा सम्पन्ना
पदं	स्थानपर	आसीनां	बैठी हुई ॥८॥

विलोक्य सद्यो मुमुहे देवमायामिव स्त्रियम् ।
बभाषे तां वरारोहां भटैः कतिपयैर्वृतः ॥९॥

विलोक्य सद्यः मुमुहे देवमायां इव स्त्रियं बभाषे तां वरारोहां भटैः कतिपयैः वृतः ॥९॥

देवमायां	भगवानकी मायाके	भटैः कतिपयैः	कुछ सैनिकोंसे
इव	समान	वृतः तां	घिरा हुआ उस
स्त्रियं विलोक्य	स्त्रीको देखकर	वरारोहां	सुन्दरीसे
सद्यः मुमुहे	तत्काल मोहित हो गया	बभाषे	बोला ॥९॥

तद्दर्शनप्रमुदितः संनिवृत्तपरिश्रमः ।
पप्रच्छ कामसन्तप्तः प्रहसञ्श्लक्ष्णया गिरा ॥१०॥

तत् दर्शन प्रमुदितः संनिवृत्त परिश्रमः पप्रच्छ काम सन्तप्तः प्रहसन् श्लक्ष्णया गिरा ॥१०॥

तत्	उसको	संनिवृत्त	दूर करके
दर्शन	देखनेसे	प्रहसन्	मुस्कुराकर
प्रमुदितः	आनन्द मिला,	श्लक्ष्णया	कोमल
काम	कामवासना	गिरा	वाणीमें
संतप्तः	जागृत हो गई,	पप्रच्छ	पूछा ॥१०॥
परिश्रमः	थकावट		

दुष्यन्तोवाच*

का त्वं कमलपत्राक्षि कस्यासि हृदयङ्गमे ।
किं वा चिकीर्षितं त्वत्र भवत्या निर्जने वने ॥११॥

का त्वं कमलपत्र अक्षि कस्य असि हृदयंगमे किं वा चिकीर्षितं तु अत्र भवत्या निर्जने वने ॥११॥

कमलपत्र	पद्म-पत्र	का त्वं	तुम कौन हो ?
अक्षि	लोचने !	कस्य असि	किसकी (पुत्री) हो ?

* यह उवाच अन्य प्रतियोंमें नहीं है ।

हृदयंगमे	मनोरमे !	भवत्या किं	तुम्हारी क्या
अत्र	इस	चिकीर्षितं	करनेकी इच्छा है ?
निर्जने वने तु	निर्जन वनमें तो		॥११॥

व्यक्तं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे ।
न हि चेतः पौरवाणामधर्मे रमते क्वचित् ॥१२॥

व्यक्तं राजन्य तनयां वेद्मि अहं त्वां सुमध्यमे न हि चेतः पौरवाणां अधर्मे रमते क्वचित् ॥१२॥

सुमध्यमे	सुमध्यमे !	हि	क्योंकि
अहं त्वां	मैं तुम्हें	पौरवाणां	पुरुवंशियोंका
व्यक्तं	स्पष्ट ही	चेतः क्वचित्	चित्त कभी भी
राजन्य तनयां	राज-पुत्री	अधर्मे	अधर्ममें
वेद्मि	समझता हूँ	न रमते	नहीं लगता ॥१२॥

शकुन्तलोवाच

विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने ।
वेदैतद् भगवान् कण्वो वीर किं करवाम ते ॥१३॥

विश्वामित्र आत्मजा एव अहं त्यक्ता मेनकया वने वेद एतत् भगवान् कण्वः वीर किं करवाम ते ॥१३॥

अहं	मैं	भगवान् कण्वः	भगवान् कण्व
मेनकया	मेनका अप्सरा द्वारा	एतत् वेद	यह बात जानते हैं,
वने त्यक्ता	वनमें छोड़ी गयी	वीर ते	वीर ! तुम्हारा
विश्वामित्र	विश्वामित्रकी	किं करवाम	क्या कार्य करूँ
एव	ही		॥१३॥
आत्मजा	पुत्री हूँ		

आस्यतां ह्यरविन्दाक्ष गृह्यतामर्हणं च नः ।
भुज्यतां सन्ति नीवारा उष्यतां यदि रोचते ॥१४॥

आस्यतां हि अरविन्द अक्ष गृह्यतां अर्हणं च नः भुज्यतां सन्ति नीवारा उष्यतां यदि रोचते ॥१४॥

अरविन्द अक्ष	कमल-लोचन !	भुज्यतां	उन्हें भोजन कीजिए और
हि आस्यतां	अवश्य पधारिये	यदि रोचते	यदि रुचि हो तो
च नः अर्हणं	तथा हमारा सत्कार	उष्यतां	यहां निवास कीजिए ॥१४॥
गृह्यतां	ग्रहण कीजिए,		
नीवारा सन्ति	कुछ नीवार (वन्य अन्न) हैं		

दुष्यन्तोवाच

उपपन्नमिदं सुभ्रु जातायाः कुशिकान्वये ।
स्वयं हि वृणते राज्ञां कन्यकाः सदृशं वरम् ॥१५॥

उपपन्नं इदं सुभ्रु जातायाः कुशिक अन्वये स्वयं हि वृणते राज्ञां कन्यकाः सदृशं वरम् ॥१५॥

सुभ्रु	सुन्दर भौंहों वाली !	हि राज्ञां	क्योंकि राज
कुशिक अन्वये	कुशिक वंशमें	कन्यकाः	कन्याएँ
जातायाः	उत्पन्न हुई (तुम्हारी)	सदृशं वरं	अपने समान वरको
इदं उपपन्नं	यह बात उचित ही है	स्वयं वृणते	स्वयं वरण कर लेती हैं ॥१५॥

श्रीशुक उवाच*

ओमित्युक्ते यथाधर्ममुपयेमे शकुन्तलाम् ।
गान्धर्वविधिना राजा देशकालविधानवित् ॥१६॥

ओम् इति उक्ते यथा धर्मं उपयेमे शकुन्तलां गन्धर्व विधिना राजा देश काल विधानवित् ॥१६॥

ओम् इति उक्ते	'अच्छा' इस प्रकार कहनेपर	देश काल विधानवित्	देश, काल तथा शास्त्र-विधानको जाननेवाले

*यह उवाच अन्य प्रतियोंमें नहीं है ।

राजा यथा धर्मं	राजाने धर्मके अनुसार
गान्धर्व विधिना	गान्धर्व विधिसे
शकुन्तलां उपयेमे	शकुन्तलासे विवाह कर लिया ॥१६॥

अमोघवीर्यो राजर्षिर्महिष्यां वीर्यमादधे ।
श्वोभूते स्वपुरं यातः कालेनासूत सा सुतम् ॥१७॥

अमोघ वीर्यः राजर्षिः महिष्यां वीर्यं आदधे श्वभूते स्वपुरं यातः कालेन असूत सा सुतम् ॥१७॥

अमोघ वीर्यः	अव्यर्थ वीर्य
राजर्षिः	उस राजर्षिने
महिष्यां	उस महारानीमें
वीर्यं आदधे	वीर्याधान किया और
श्वभूते	सवेरा होनेपर
स्वपुरं यातः	अपने नगर चला गया
सा कालेन	उस (शकुन्तला) ने समयपर
सुतं असूत	पुत्र उत्पन्न किया ॥१७॥

कण्वः कुमारस्य वने चक्रे समुचिताः क्रियाः ।
बद्ध्वा मृगेन्द्रांस्तरसा क्रीडति स्म स बालकः ॥१८॥

कण्वः कुमारस्य वने चक्रे समुचिताः क्रियाः बद्ध्वा मृगेन्द्रान् तरसा क्रीडति स्म स बालकः ॥१८॥

वने कण्वः	वनमें कण्व ऋषिने
कुमारस्य	उस कुमारके
समुचिताः	सब उचित
क्रियाः	संस्कार
चक्रे	सम्पन्न किये,
स बालकः	वह बालक
तरसा	बलपूर्वक
मृगेन्द्रान्	सिंहोंको
बद्ध्वा	बाँधकर
क्रीडति स्म	उनके साथ खेलता था ॥१८॥

तं दुरत्ययविक्रान्तमादाय प्रमदोत्तमा ।
हरेरंशांशसम्भूतं भर्तुरन्तिकमागमत् ॥१९॥

तं दुरत्यय विक्रान्तं आदाय प्रमदा उत्तमा हरेः अंशांश सम्भूतं भर्तुः अन्तिकं आगमत् ॥१६॥

प्रमदा उत्तमा	नारीश्रेष्ठ (शकुन्तला)	सम्भूतं	उत्पन्न (बालक) को
		आदाय	लेकर
तं दुरत्यय	उस दुर्धर	भर्तुः अन्तिकं	पतिके समीप
विक्रान्तं	पराक्रम वाले	आगमत्	आयी ॥१६॥
हरेः अंशांश	श्रीहरिके अंशांशसे		

यदा न जगृहे राजा भार्यापुत्रावनिन्दितौ ।
श्रृण्वतां सर्वभूतानां खे वागाहाशरीरिणी ॥२०॥

यदा न जगृहे राजा भार्या पुत्राः अनिन्दितौ शृण्वतां सर्वभूतानां खे वाक् आह अशरीरिणी ॥२०॥

यदा राजा	जब राजाने	अशरीरिणी	बिना शरीरके
अनिन्दितौ	निर्दोष	खे वाक्	आकाशवाणीने
भार्या पुत्राः	पत्नी तथा पुत्रको	सर्वभूतानां	सब प्राणियोंके
न जगृहे	नहीं स्वीकार किया तब	शृण्वतां आह	सुनते हुए कहा ॥२०॥

माता भस्त्रा पितुः पुत्रो येन जातः स एव सः ।
भरस्व पुत्रं दुष्यन्त मावमंस्थाः शकुन्तलाम् ॥२१॥

माता भस्त्रा पितुः पुत्रः येन जातः स एव सः भरस्व पुत्रं दुष्यन्त मा अवमंस्थाः शकुन्तलाम् ॥२१॥

माता भस्त्रा	'माता तो धौंकनीके समान है	दुष्यन्त	दुष्यन्त !
		पुत्रं भरस्व	पुत्रका भरण-पोषण करो,
पुत्रः पितुः	पुत्र पिताका होता है,		
स येन जातः	वह जिससे उत्पन्न होता है	शकुन्तलां	शकुन्तलाका
		अवमंस्था मा	अपमान मत करो ॥२१॥
सः स एव	वह उसीका स्वरूप होता है,		

रेतोधाः पुत्रो नयति नरदेव यमक्षयात् ।
त्वं चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥२२॥

रेतः धाः पुत्रः नयति नरदेव यमक्षयात् त्वं च अस्य धाता गर्भस्य सत्यं आह शकुन्तला ॥२२॥

नरदेव	नरदेव !	शकुन्तला	शकुन्तलाने
रेतः धाः	अपने वीर्याधानसे उत्पन्न	सत्यं आह	सच कहा है कि
		अस्य गर्भस्य	इस गर्भका
पुत्रः	पुत्र	त्वं च धाता	तुम्हीं आधान करने वाले हो' ॥२२॥
यमक्षयात्	नरकसे		
नयति	निकाल लेता है,		

पितर्युपरते सोऽपि चक्रवर्ती महायशाः ।
महिमा गीयते तस्य हरेरंशभुवो भुवि ॥२३॥

पितरि उपरते सः अपि चक्रवर्ती महायशाः महिमा गीयते तस्य हरेः अंशभुवः भुवि ॥२३॥

पितरि	पिता (दुष्यन्त)के	भुवि	पृथ्वीपर
उपरते	मर जानेपर	हरेः	श्रीहरिके
सः अपि	वह (भरत) भी	अंशभुवः	अंशसे उत्पन्नके रूपमें
महायशाः	महान यशस्वी		
चक्रवर्ती	चक्रवर्ती हुआ	गीयते	वर्णन होती है ॥२३॥
तस्य महिमा	उसकी महिमा		

चक्रं दक्षिणहस्तेऽस्य पद्मकोशोऽस्य पादयोः ।
ईजे महाभिषेकेण सोऽभिषिक्तोऽधिराड्विभुः ॥२४॥

चक्रं दक्षिण हस्ते अस्य पद्मकोशः अस्य पादयोः ईजे महा अभिषेकेण सः अभिषिक्तः अधिराट् विभुः ॥२४॥

अस्य	इसके	चक्रं	चक्रका चिह्न तथा
दक्षिण हस्ते	दाहिने हाथमें	अस्य पादयोः	इसके चरणोंमें

पद्मकोशः	कमल पुष्पका चिह्न था	अधिराट्	सार्वभौम सम्राट् पदपर
विभुः सः	समर्थ वह	अभिषिक्तः	अभिषेक होनेपर
महा अभिषेकेण	महा अभिषेक विधिसे	ईजे	यज्ञ करने लगा ॥२४॥

पञ्चपञ्चाशता मेध्यैर्गङ्गायामनु वाजिभिः ।
मामतेयं पुरोधाय यमुनायामनु प्रभुः ॥२५॥
अष्टसप्ततिमेध्याश्वान् बबन्ध प्रददद् वसु ।
भरतस्य हि दौष्यन्तेरग्निः साचीगुणे चितः ।
सहस्रं बद्धशो यस्मिन् ब्राह्मणा गा विभेजिरे ॥२६॥

पञ्चपञ्चाशता मेध्यैः गङ्गायां अनु वाजिभिः मामतेयं पुरः आधाय यमुनायां अनु प्रभुः ॥२५॥

अष्टसप्तति मेध्य अश्वान् बबन्ध प्रददत् वसु सहस्रं बद्धशः यस्मिन् ब्राह्मणा गा विभेजिरे ॥२६॥

मामतेयं	ममताके पुत्र दीर्घतमा मुनिको	अश्वान् मेध्य	अश्वमेध यज्ञ
पुरः आधाय	आगे करके (आचार्य बनाकर)	वसु प्रददत्	धन देते हुए
प्रभुः	उस समर्थने	बबन्ध	बाँधे (सम्पन्न किये)
गंगायां अनु	गंगाके किनारे	यस्मिन्	जिन (यज्ञों) में
पञ्चपञ्चाशता	पचपन	सहस्रं	एक सहस्र
वाजिभिः मेध्यैः	अश्वमेध तथा	ब्राह्मणा	ब्राह्मणोंने
यमुनायां अनु	यमुना किनारे	बद्धशः	एक-एक बद्ध*
अष्टसप्तति	अठहत्तर	गा विभेजिरे	(परस्पर) गायें बांटी थीं ॥२५-२६॥

* चतुर्दशानां लक्षाणां सप्ताधिक शतांशकः बद्धं चतुर शीत्यग्र सहस्राणि चतुर्दश। चौदह लाखका एक सौ सत्तवां भाग तेरह हजार चौरासी (१३०८४) एक बद्ध होता है ।

त्रयस्त्रिंशच्छतं ह्यश्वान् बद्ध्वा विस्मापयन् नृपान् ।
दौष्यन्तिरत्यगान्मायां देवानां गुरुमाययौ ॥२७॥

त्रयः त्रिंशत् शतं हि अश्वान् बद्ध्वा विस्मापयन् नृपान् दौष्यन्तिः अत्यगात् मायां देवानां गुरुं आययौ ॥२७॥

दौष्यन्तिः	दुष्यन्तकुमार भरतने	विस्मापयन्	चकित कर दिया
		देवानां	देवताओंसे
त्रयः त्रिंशत् शतं	तैंतीस सौ	गुरुं	बड़े
अश्वान्	घोड़ोंको (उन यज्ञों-में)	आययौ	(ऐश्वर्यशाली) हो गये तथा
बद्ध्वा	बाँधकर	मायां	मायाको
नृपान्	राजाओंको	अत्यागात्	पार कर गये ॥२७॥

मृगाञ्छुक्लदतः कृष्णान् हिरण्येन परीवृतान् ।
अदात् कर्मणि मष्णारे नियुतानि चतुर्दश ॥२८॥

मृगान् शुक्लदतः कृष्णान् हिरण्येन परीवृतान् अदात् कर्मणि मष्णारे नियुतानि चतुर्दश ॥२८॥

मष्णारे	मष्णार* (यज्ञ कार्य विशेष) में	परीवृतान्	विभूषित
		चतुर्दश	चौदह
शुक्लदतः	श्वेत दांतवाले	नियुतानि	लाख
कृष्णान् मृगान्	काले रंगके हाथी	अदात्	दान किये ॥२८॥
हिरण्येन	स्वर्ण		

भरतस्य महत् कर्म न पूर्वे नापरे नृपाः ।
नैवापुर्नैव प्राप्स्यन्ति बाहुभ्यां त्रिदिवं यथा ॥२९॥

भरतस्य महत् कर्म न पूर्वे न अपरे नृपाः न एव आपुः न एव प्राप्स्यन्ति बाहुभ्यां त्रिदिवं यथा ॥२९॥

---

* मष्णार स्थान अफ्रिकाके पश्चिमी तटपर कांगोंके पास समुद्र किनारे अब 'मस्नार' के नामसे है। यह मष्णार यज्ञ-कार्यके नामपर भी पड़ा हो सकता है।

यथा बाहुभ्यां	जैसे भुजाओंसे
त्रिदिवं	स्वर्ग (नहीं छुआ जा सकता)
भरतस्य	भरतके
महत् कर्म	महान् कर्मको
न पूर्वे नृपाः	न पहिले हुए राजा
न एव आपुः	नहीं ही पा सके
न अपरे	न आगे होनेवाले दूसरे
न एव	नहीं ही
प्राप्स्यन्ति	पा सकेंगे ॥२९॥

किरातहूणान् यवनानन्ध्रान् कङ्कान् खशाञ्छकान् ।
अब्रह्मण्यान् नृपांश्चाहन् म्लेच्छान् दिग्विजयेऽखिलान् ॥३०

किरात हूणान् यवनान् अन्ध्रान् कङ्कान् खशान् शकान् अब्रह्मण्यान् नृपान् च अहन् म्लेच्छान् दिग्विजये अखिलान् ॥३०॥

दिग्विजये	दिग्विजयके समय
किरात हूणान्	किरात, हूण,
यवनान्	यवन,
आन्ध्रान्	आन्ध्र,
कङ्कान् खशान्	कंक, खश,
शकान् च	शक तथा
म्लेच्छान्	म्लेच्छ
अब्रह्मण्यान्	ब्राह्मण विरोधी
अखिलान्	सब
नृपान्	राजाओंको
अहन्	मार दिया ॥३०॥

जित्वा पुरासुरा देवान् ये रसौकांसि भेजिरे ।
देवस्त्रियो रसां नीताः प्राणिभिः पुनराहरत् ॥३१॥

जित्वा पुरा असुरा देवान् ये रसौकांसि भेजिरे देवस्त्रियः रसां नीताः प्राणिभिः पुनः आहरत् ॥३१॥

ये	जो
रसौकांसि	रसातलमें रहनेवाले
असुरा देवान्	असुर देवताओंको
पुरा जित्वा	पहिले जीतकर
देवस्त्रियः	देवांगनाओंको
रसां नीताः	रसातल ले जाकर
भेजिरे	रह रहे थे,
पुनः प्राणिभिः	फिर प्राणियोंके साथ
आहरत्	(भरत उन्हें) छुड़ा लाये ॥३१॥

सर्वकामान् दुदुहतुः प्रजानां तस्य रोदसी ।
समास्त्रिणवसाहस्त्रीर्दिक्षु चक्रमवर्तयत् ॥३२॥

सर्वकामान् दुदुहतुः प्रजानां तस्य रोदसी समाः त्रिणव साहस्रीः दिक्षु चक्रं अवर्तयत् ॥३२॥

तस्य प्रजानां	उनकी प्रजाके लिए	त्रिणव साहस्रीः	सत्ताइस सहस्र
रोदसी	पृथ्वी	समाः दिक्षु	वर्ष तक दिशाओंमें
सर्वकामान्	सब कामनाएँ	चक्रं अवर्तयत्	(उनका) शासन-चक्र
दुदुहतुः	दुहदेती (पूर्ण करती) थी,		चलता रहा ॥३२॥

स सम्राड् लोकपालाख्यमैश्वर्यमधिराट् श्रियम् ।
चक्रं चास्खलितं प्राणान् मृषेत्युपरराम ह ॥३३॥

स सम्राट् लोकपाल आख्यं ऐश्वर्यं अधिराट् श्रियं चक्रं च अस्खलितं प्राणान् मृषा इति उपरराम ह ॥३३॥

स सम्राट्	वे सम्राट्	अस्खलितं चक्रं	अटल अनुशासन
लोकपाल	लोकपाल	प्राणान्	और प्राणोंको भी
आख्यं	कहे जाने वालोंके	मृषा	'ये मिथ्या हैं'
ऐश्वर्यं	ऐश्वर्य,	इति	ऐसा मानकर
अधिराट् श्रियं	सार्वभौमकी सम्पत्ति	ह उपरराम	निश्चित उपरत हो
च	तथा		गये ॥३३॥

तस्यासन् नृप वैदर्भ्यः पत्न्यस्तिस्रः सुसम्मताः ।
जघ्नुस्त्यागभयात् पुत्रान् नानुरूपा इतीरिते ॥३४॥

तस्य आसन् नृप वैदर्भ्यः पत्न्यः तिस्रः सुसम्मताः जघ्नुः त्याग भयात् पुत्रान् न अनुरूपा इति ईरिते ॥३४॥

नृप	राजन् !	इति ईरिते	(राजाके) ऐसा कहने पर
तस्य वैदर्भ्यः	उनके विदर्भ देशीय	त्याग	अपने त्यागे जानेके
तिस्त्र	तीन	भयात्	भयसे
सुसम्मताः	अत्यन्त प्रिय	पुत्रान्	(उन्होंने) पुत्रोंको
पत्न्यः आसन्	पत्नियां थीं,	जघ्नुः	मार दिया ॥३४॥
न अनुरूपा	'ये मेरे अनुरूप नहीं हैं'		

तस्यैवं वितथे वंशे तदर्थं यजतः सुतम् ।
मरुत्स्तोमेन मरुतो भरद्वाजमुपाददुः ॥३५॥

तस्य एवं वितथे वंशे तत् अर्थं यजतः सुतं मरुत्स्तोमेन मरुतः भरद्वाजं उप आददुः ॥३५॥

एवं तस्य	इस प्रकार उसके	यजतः	यज्ञ करते समय
वंशे वितथे	वंशके व्यर्थ हो जाने पर	मरुतः	मरुतने
		भरद्वाजं सुतं	भरद्वाज नामक पुत्र
तत् अर्थं	उस प्रयोजनसे	उप आददुः	लाकर दिया ॥३५॥
मरुत्स्तोमेन	मरुत्स्तोम नामक		

अन्तर्वत्न्यां भ्रातृपत्न्यां मैथुनाय बृहस्पतिः ।
प्रवृत्तो वारितो गर्भं शप्त्वा वीर्यमवासृजत् ॥३६॥

अन्तर्वत्न्यां भ्रातृपत्न्यां मैथुनाय बृहस्पतिः प्रवृत्तः वारितः गर्भं शप्त्वा वीर्यं अवासृजत् ॥३६॥

अन्तर्वत्न्यां	गर्भवती	वारितः	रोकनेपर
भ्रातृपत्न्यां	भाईकी पत्नीसे	गर्भं शप्त्वा	गर्भको शाप देकर
मैथुनाय	मैथुन करनेको	वीर्यं अवासृजत्	वीर्य-त्याग कर दिया ॥३६॥
बृहस्पतिः	बृहस्पति		
प्रवृत्तः	प्रवृत्त हुए तब (गर्भ द्वारा)		

तं त्यक्तुकामां ममतां भर्तृत्यागविशंकिताम् ।
नामनिर्वचनं तस्य श्लोकमेनं सुरा जगुः ॥३७॥

तं त्यक्तुकामां ममतां भर्तृत्याग विशङ्कितां नाम निर्वचनं तस्य श्लोकं एनं सुरा जगुः ॥३७॥

भर्तृत्याग	पति द्वारा त्यागे जानेकी	त्यक्तुकामां	छोड़नेकी इच्छा वाली
विशङ्कितां	आशंका करके	ममतां	ममतासे
तं	उस (बालक) को	तस्य नाम	उसके नामका

निर्वचनं	निर्देश करनेवाला	सुरा जगुः	देवताओंने कहा
एनं श्लोकं	यह श्लोक		॥३७॥

मूढे भर द्वाजमिमं भर द्वाजं बृहस्पते ।
यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयम् ॥३८॥

मूढे भर द्वाजं इमं भर द्वाजं बृहस्पतेः यातौ यत् उक्त्वा पितरौ भरद्वाजः ततः त्वयम् ॥३८॥

मूढे इमं	'मूर्खे ! इस	उक्त्वा पितरौ	यह कहकर माता-पिता
द्वाजं	दोनोंसे उत्पन्नका	यत् यातौ	क्योंकि चले गये
भर	भरण-पोषण कर'	ततः स्वयं	इसलिए यह स्वयं
बृहस्पतेः	बृहस्पति !	भरद्वाजः	भरद्वाज नामका
भर द्वाजं	'दोनोंसे उत्पन्नका तुम भरण करो'		है' ॥३८॥

चोद्यमाना सुरैरेवं मत्वा वितथमात्मजम् ।
व्यसृजन् मरुतोऽबिभ्रन् दत्तोऽयं वितथेऽन्वये ॥३९॥

चोद्यमाना सुरैः एवं मत्वा वितथं आत्मजं व्यसृजन् मरुतः अबिभ्रन् दत्तः अयं वितथे अन्वये ॥३९॥

सुरैः एवं	देवताओंके इस प्रकार	मरुतः	मरुद्गणोंने
चोद्यमाना	प्रेरित करनेपर	अबिभ्रन्	उसको धारण किया
आत्मजं	पुत्रको	वितथे	फिर (भरत वंशके)
वितथं	वितथ (अन्यायज)	अन्वये	व्यर्थ होनेपर
मत्वा	मानकर	दत्तः	(इसे लाकर) दे दिया ॥३९॥
व्यसृजन्	(ममताने) त्याग दिया		

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे विंशोऽध्यायः ॥२०॥

अथ एकविंशोऽध्यायः

श्रीशुक उवाच

वितथस्य सुतो मन्युर्बृहत्क्षत्रो जयस्ततः ।
महावीर्यो नरो गर्गः सङ्कृतिस्तु नरात्मजः ॥१॥

वितथस्य सुतः मन्युः बृहत्क्षत्रः जयः ततः महावीर्यः नरः गर्गः सङ्कृतिः तु नर आत्मजः ॥१॥

वितथस्य सुतः	वितथका पुत्र
मन्युः ततः	मन्यु, उससे
बृहत्क्षत्रः	बृहत्क्षत्र,
जयः	जय,
महावीर्यः नरः	महावीर्य, नर,
गर्गः	और गर्ग (ये पांच पुत्र) हुए
नर आत्मजः तु	नरका पुत्र तो
संकृतिः	संकृति हुआ ॥१॥

गुरुश्च रन्तिदेवश्च सङ्कृतेः पाण्डुनन्दन ।
रन्तिदेवस्य हि यश इहामुत्र च गीयते ॥२॥

गुरुः च रन्तिदेवः च सङ्कृतेः पाण्डुनन्दन रन्तिदेवस्य हि यशः इह अमुत्र च गीयते ॥२॥

पाण्डु-नन्दन	पाण्डुवंशके कुमार !
गुरुः च	गुरु और
रन्तिदेवः च	रन्तिदेव भी
सङ्कृतेः	संकृतिके पुत्र थे,
रन्तिदेवस्य हि	रन्तिदेवका तो
यशः	यश
इह	इस लोक
अमुत्र च	और स्वर्ग में भी
गीयते	वर्णन होता है ॥२॥

वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षतः ।
निष्किञ्चनस्य धीरस्य सकुटुम्बस्य सीदतः ॥३॥

वियत् वित्तस्य ददतः लब्धं लब्धं बुभुक्षतः निष्किञ्चनस्य धीरस्य सकुटुम्बस्य सीदतः ॥३॥

वियत्	आकाश-	बुभुक्षतः	भूखे
वित्तस्य	वृत्ति (बिना उद्योग किये प्रारब्ध प्राप्त)	निष्किञ्चनस्य	निष्किञ्चन,
		धीरस्य	धैर्यशाली,
लब्धं लब्धं	बार-बार मिलेको भी	सकुटुम्बस्य	कुटुम्बके साथ
ददतः	दान कर देनेसे	सीदतः	कष्ट पाते हुए ॥३॥

व्यतीयुरष्टचत्वारिंशदहान्यपिवतः किल ।
घृतपायससंयावं तोयं प्रातरुपस्थितम् ॥४॥

व्यतीयुः अष्टचत्वारिंशत् अहानि अपिवतः किल घृत पायस संयावं तोयं प्रातः उपस्थितम् ॥४॥

किल अपिवतः	अहो जल पिये बिना	घृत पायस	घी, खीर,
अष्टचत्वारिंशत्	अड़तालिस	संयावं तोयं	लप्सी और जल
अहानि व्यतीयुः	दिन बीत गये, तब	उपस्थितं	आया ॥४॥
प्रातः	सबेरे (उनके पास)		

कृच्छ्रप्राप्तकुटुम्बस्य क्षुत्तृड्भ्यां जातवेपथोः ।
अतिथिर्ब्राह्मणः काले भोक्तुकामस्य चागमत् ॥५॥

कृच्छ्र प्राप्त कुटुम्बस्य क्षुत् तृट्भ्यां जातवेपथोः अतिथिः ब्राह्मणः काले भोक्तुकामस्य च आगमत् ॥५॥

कृच्छ्र प्राप्त	कष्टमें पड़े,	कामस्य	इच्छा करनेके
क्षुत् तृट्भ्यां	भूख, प्याससे	काले च	समय ही
जातवेपथोः	काँपते हुए	ब्राह्मणः	ब्राह्मण
कुटुम्बस्य	कुटुम्बके	अतिथिः	अतिथि
भोक्तु	भोजन करनेकी	आगमत्	आ गया ॥५॥

तस्मै संव्यभजत् सोऽन्नमादृत्य श्रद्धयान्वितः ।
हरिं सर्वत्र संपश्यन् स भुक्त्वा प्रययौ द्विजः ॥६॥

तस्मै संव्यभजत् सः अन्नं आहृत्य श्रद्धया अन्वितः हरिं सर्वत्र सम्पश्यन् स भुक्त्वा प्रययौ द्विजः ॥६॥

सः सर्वत्र	उन्होंने सर्वत्र	संव्यभजत्	कुछ बांटकर दिया
हरिं	श्रीहरिको	भुक्त्वा	उसे खाकर
सम्पश्यन्	ठीक-ठीक देखते हुए	स द्विजः	वह ब्राह्मण
श्रद्धया अन्वितः	श्रद्धापूर्वक	प्रययौ	चला गया ॥६॥
तस्मै अन्नं	उसे भोजन		

अथान्यो भोक्ष्यमाणस्य विभक्तस्य महीपते ।
विभक्तं व्यभजत् तस्मै वृषलाय हरिं स्मरन् ॥७॥

अथ अन्यः भोक्षमाणस्य विभक्तस्य महीपते विभक्तं व्यभजत् तस्मै वृषलाय हरिं स्मरन् ॥७॥

महीपते	राजन् !	अन्यः	दूसरा आ गया
विभक्तम्	(परस्पर) बांटे हुए को	हरिं	श्रीहरिका
भोक्षमाणस्य	भोजन करनेको उद्यत	स्मरन्	स्मरण करते हुए
अथ	के पास फिर	तस्मै वृषलाय	उस शूद्रको भी
		व्यभजत्	बाँट दिया ॥७॥

याते शूद्रे तमन्योऽगादतिथिः श्वभिरावृतः ।
राजन् मे दीयतामन्नं सगणाय बुभुक्षते ॥८॥

याते शूद्रे तं अन्यः अगात् अतिथि. श्वभिः आवृतः राजन् मे दीयतां अन्नं सगणाय बुभुक्षिते ॥८॥

शूद्रे याते	शूद्रके चले जानेपर	राजन्	'राजन् !
श्वभिः आवृतः	कुत्तोंसे घिरा	सगणाय	इन गणोंके साथ
अन्यः अतिथिः	दूसरा अतिथि	बुभुक्षिते मे	भूखे मुझे
तं अगात्	उनके पास आकर बोला	अन्नं दीयतां	भोजन दीजिये' ॥८॥

स आदृत्यावशिष्टं यद् बहुमानपुरस्कृतम् ।
तच्च दत्त्वा नमश्चक्रे श्वभ्यः श्वपतये विभुः ॥९॥

स आदृत्य अवशिष्टं यत् बहुमान पुरस्कृतं तत् च दत्त्वा नमः चक्रे श्वभ्यः श्वपतये विभुः ॥९॥

स विभुः	वे समर्थ (रन्तिदेव)	तत् च दत्त्वा	उसे भी देकर
आदृत्य	आदर करके	श्वभ्यः	कुत्तों और
बहुमान	बहुत	श्वपतये	उनके स्वामीको
पुरस्कृतं	सम्मान सहित	नमः चक्रे	नमस्कार कर लिया
यत् अवशिष्टं	जो कुछ बचा था		॥९॥

पानीयमात्रमुच्छेषं तच्चैकपरितर्पणम् ।
पास्यतः पुल्कसोऽभ्यागादपो देह्यशुभस्य मे ॥१०॥

पानीय मात्रं उच्छेषं तत् च एक परितर्पणं पास्यतः पुल्कसः अभि अगात् अपः देहि अशुभस्य मे ॥१०॥

पानीय मात्रं	अब केवल जल	पुल्कसः	कसाई
उच्छेषं	बच रहा	अभि अगात्	सामने आ गया
तत् च	वह भी	मे अशुभस्य	(बोला) मुझ नीचको
एक परितर्पणं	एकको ही तृप्त करने योग्य था	अपः देहि	जल दीजिये !' ॥१०॥
पास्यतः	उसे पीनेके समय		

तस्य तां करुणां वाचं निशम्य विपुलश्रमाम् ।
कृपया भृशसन्तप्त इदमाहामृतं वचः ॥११॥

तस्य तां करुणां वाचं निशम्य विपुल श्रमां कृपया भृशसंतप्तः इदं आह अमृतं वचः ॥११॥

तस्य तां	उसकी वह	विपुल श्रमां	बहुत श्रमसे बोली गयी
करुणां	दीनतापूर्ण		

वाचं निशम्य	वाणी सुनकर	इदं	यह
कृपया	कृपासे	अमृतं वचः	अमृतमय वाणी
भृशसंतप्तः	अत्यन्त संतप्त होकर	आह	बोले ॥११॥

न कामयेऽहं गतिमीश्वरात् परा-
मष्टर्द्धियुक्तामपुनर्भवं वा ।
आर्तिं प्रपद्येऽखिलदेहभाजा-
मन्तःस्थितो येन भवन्त्यदुःखाः ॥१२॥

न कामये अहं गतिं ईश्वरात् परां अष्ट ऋद्धि युक्तां अपुनर्भवं वा आर्तिं प्रपद्ये अखिल देहभाजां अन्तः स्थितः येन भवन्ति अदुःखाः ॥१२॥

ईश्वरात्	परमेश्वरसे	अखिल	सब
अहं	मैं	देहभाजां	शरीर धारियोंके
अष्ट ऋद्धि	आठो ऐश्वर्योंसे	अन्तः स्थितः	अन्तः करणमें रहकर
युक्तां	युक्त	आर्तिं प्रपद्ये	उनका क्लेश मैं पाता रहूँ
परां गतिं	परमगति		
वा अपुनर्भवं	अथवा मोक्ष	येन अदुःखाः	जिससे वे दुःखहीन
न कामये	नहीं चाहता,	भवन्ति	हो जायँ ॥१२॥

क्षुत्तृट्श्रमो गात्रपरिश्रमश्च
दैन्यं क्लमः शोकविषादमोहाः ।
सर्वे निवृत्ताः कृपणस्य जन्तो-
र्जिजीविषोर्जीवजलार्पणान्मे ॥१३॥

क्षुत् तृट् श्रमः गात्र परिश्रमः च दैन्यं क्लमः शोक विषाद मोहाः सर्वे निवृत्ताः कृपणस्य जन्तोः जिजीविषोः जीव जल अर्पणात् मे ॥१३॥

जिजीविषोः	जीवनकी इच्छावाले	मे क्षुत् तृट्	मेरी भूख-प्यास,
जीव	इस प्राणीको	श्रमः गात्र	श्रम, शारीरिक
जल अर्पणात्	जल दे देनेसे	परिश्रमः	शिथिलता,

च दैन्यं क्लमः	तथा दीनता, ग्लानि,	मोहाः सर्वे	मोहादि सब
शोक विषाद	शोक, विषाद,	निवृत्ताः	दूर हो गये हैं ॥१३॥

इति प्रभाष्य पानीयं म्रियमाणः पिपासया ।
पुल्कसायाददाद्धीरो निसर्गकरुणो नृपः ॥१४॥

इति प्रभाष्य पानीयं म्रियमाणः पिपासया पुल्कसाय अददात् धीरः निसर्गकरुणः नृपः ॥१४॥

इति प्रभाष्य	ऐसा कहकर	नृपः	राजा (रन्तिदेव) ने
पिपासया	प्याससे	पुल्कसाय	कसाईको
म्रियमाणः	(स्वयं) मरणासन्न	पानीयं अददात्	वह जल दे दिया ॥१४॥
धीरः	धैर्यवान्		
निसर्गकरुणः	स्वभावसे दयालु		

तस्य त्रिभुवनाधीशाः फलदाः फलमिच्छताम् ।
आत्मानं दर्शयाञ्चक्रुर्माया विष्णुविनिर्मिताः ॥१५॥

तस्य त्रिभुवन अधीशाः फलदाः फलं इच्छतां आत्मानं दर्शयान् चक्रुः माया विष्णु विनिर्मिताः ॥१५॥

विष्णु विनिर्मिताः	भगवान् विष्णु द्वारा उत्पन्न	फलदाः	फल देनेवाले
माया	मायासे (वे शूद्र चाण्डालादि रूप) दिखाकर	त्रिभुवन अधीशाः	त्रिलोकीके अधीश्वर (ब्रह्मा, विष्णु, शिव) ने
फलं इच्छतां	फल चाहनेवालोंको	तस्य आत्मानं दर्शयान् चक्रुः	उनको अपनेको दिखलाया ॥१५॥

स वै तेभ्यो नमस्कृत्य निःसङ्गो विगत स्पृहः ।
वासुदेवे भगवति भक्त्या चक्रे मनः परम् ॥१६॥

स वै तेभ्यः नमः कृत्य निःसंगः विगत स्पृहः वासुदेवे भगवति भक्त्या चक्रे मनः परम् ॥१६॥

निःसङ्गः	अनासक्त,	कृत्य	करके
विगत स्पृहः	लालसारहित	भगवति परं	भगवान् परमपुरुष
वै स	निश्चय उस (रन्ति देव) ने	वासुदेवे	वासुदेवमें
		भक्त्या	भक्ति द्वारा
तेभ्यः नमः	उनको नमस्कार	मनः चक्रे	मन लगाया ॥१६॥

ईश्वरालम्बनं चित्तं कुर्वतोऽनन्यराधसः ।
माया गुणमयी राजन् स्वप्नवत् प्रत्यलीयत ॥१७॥

ईश्वर आलम्बनं चित्तं कुर्वतः अनन्य राधसः माया गुणमयी राजन् स्वप्नवत् प्रत्यलीयत ॥१७॥

राजन्	राजन् !	कुर्वतः	लगानेपर
अनन्य	अनन्य भावसे	गुणमयी माया	त्रिगुणमयी माया
ईश्वर	ईश्वरका	स्वप्नवत्	स्वप्नके समान
आलम्बनं	सहारा लेकर	प्रत्यलीयत	विलीन हो गयी ॥१७॥
चित्तं राधसः	चित्तको आराधनामें		

तत्प्रसङ्गानुभावेन रन्तिदेवानुवर्तिनः ।
अभवन् योगिनः सर्वे नारायणपरायणाः ॥१८॥

तत् प्रसंग अनुभावेन रन्तिदेव अनुवर्तिनः अभवन् योगिनः सर्वे नारायण परायणाः ॥१८॥

तत् प्रसंग	उनके सत्संगके	सर्वे	सब
अनुभावेन	प्रभावसे	नारायण	नारायण
रन्तिदेव	रन्तिदेवके	परायणाः	परायण
अनुवर्तिनः	अनुयायी	योगिनः अभवन्	योगी हो गये ॥१८॥

गर्गाच्छिनिस्ततो गार्ग्यः क्षत्राद् ब्रह्म ह्यवर्तत ।
दुरितक्षयो महावीर्यात् तस्य त्रय्यारुणिः कविः ॥१९॥

गर्गात् शिनिः ततः गार्ग्यः क्षत्रात् ब्रह्म ह्यवर्तत दुरितक्षयः महावीर्यात् तस्य त्रय्यारुणिः कविः ॥१९॥

गर्गात् शिनिः	(मन्यु पुत्र) गर्गसे शिनि	महावीर्यात्	महावीर्यसे
		दुरितक्षयः	दुरितक्षय,
ततः गार्ग्यः	उससे गार्ग्य हुआ	तस्य	उसके
क्षत्रात्	इस क्षत्रियसे	त्रय्यारुणिः	त्रय्यारुणि,
ब्रह्म	ब्राह्मण वंश	कविः	कवि और ॥१९॥
ह्यवर्तत	चला,		

पुष्करारुणिरित्यत्र ये ब्राह्मणगतिं गताः ।
बृहत्क्षत्रस्य पुत्रोऽभूद्धस्ती यद्धस्तिनापुरम् ॥२०॥

पुष्करारुणिः इतित्रय ये ब्राह्मण गतिं गताः बृहत् क्षत्रस्य पुत्रः अभूत् हस्ती यत् हस्तिनापुरम् ॥२०॥

पुष्करारुणिः	पुष्करारुणि	पुत्रः अभूत	पुत्र हुआ
इतित्रय	ये तीन पुत्र हुए	हस्ती यत्	हस्ती जिसने
ये ब्राह्मण	जो ब्राह्मण	हस्तिनापुरं	हस्तिनापुर बसाया ॥२०॥
गतिं गताः	स्वरूपको प्राप्त हुए,		
बृहत्क्षत्रस्य	बृहत्क्षत्रका		

अजमीढो द्विमीढश्च पुरुमीढश्च हस्तिनः ।
अजमीढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः ॥२१॥

अजमीढः द्विमीढः च पुरुमीढः च हस्तिनः अजमीढस्य वंश्याः स्युः प्रियमेध आदयः द्विजाः ॥२१॥

हस्तिनः	हस्तिके	अजमीढस्य	अजमीढके
अजमीढः च	अजमीढ तथा	प्रियमेध आदयः	प्रियमेध आदि
द्विमीढः च	द्विमीढ एवं	द्विजाः	ब्राह्मण
पुरुमीढः	पुरुमीढ हुए	वंश्याः स्युः	वंशधर हुए ॥२१॥

अजमीढाद् बृहदिषुस्तस्य पुत्रो बृहद्धनुः ।
बृहत्कायस्ततस्तस्य पुत्र आसीज्जयद्रथः ॥२२॥

अजमीढात् बृहत्इषुः तस्य पुत्रः बृहत्हनुः वृहत्कायः ततः तस्य पुत्र आसीत् जयद्रथः ॥२२॥

अजमीढात्	अजमीढसे	ततः बृहतकायः	उससे वृहत्काय
बृहत्इषु	बृहत्इषु,	तस्य पुत्र	उसका पुत्र
तस्य पुत्रः	उसका पुत्र	जयद्रथः	जयद्रथ
बृहत्हनुः	वृहत्हनु,	आसीत्	हुआ ॥२२॥

तत्सुतो विशदस्तस्य सेनजित् समजायत ।
रुचिराश्वो दृढहनुः काश्यो वत्सश्च तत्सुताः ॥२३॥

तत् सुतः विशदः तस्य सेनजित् समजायत रुचिराश्वः दृढहनुः काश्यः वत्सः च तत् सुताः ॥२३॥

तत् सुतः	उसका पुत्र	दृढहनुः	दृढहनु,
विशदः तस्य	विशद, उसका	काश्यः च	काश्य और
सेनजित्	सेनजित्	वत्सः	वत्स
समजायत	उत्पन्न हुआ,	तत् सुताः	उसके (चार) पुत्र
रुचिराश्वः	रुचिराश्व,		हुए ॥२३॥

रुचिराश्वसुतः पारः पृथुसेनस्तदात्मजः ।
पारस्य तनयो नीपस्तस्य पुत्रशतं त्वभूत् ॥२४॥

रुचिराश्व सुतः पारः पृथुसेनः तत् आत्मजः पारस्य तनयः नीपः तस्य पुत्रशतं तु अभूत् ॥२४॥

रुचिराश्व	रुचिराश्वका	पारस्य तनयः	पारका (दूसरे) पुत्र
सुतः	पुत्र	नीपः	नीप हुआ
पारः	पार था,	तस्य तु	उसके तो
तत् आत्मजः	उसका पुत्र	पुत्रशतं अभूत्	सौ पुत्र हुए ॥२४॥
पृथुसेनः	पृथुसेन हुआ		

स कृत्व्यां शुककन्यायां ब्रह्मदत्तमजीजनत् ।
स योगी गवि भार्यायां विष्वक्सेनमधात् सुतम् ॥२५॥

स कृत्व्यां शुककन्यायां ब्रह्मदत्तं अजीजनत् स योगी गवि भार्यायां विष्वक्सेनं अधात् सुतम् ॥२५॥

स	उस (नीप) ने	योगी	योगी था
शुककन्यायां	शुककी पुत्री*	गवि भार्यायां	उसने अपनी भार्या सरस्वतीसे
कृत्व्यां	कृत्वीसे		
ब्रह्मदत्तं	ब्रह्मदत्तको	विष्वक्सेनं	विष्वक्सेन
अजीजनत्	उत्पन्न किया	सुतं अधात्	पुत्र उत्पन्न किया ॥२५॥
स	वह (ब्रह्मदत्त)		

जैगीषव्योपदेशेन योगतन्त्रं चकार ह ।
उदक्स्वनस्ततस्तस्माद् भल्लादो बार्हदीषवाः ॥२६॥

जैगीषव्य उपदेशेन योगतन्त्रं चकार ह उदक्स्वनः ततः तस्मात् भल्लादः बार्हदीषवाः ॥२६॥

जैगीषव्य	मुनि जैगीषव्यके	उदक्स्वनः	उदक्स्वन,
उपदेशेन	उपदेशसे	तस्मात्	उससे
योगतन्त्र	योगशास्त्रकी	भल्लादः	भल्लाद
ह चकार	निश्चित रचना की,	बार्हदीषवाः	ये सब बृहदिषुके वंशज हुए ॥२६॥
ततः	उससे		

यवीनरो द्विमीढस्य कृतिमांस्तत्सुतः स्मृतः ।
नाम्ना सत्यधृतिर्यस्य दृढनेमिः सुपार्श्वकृत् ॥२७॥

यवीनरः द्विमीढस्य कृतिमान् तत् सुतः स्मृतः नाम्ना सत्यधृतिः यस्य दृढनेमिः सुपार्श्व कृत् ॥२७॥

द्विमीढस्य	द्विमीढका	कृतिमान्	कृतिमान्
यवीनरः	यवीनर	स्मृतः	कहा गया है,
तत् सुतः	उसका पुत्र	यस्य	जिसका

* शुकदेवजीने वन जाते समय पिता व्यासजीको व्याकुल देखकर अपनी एक छाया मूर्ति उनके पास छोड़ दी। वे छाया शुक ही गृहस्थ हुए।

सत्य धृतिः	सत्य धृति	सुपार्श्व	सुपार्श्वका
नाम्ना	नामक (पुत्र) हुआ,	कृत्	जन्म दाता हुआ
दृढनेमिः	(उसका) दृढनेमि		॥२७॥

सुपार्श्वात् सुमतिस्तस्य पुत्रः सन्नतिमांस्ततः ।
कृतिर्हिरण्यनाभाद् यो योगं प्राप्य जगौ स्म षट् ॥२८॥

सुपार्श्वात् सुमतिः तस्य पुत्रः सन्नतिमान् ततः कृतिः हिरण्यनाभात् यः योगं प्राप्य जगौ स्म षट् ॥२८॥

सुपार्श्वात्	सुपार्श्वसे	हिरण्यनाभात्	हिरण्यनाभसे
सुमतिः	सुमति,	योगं प्राप्य	योग-विद्या प्राप्त करके
तस्य पुत्रः	उसका पुत्र		
सन्नतिमान्	सन्नतिमान्	षट् जगौ स्म	छ (संहिताएँ) कही थीं ॥२८॥
ततः कृतिः	उससे कृति हुआ		
यः	जिसने		

संहिता प्राच्यसाम्नां वै नीपो ह्युग्रायुधस्ततः ।
तस्य क्षेम्यः सुवीरोऽथ सुवीरस्य रिपुञ्जयः ॥२९॥

संहिता प्राच्य साम्नां वै नीपः हि उग्रायुधः ततः तस्य क्षेम्यः सुवीरः अथ सुवीरस्य रिपुञ्जयः ॥२९॥

वै	निश्चित ही	क्षेम्यः	क्षेम्य
प्राच्य साम्नां	प्राच्य सामकी	अथ सुवीरः	फिर (उससे) सुवीर
संहिताएँ	संहिताएँ,	सुवीरस्य	सुवीरका
नीपः हि	नीपका ही पुत्र	रिपुञ्जयः	रिपुञ्जय हुआ
उग्रायुधः	उग्रायुध हुआ,		॥२९॥
ततः तस्य	फिर उसका		

ततो बहुरथो नाम पुरमीढोऽप्रजोऽभवत् ।
नलिन्यामजमीढस्य नीलः शान्तिः सुतस्ततः ॥३०॥

ततः बहुरथः नाम पुरमीढः अप्रजः अभवत् नलिन्यां अजमीढस्य नीलः शान्तिः सुतः ततः ॥३०॥

ततः बहुरथः	उससे बहुरथ
नाम	नामक पुत्र हुआ
पुरमीढः	पुरमीढ
अप्रजः अभवत्	निःसन्तान हो गया,
अजमीढस्य	अजमीढके
नलिन्यां	नलिनी (नामक पत्नी) से
नीलः ततः	नील, उससे
सुतः	उसका पुत्र
शान्तिः	शान्ति हुआ ॥३०॥

शान्तेः सुशान्तिस्तत्पुत्रः पुरुजोऽर्कस्ततोऽभवत् ।
भर्म्याश्वस्तनयस्तस्य पञ्चासन्मुद्गलादयः ॥३१॥

शान्तेः सुशान्तिः तत् पुत्रः पुरुजः अर्कः ततः अभवत् भर्म्याश्वः तनयः तस्य पञ्च आसन् मुद्गल आदयः ॥३१॥

शान्तेः	शान्तिका
सुशान्तिः	सुशान्ति
तत् पुत्रः	उसका पुत्र
पुरुजः	पुरुज
ततः अर्कः	उससे अर्क
अभवत्	हुआ,
तनयः	उसका पुत्र
भर्म्याश्वः	भर्म्याश्व
तस्य	उससे
मुद्गल आदयः	मुद्गल आदि
पञ्च आसन्	पांच पुत्र थे ॥३१॥

यवीनरो बृहदिषुः काम्पिल्यः संजयः सुताः ।
भर्म्याश्वः प्राह पुत्रा मे पञ्चानां रक्षणाय हि ॥३२॥

यवीनरः बृहदिषुः काम्पिल्यः सञ्जयः सुताः भर्म्याश्वः प्राह पुत्रा मे पञ्चानां रक्षणाय हि ॥३२॥

यवीनरः	यवीनर,
बृहदिषुः	बृहदिषु
काम्पिल्यः	काम्पिल्य और
सञ्जयः	सञ्जय
सुताः	ये (पांच) पुत्र थे,
भर्म्याश्वः प्राह	भर्म्याश्वने कहा
हि	'क्योंकि
पञ्चानां	पांचों (प्रदेशों) की
रक्षणाय	रक्षाके लिए
मे पुत्रा	मेरे पुत्र ॥३२॥

विषयाणामलमिमे इति पञ्चालसंज्ञिताः ।
मुद्गलाद्‌न ब्रह्म निर्वृत्तं गोत्रं मौद्गल्यसंज्ञितम् ॥३३॥

विषयाणां अलं इमे इति पञ्चाल संज्ञिताः मुद्गलात् ब्रह्म निर्वृत्तं गोत्रं मौद्गल्य संज्ञितम् ॥३३॥

इमे	ये	मुद्गलात्	(उनमें) मुद्गलसे
विषयाणां	प्रदेशोंके लिए	मौद्गल्य	मौद्गल्य
अलं	पर्याप्त हैं'	संज्ञितं	नामक
इति	इस प्रकार वे	गोत्रं ब्रह्म	गोत्रके ब्राह्मणोंकी
पञ्चाल	पञ्चाल	निर्वृत्तं	प्रवृत्ति हुई ॥३३॥
संज्ञिताः	कहे गये'		

मिथुनं मुद्गलाद् भार्म्याद् दिवोदासः पुमानभूत् ।
अहल्या कन्यका यस्यां शतानन्दस्तु गौतमात् ॥३४॥

मिथुनं मुद्गलात् भार्म्यात् दिवोदासः पुमान् अभूत् अहल्या कन्यका यस्यां शतानन्दः तु गौतमात् ॥३४॥

भार्म्यात्	भर्म्याश्वके पुत्र	कन्यका	कन्या
मुद्गलात्	मुद्गलसे	अहल्या	अहल्या थी,
मिथुनं	एक जोड़ा जुड़वां	यस्यां	जिसमें
अभूत्	उत्पन्न हुआ	गौतमात्	महर्षि गौतमसे
पुमान्	उसमें पुत्र	शतानन्दः तु	शतानन्द उत्पन्न
दिवोदासः	दिवोदास और		हुए ॥३४॥

तस्य सत्यधृतिः पुत्रो धनुर्वेदविशारदः ।
शरद्वांस्तत्सुतो यस्मादुर्वशीदर्शनात् किल ॥३५॥

तस्य सत्यधृतिः पुत्रः धनुर्वेद विशारदः शरद्वान् तत् सुतः यस्मात् उर्वशी दर्शनात् किल ॥३५॥

तस्य	उस (दिवोदास) का	धनुर्वेद	धनुर्वेदका
पुत्रः	पुत्र	विशारदः	विद्वान था,
सत्यधृतिः	सत्यधृति	तत् सुतः	उसका पुत्र

शरद्वान्	शरद्वान हुआ	दर्शनात्	देखनेसे
किल उर्वशी	अहो, ऊर्वशीको	यस्मात्	जिससे ॥३५॥

शरस्तम्बेऽपतद् रेतो मिथुनं तदभूच्छुभम् ।
तद् दृष्ट्वा कृपयागृह्णाच्छन्तनुर्मृगयां चरन् ।
कृपः कुमारः कन्या च द्रोणपत्न्यभवत् कृपी ॥३६॥

शरस्तम्बे अपतत् रेतः मिथुनं तत् अभूत् शुभं तत् दृष्ट्वा कृपया गृह्णात् शन्तनुः मृगयां चरन् कृपः कुमारः कन्या च द्रोणपत्नि अभवत् कृपी ॥३६॥

शरस्तम्बे	कांसके झुरमुटमें	तत् दृष्ट्वा	उसे देखकर
अपतत् रेतः	वीर्य-स्खलित होनेसे	कृपया गृह्णात्	कृपावश ले आये,
तत् शुभं	उससे शुभ लक्षण वाला	कुमारः	उसमें जो बालक था
		कृपः	वह कृपाचार्य
मिथुनं अभूत्	एक जोड़ा उत्पन्न हुआ	कन्या	और जो कन्या थी वह
मृगयां चरन्	आखेट करते घूमते हुए	कृपी द्रोणपत्नि	कृपी द्रोणाचार्यकी पत्नी
शन्तनुः	महाराज शन्तनु	अभवत्	हुई ॥३६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे एकविंशोऽध्यायः ॥२१॥

अथ द्वाविंशोऽध्यायः

श्रीशुक उवाच

मित्रेयुश्च दिवोदासाच्च्यवनस्तत्सुतो नृप ।
सुदासः सहदेवोऽथ सोमको जन्तुजन्मकृत् ॥१॥

मित्रेयुः च दिवोदासात् च्यवनः तत् सुतः नृप सुदासः सहदेवः अथ सोमकः जन्तु जन्मकृत् ॥१॥

नृप	राजन् !	सहदेवः अथ	सहदेव तथा
दिवोदासात्	दिवोदाससे	जन्तु जन्मकृत्	जन्तुको जन्म देने-
मित्रेयुः	मित्रेयु		वाला
च तत् सुतः	और उसके पुत्र	सोमकः	सोमक हुआ ॥१॥
च्यवनः सुदासः	च्यवन, सुदास		

तस्य पुत्रशतं तेषां यवीयान् पृषतः सुतः ।
द्रुपदो द्रौपदी तस्य धृष्टद्युम्नादयः सुताः ॥२॥

तस्य पुत्रशतं तेषां यवीयान् पृषतः सुतः द्रुपदः द्रौपदी तस्य धृष्टद्युम्न आदयः सुताः ॥२॥

तस्य	उस (सोमक) के	तस्य द्रौपदी	उनकी पुत्री द्रौपदी
पुत्रशतं	सौ पुत्र थे,		और
तेषां यवीयान्	उनमें सबसे छोटे	सुताः	पुत्र
पृषतः सुत	पृषतका पुत्र	धृष्टद्युम्न	धृष्टद्युम्न
द्रुपदः	द्रुपद हुए	आदयः	आदि हुए ॥२॥

धृष्टद्युम्नाद् धृष्टकेतुर्भार्म्याः पञ्चालका इमे ।
योऽजमीढसुतो ह्यन्य ऋक्षः संवरणस्ततः ॥३॥

धृष्टद्युम्नात् धृष्टकेतुः भार्म्याः पञ्चालका इमे यः अजमीढ सुतः हि अन्य ऋक्षः संवरणः ततः ॥३॥

धृष्टद्युम्नात्	धृष्टद्युम्नसे	हि यः अन्य	फिर जो दूसरा
धृष्टकेतुः	धृष्टकेतु उत्पन्न हुआ	अजमीढ	अजमीढका
भार्म्याः इमे	भर्म्यके वंशमें ये	सुतः ऋक्षः	पुत्र ऋक्ष था
पञ्चालका	पञ्चाल (कहलाते) हैं,	ततः संवरणः	उससे संवरण हुआ ॥३॥

तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः ।
परीक्षित् सुधनुर्जह्नुर्निषधाश्वः कुरोः सुताः ॥४॥

तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः परीक्षित् सुधनुः जह्नुः निषधाश्वः कुरोः सुताः ॥४॥

सूर्यकन्यायां	सूर्य-पुत्री	परीक्षित्	परीक्षित,
तपत्यां	तपतीसे	सुधनुः	सुधनु,
कुरुक्षेत्रपतिः	कुरुक्षेत्रके स्वामी	जह्नुः	जह्नु और
कुरुः	कुरु हुए	निषधाश्वः	निषधाश्व हुए ॥४॥
कुरोः सुताः	कुरुके पुत्र		

सुहोत्रोऽभूत् सुधनुषश्च्यवनोऽथ ततः कृती ।
वसुस्तस्योपरिचरो बृहद्रथमुखास्ततः ॥५॥

सुहोत्रः अभूत् सुधनुषः च्यवनः अथ ततः कृती वसुः तस्य उपरिचरः बृहद्रथ मुखाः ततः ॥५॥

सुधनुषः	सुधनुसे	तस्य	उसके
सुहोत्रः अभूत्	सुहोत्र हुआ,	उपरिचर वसुः	उपरिचर वसु
अथ च्यवनः	फिर उससे च्यवन	ततः बृहद्रथ	उससे बृहद्रथ
ततः कृती	उससे कृती	मुखाः	प्रमुख हुए ॥५॥

कुशाम्बमत्स्यप्रत्यग्रचेदिपाद्याश्च चेदिपाः ।
बृहद्रथात् कुशाग्रोऽभूदृषभस्तस्य तत्सुतः ॥६॥

कुशाम्ब मत्स्य प्रत्यग्र चेदिप आद्याः च चेदिपाः बृहद्रथात् कुशाग्रः अभूत् ऋषभः तस्य तत् सुतः ॥६॥

चेदिपाः	वे चेदि नरेश
कुशाम्ब मत्स्य	कुशाम्ब, मत्स्य,
प्रत्यग्र च चेदिप	प्रत्यग्र और चेदिप
आद्याः	आदि थे
बृहद्रथात्	बृहद्रथसे
कुशाग्रः अभूत्	कुशाग्र हुआ,
तस्य ऋषभः	उसका ऋषभ,
तत् सुतः	उसका पुत्र ॥६॥

जज्ञे सत्यहितोऽपत्यं पुष्पवांस्तत्सुतो जहुः ।
अन्यस्यां चापि भार्यायां शकले द्वे बृहद्रथात् ॥७॥

जज्ञे सत्यहितः अपत्यं पुष्पवान् तत् सुतः जहुः अन्यस्यां च अपि भार्यायां शकले द्वे बृहद्रथात् ॥७॥

सत्यहितः	सत्यहित
जज्ञे	उत्पन्न हुआ,
अपत्यं	उसका पुत्र
पुष्पवान्	पुष्पवान्
तत् सुतः	उसका पुत्र
जहुः	जहु हुआ
बृहद्रथात्	बृहद्रथसे
अन्यस्यां	दूसरी
भार्यायां अपि	पत्नीसे भी
शकले द्वे	दो टुकड़े उत्पन्न हुए ॥७॥

ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धिते ।
जीव जीवेति क्रीडन्त्या जरासन्धोऽभवत् सुतः ॥८॥

ते मात्रा बहिः उत्सृष्टे जरया च अभिसन्धिते जीव जीव इति क्रीडन्त्या जरासन्धः अभवत् सुतः ॥८॥

ते मात्रा	वे (टुकड़े) माता द्वारा
बहिः उत्सृष्टे	बाहर फेंक देनेपर
जरया च	जरा नामक राक्षसी द्वारा
अभिसन्धिते	जोड़कर
जीव जीव	'जीजा जीवित हो जा !'
इति	इस प्रकार कहकर
क्रीडन्त्या	खेलती हुई से
सुतः	(जीवित होकर) पुत्र
जरासन्धः	जरासन्ध
अभवत्	हो गया ॥८॥

ततश्च सहदेवोऽभूत् सोमापिर्यत्श्रुतश्रवाः ।
परीक्षिदनपत्योऽभूत् सुरथो नाम जाह्नवः ॥९॥

ततः च सहदेवः अभूत् सोमापिः यत् श्रुतश्रवाः परीक्षित् अनपत्यः अभूत् सुरथः नाम जाह्नवः ॥९॥

ततः	उससे	परीक्षित्	(कुरुका पुत्र) परीक्षित
सहदेवः	सहदेव		
अभूत् च	हुआ और	अनपत्यः	सन्तानहीन
सोमापिः	उससे सोमापि	अभूत्	हुआ,
यत्	जिससे	जाह्नवः	जह्नुका पुत्र
श्रुतश्रवाः	श्रुतश्रवा हुआ,	सुरथः नाम	सुरथ नामक हुआ ॥९॥

ततो विदूरथस्तस्मात् सार्वभौमस्ततोऽभवत् ।
जयसेनस्तत्तनयो राधिकोऽतोयुतो ह्यभूत् ॥१०॥

ततः विदूरथः तस्मात् सार्वभौमः ततः अभवत् जयसेनः तत् तनयः राधिकः अतः अयुतः हि अभूत् ॥१०॥

ततः विदूरथः	उससे विदूरथ	अभवत्	हुआ,
तस्मात्	उससे	तत् तनयः	उसका पुत्र
सार्वभौमः	सार्वभौम	राधिकः	राधिक
ततः	उससे	अतः हि	इससे फिर
जयसेनः	जयसेन	अयुतः अभूत्	अयुत हुआ ॥१०॥

ततश्च क्रोधनस्तस्माद् देवातिथिरमुष्य च ।
ऋष्यस्तस्यदिलीपोऽभूत् प्रतीपस्तस्य चात्मजः ॥११॥

ततः च क्रोधनः तस्मात् देवातिथिः अमुष्य च ऋष्यः तस्य दिलीपः अभूत् प्रतीपः तस्य च आत्मजः ॥११॥

ततः च	उससे तो	तस्मात्	उससे
क्रोधनः	क्रोधन	देवातिथिः	देवातिथि

अमुष्य च	इसका भी	तस्य च	उसका भी
ऋष्यः तस्य	ऋष्य, उसका	आत्मजः	पुत्र
दिलीपः अभूत्	दिलीप हुआ	प्रतीपः	प्रतीप हुआ ॥११॥

देवापिः शन्तनुस्तस्य बाह्लीक इति चात्मजाः ।
पितृराज्यं परित्यज्य देवापिस्तु वनं गतः ॥१२॥

देवापिः शन्तनुः तस्य बाह्लीक इति च आत्मजाः पितृराज्यं परित्यज्य देवापिः तु वनं गतः ॥१२॥

तस्य च	उसके भी	देवापिः तु	(इनमें) देवापि तो
आत्मजाः	पुत्र	पितृराज्यं	पिताका राज्य
देवापिः शन्तनुः	देवापि, शन्तनु,	परित्यज्य	छोड़कर
बाह्लीक इति	और बाह्लीक ये हुए,	वनं गतः	वनमें चला गया ॥१२॥

अभवच्छन्तनू राजा पाङ्महाभिषसंज्ञितः ।
यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः ॥१३॥

अभवत् शन्तनू राजा प्राक् महाभिष संज्ञितः यं यं कराभ्यां स्पृशति जीर्णं यौवनं एति सः ॥१३॥

शन्तनू राजा	शन्तनु राजा	यं यं जीर्णं	वह जिस-जिस बूढ़े को
अभवत्	हुआ (जो)	कराभ्यां	हाथसे
प्राक्	पूर्वजन्ममें	स्पृशति	छू देता था
महाभिष	महाभिष	सः यौवनं	वह युवा
संज्ञितः	नामक था,	एति	हो जाता था ॥१३॥

शान्तिमाप्नोति चैवाग्र्यां कर्मणा तेन शन्तनुः ।
समा द्वादश तद्राज्ये न ववर्ष यदा विभुः ॥१४॥

शान्तिं आप्नोति च एव अग्र्यां कर्मणा तेन शन्तनुः समा द्वादश तत् राज्ये न ववर्ष यदा विभुः ॥१४॥

च एव अग्र्यां	तथा उसे परम
शान्तिं	शान्ति
आप्नोति	मिल जाती थी
तेन कर्मणा	इसी कर्मसे
शन्तनुः	(उसका नाम) शन्तनु पड़ा।
तत् राज्ये	उसके राज्यमें
द्वादश समा	बारह वर्ष तक
यदा विभुः	जब समर्थ इन्द्रने
ववर्ष न	वर्षा नहीं की ॥१४॥

शन्तनुर्ब्राह्मणैरुक्तः परिवेत्तायमग्रभुक्।
राज्यं देह्यग्रजायाशु पुरराष्ट्रविवृद्धये ॥१५॥

शन्तनुः ब्राह्मणैः उक्तः परिवेत्ता अयं अग्रभुक् राज्यं देहि अग्रजाय आशु पुरराष्ट्र विवृद्धये ॥१५॥

ब्राह्मणैः	ब्राह्मणों द्वारा
शन्तनुः उक्तः	शन्तनुसे कहा गया
अयं अग्रभुक्	'यह अग्रभोजी
परिवेत्ता	परिवेत्ता है* (अतः)
पुरराष्ट्र	नगर तथा राष्ट्रकी
विवृद्धये	वृद्धिके लिए
अग्रजाय	बड़े भाईको
आशु राज्यं	शीघ्र राज्य
देहि	दे दो' ॥१५॥

एवमुक्तो द्विजैर्ज्येष्ठं छन्दयामास सोऽब्रवीत्।
तन्मन्त्रिप्रहितैर्विप्रैर्वेदाद् विभ्रंशितो गिरा ॥१६॥

एवं उक्तः द्विजैः ज्येष्ठं छन्दयामास सः अब्रवीत् तत् मन्त्रि प्रहितैः विप्रैः वेदात् विभ्रंशितः गिरा ॥१६॥

द्विजैः एवं	ब्राह्मणोंके ऐसा
उक्तः	कहनेपर
ज्येष्ठं	बड़े भाईसे
छन्दयामास	(राज्य स्वीकार करनेकी) प्रार्थना की,
तत्	किन्तु उस (शन्तनु) के
मन्त्रि	मन्त्री द्वारा
प्रहितैः विप्रैः	भेजे गये ब्राह्मणोंने
गिरा	(अपनी) बातोंसे
वेदात्	वैदिक-मार्गसे
विभ्रंशितः	भ्रष्ट कर दिया (अतः)
सः अब्रवीत्	वह बोला ॥१६॥

* छोटा भाई यदि बड़े भाईसे पहिले विवाह कर ले तो उसे 'परिवेत्ता' कहते हैं। यह पाप माना जाता है।

वेदवादातिवादान् वै तदा देवो ववर्ष ह ।
देवापिर्योगमास्थाय कलापग्राममाश्रितः ॥१७॥

वेदवादात् अतिवादान् वै तदा देवः ववर्ष ह देवापिः योगं आस्थाय कलाप ग्रामं आश्रितः ॥१७॥

वै वेदवादात	निश्चय वेदवादको	देवापिः	देवापि
अतिवादन्	अतिवाद (असंगत बातें) हैं,	योगं	योग साधनमें
		आस्थाय	स्थित होकर
तदा देवः	तब इन्द्रदेवने (देवापिको राज्यका अधिकार न रहनेसे)	कलाप ग्रामं	कलाप ग्राममें*
		आश्रितः	(अब भी) रहते हैं ॥१७॥
ह ववर्ष	फिर वर्षा की ।		

सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति ।
बाह्लीकात् सोमदत्तोऽभूद् भूरिभूरिश्रवास्ततः ॥१८॥

सोमवंशे कलौ नष्टे कृत आदौ स्थापयिष्यति बाह्लीकात् सोमदत्तः अभूत् भूरि भूरिश्रवाः ततः ॥१८॥

कलौ सोमवंशे	कलियुगमें चन्द्रवंशके	सोमदत्तः	सोमदत्त
नष्टे	नष्ट हो जानेपर	अभूत्	हुआ
कृत आदौ	सतयुगके प्रारम्भमें ।	ततः भूरिः	उससे भूरि,
स्थापयिष्यति	स्थापित करेगा ।	भूरिश्रवाः	भूरिश्रवा ॥१८॥
बाह्लीकात्	बाह्लीकसे		

शलश्च शन्तनोरासीद् गङ्गायां भीष्म आत्मवान् ।
सर्वधर्मविदां श्रेष्ठो महाभागवतः कविः ॥१९॥

शलः च शन्तनोः आसीत् गङ्गायां भीष्म आत्मवान् सर्वधर्मविदां श्रेष्ठः महाभागवतः कविः ॥१९॥

---

* श्रीबद्रीनाथसे आगे माना गांवके आस-पास कहीं अदृश्य सिद्धोंका यह अदृश्य आवास है ।

च शलः	तथा शल (तीन पुत्र) हुए,
गंगायां	गंगासे
शन्तनोः	शन्तनुके
आत्मवान्	परमधीर
सर्वधर्मविदां श्रेष्ठः	सब धर्मज्ञोंमें श्रेष्ठ
महाभागवतः	परम भगवद् भक्त
कविः भीष्मः	विद्वान भीष्म हुए ॥१९॥

वीरयूथाग्रणीर्येन रामोऽपि युधि तोषितः ।
शन्तनोर्दाशकन्यायां जज्ञे चित्राङ्गदः सुतः ॥२०॥

वीरयूथ अग्रणीः येन रामः अपि युधि तोषितः शन्तनोः दाश कन्यायां जज्ञे चित्रांगदः सुतः ॥२०॥

वीरयूथ अग्रणीः	वीर-समूहोंके नेता थे,
येन युधि रामः अपि	जिन्होंने युद्धमें परशुरामको भी
तोषितः	सन्तुष्ट कर दिया
शन्तनोः	शन्तनुको
दाश कन्यायां	दाश (मछुए) की कन्यासे
चित्रांगदः	चित्रांगद नामक
सुतः जज्ञे	पुत्र उत्पन्न हुआ ॥२०॥

विचित्रवीर्यश्चावरजो नाम्ना चित्रांगदो हतः ।
यस्यां पराशरात् साक्षादवतीर्णो हरेः कला ॥२१॥

विचित्रवीर्यः च अवरजः नाम्ना चित्रांगदः हतः यस्यां पराशरात् साक्षात् अवतीर्णः हरेः कला ॥२१॥

च अवरजः	तथा उसका छोटा भाई
विचित्रवीर्य	विचित्रवीर्य था
चित्रांगदः	चित्रांगद
नाम्ना	अपने नामवाले (गन्धर्व) द्वारा
हतः	मारा गया ।
यस्यां	जिस (दाश कन्या सत्यवती) में
पराशरात्	पराशरजीसे
साक्षात् हरेः	साक्षात् श्रीहरिकी
कला अवतीर्णः	कलावतार रूप ॥२१॥

वेदगुप्तो मुनिः कृष्णो यतोऽहमिदमध्यगाम् ।
हित्वा स्वशिष्यान् पैलादीन् भगवान् बादरायणः ॥२२॥

वेदगुप्तः मुनिः कृष्णः यतः अहं इदं अध्यगां हित्वा स्वशिष्यान् पैल आदीन् भगवान् बादरायणः ॥२२॥

वेदगुप्तः	वेदोंकी रक्षा करने वाले	अध्यगां	अध्ययन किया,
मुनिः कृष्ण	मुनि कृष्णद्वैपायन हुए	स्वशिष्यान्	अपने शिष्यों
यतः अहं	जिनसे मैंने	पैल आदीन्	पैल आदिको
इदं	यह (श्रीमद्भागवत)	हित्वा	छोड़कर
		भगवान्	भगवान
		बादरायणः	बादरायणने ॥२२॥

मह्यं पुत्राय शान्ताय परं गुह्यमिदं जगौ ।
विचित्रवीर्योऽथोवाह काशिराजसुते बलात् ॥२३॥

मह्यं पुत्राय शान्ताय परं गुह्यं इदं जगौ विचित्रवीर्यः अथ उवाह काशिराज सुते बलात् ॥२३॥

मह्यं शान्ताय	मुझ शान्त	विचित्रवीर्यः	विचित्रवीर्यने
पुत्राय	अपने पुत्रको	अथ बलात्	फिर बलपूर्वक
इदं परं	इस परम	काशिराज	काशिराजकी
गुह्यं	रहस्यमय (संहिता)को	सुते	दो पुत्रियोंसे
जगौ	पढ़ाया,	उवाह	विवाह किया ॥२३॥

स्वयंवरादुपानीते अम्बिकाम्बालिके उभे ।
तयोरासक्तहृदयो गृहीतो यक्ष्मणा मृतः ॥२४॥

स्वयं वरात् उप आनीते अम्बिका अम्बालिके उभे तयोः आसक्त हृदयः गृहीतः यक्ष्मणा मृतः ॥२४॥

स्वयं वरात्	स्वयंवरसे	अम्बालिके	अम्बालिका
उप आनीते	अपने पास लायी हुई	उभे	दोनोंके साथ (विवाह किया)
अम्बिका	अम्बिका		

तयोः आसक्त	उनमें आसक्त	गृहीतः मृतः	ग्रस्त होकर मर गया ॥२४॥
हृदयः	चित्त		
यक्ष्मणा	क्षय-रोगसे		

क्षेत्रेऽप्रजस्य वै भ्रातुर्मात्रोक्तो बादरायणः ।
धृतराष्ट्रं च पाण्डुं च विदुरं चाप्यजीजनत् ॥२५॥

क्षेत्रे अप्रजस्य वै भ्रातुः मात्रा उक्तः बादरायणः धृतराष्ट्रं च पाण्डुं च विदुरं च अपि अजीजनत् ॥२५॥

वै अप्रजस्य	निश्चित सन्तानहीन	धृतराष्ट्रं	धृतराष्ट्र,
भ्रातुः क्षेत्रे	भाईकी पत्नियोंसे	च पाण्डुं	तथा पाण्डु
मात्रा उक्तः	माताके कहनेसे	च विदुरं	एवं विदुर
बादरायणः	भगवान् बादरायण व्यासजीने	च अपि	को भी
		अजीजनत्	उत्पन्न किया ॥२५॥

गान्धार्यां धृतराष्ट्रस्य जज्ञे पुत्रशतं नृप ।
तत्र दुर्योधनो ज्येष्ठो दुःशला चापि कन्यका ॥२६॥

गान्धार्यां धृतराष्ट्रस्य जज्ञे पुत्रशतं नृप तत्र दुर्योधनः ज्येष्ठः दुःशला च अपि कन्यका ॥२६॥

नृप	राजन् !	तत्र दुर्योधनः	उनमें दुर्योधन
धृतराष्ट्रस्य	धृतराष्ट्रकी (पत्नी)	ज्येष्ठः	सबसे बड़ा था,
गान्धार्यां	गान्धारीने	च दुःशला	और दुःशला नामकी
पुत्रशतं जज्ञे	सौ पुत्र उत्पन्न किये	कन्यका अपि	कन्या भी हुई ॥२६॥

शापान्मैथुनरुद्धस्य पाण्डोः कुन्त्यां महारथाः ।
जाता धर्मानिलेन्द्रेभ्यो युधिष्ठिरमुखास्त्रयः ॥२७॥

शापात् मैथुन रुद्धस्य पाण्डोः कुन्त्यां महारथाः जाता धर्म अनिल इन्द्रेभ्यः युधिष्ठिर मुखाः त्रयः ॥२७॥

शापात्	शापके कारण	पाण्डोः	पाण्डुकी पत्नी
मैथुन रुद्धस्य	मैथुनसे रोके गये	कुन्त्यां	कुन्तीसे

धर्म अनिल	धर्म, वायु,	मुखाः	प्रमुख
इन्द्रेभ्यः	इन्द्रके द्वारा	त्रयः महारथाः	तीन महारथी
युधिष्ठिर	युधिष्ठिर	जाता	उत्पन्न हुए ॥२७॥

नकुलः सहदेवश्च माद्र्यां नासत्यदस्रयोः ।
द्रौपद्यां पञ्च पञ्चभ्यः पुत्रास्ते पितरोऽभवन् ॥२८॥

नकुलः सहदेवः च माद्र्यां नासत्यदस्रयोः द्रौपद्यां पञ्च पञ्चभ्यः पुत्राः ते पितरः अभवन् ॥२८॥

माद्र्यां	माद्रीसे	द्रौपद्यां	द्रौपदीसे
नासत्यदस्रयोः	दोनों अश्विनी कुमारों द्वारा	पञ्चभ्यः	पांचो पाण्डवोंसे
		ते पञ्च	तुम्हारे पांच
नकुलः च	नकुल और	पितरः	पितर
सहदेवः	सहदेव,	अभवन्	उत्पन्न हुए ॥२८॥

युधिष्ठिरात् प्रतिविन्ध्यः श्रुतसेनो वृकोदरात् ।
अर्जुनात्श्रुतकीर्तिस्तु शतानीकस्तु नाकुलिः ॥२९॥

युधिष्ठिरात् प्रतिविन्ध्यः श्रुतसेनः वृकोदरात् अर्जुनात् श्रुतकीर्तिः तु शतानीकः तु नाकुलिः ॥२९॥

युधिष्ठिरात्	युधिष्ठिरसे	अर्जुनात् तु	अर्जुनसे तो
प्रतिविन्ध्यः	प्रतिविन्ध्य,	श्रुतकीर्तिः	श्रुतकीर्ति,
वृकोदरात्	भीमसेनसे	नाकुलिः तु	नकुलसे तो
श्रुतसेनः	श्रुतसेन,	शतानीकः	शतानीक ॥२९॥

सहदेवसुतो राजन्श्रुतकर्मा तथापरे ।
युधिष्ठिरात् तु पौरव्यां देवकोऽथ घटोत्कचः ॥३०॥

सहदेवसुतः राजन् श्रुतकर्मा तथा अपरे युधिष्ठिरात् तु पौरव्यां देवकः अथ घटोत्कचः ॥३०॥

राजन्	राजन् !	श्रुतकर्मा	श्रुतकर्मा था ।
सहदेवसुतः	सहदेवका पुत्र	तथा	इसी प्रकार

अपरे	दूसरे थे	देवकः	देवक
युधिष्ठिरात्	युधिष्ठिरके	अथ घटोत्कचः	फिर घटोत्कच ॥३०॥
पौरव्यां	पौरवीसे		

भीमसेनाद्धिडिम्बायां काल्यां सर्वगतस्ततः ।
सहदेवात् सुहोत्रं तु विजयासूत पार्वती ॥३१॥

भीमसेनात् हिडिम्बायां काल्यां सर्वगतः ततः सहदेवात् सुहोत्रं तु विजया असूत पार्वती ॥३१॥

भीमसेनात्	भीमसेनके	पार्वती	पर्वतीय कन्या
हिडिम्बायां	हिडिम्बासे हुआ,	विजया	विजयाने
ततः काल्यां	और कालीसे	सुहोत्रंतु	सुहोत्रको
सर्वगतः	सर्वगत हुआ,	असूत	उत्पन्न किया ॥३१॥
सहदेवात्	सहदेवसे		

करेणुमत्यां नकुलो निरमित्रं तथार्जुनः ।
इरावन्तमुलूप्यां वै सुतायां बभ्रुवाहनम् ।
मणिपूरपतेः सोऽपि तत्पुत्रः पुत्रिकासुतः ॥३२॥

करेणुमत्यां नकुलः निरमित्रं तथा अर्जुनः इरावन्तं उलूप्यां वै सुतायां बभ्रु वाहनं मणिपूरपतेः सः अपि तत् पुत्रः पुत्रिका सुतः ॥३२॥

नकुलः	नकुलने	सुतायां	पुत्री (चित्रांगदा) से
करेणुमत्यां	करेणुमतीसे	बभ्रुवाहनं	बभ्रुवाहनको
निरमित्रं	निरमित्रको,	सः अपि	वह भी
तथा	इसी प्रकार	पुत्रिका	पुत्रिका धर्मसे
अर्जुनः	अर्जुनने	सुतः	उत्पन्न पुत्र
वै	निश्चय (नाग कन्या)	तत्	उन्हीं (मणिपुर नरेश) का
उलूप्यां	उलूपीसे	पुत्रः	पुत्र हो गया ॥३२॥
इरावन्तं	इरावान् तथा		
मणिपूरपतेः	मणिपुर नरेशकी		

तव तातः सुभद्रायामभिमन्युरजायत ।
सर्वातिरथजिद् वीर उत्तरायां ततो भवान् ॥३३॥

तव तातः सुभद्रायां अभिमन्युः अजायत सर्व अतिरथ जित् वीर उत्तरायां ततः भवान् ॥३३॥

सुभद्रायां	सुभद्रासे	अभिमन्युः	अभिमन्यु
सर्व	सम्पूर्ण	अजायत	उत्पन्न हुए
अतिरथ	अतिरथियोंको	ततः उत्तरायां	उनसे उत्तरामें
जित् वीर	जीतनेवाला वीर	भवान्	तुम उत्पन्न हुए
तव तातः	तुम्हारे पिता		॥३३॥

परिक्षीणेषु कुरुषु द्रौणेर्ब्रह्मास्त्रतेजसा ।
त्वं च कृष्णानुभावेन सजीवो मोचितोऽन्तकात् ॥३४॥

परिक्षीणेषु कुरुषु द्रौणेः ब्रह्मास्त्र तेजसा त्वं च कृष्ण अनुभावेन सजीवः मोचितः अन्तकात् ॥३४॥

कुरुषु	कौरवोंके	कृष्ण	श्रीकृष्णके
परिक्षीणेषु	नष्ट हो जानेपर	अनुभावेन	प्रभावसे
द्रौणेः	अश्वत्थामाके	त्वं चं सजीवः	तुम तो सप्राण
ब्रह्मास्त्र	ब्रह्मास्त्रके	मोचितः	छुड़ा लिये गये
तेजसा	तेजरूपी		॥३४॥
अन्तकात्	कालसे		

तवेमे तनयास्तात जनमेजयपूर्वकाः ।
श्रुतसेनो भीमसेन उग्रसेनश्च वीर्यवान् ॥३५॥

तव इमे तनयाः तात जनमेजय पूर्वकाः श्रुतसेनः भीमसेनः उग्रसेनः च वीर्यवान् ॥३५॥

तात	तात !	जनमेजय	जनमेजय
तव इमे	तुम्हारे ये	पूर्वकाः तनयाः	जिनमें बड़ा है वे पुत्र

श्रुतसेनः	श्रुतसेन,	च वीर्यवान्	तथा पराक्रमी
भीमसेनः	भीमसेन	उग्रसेनः	उग्रसेन हैं ॥३५॥

जनमेजयस्त्वां विदित्वा तक्षकान्निधनं गतम् ।
सर्पान् वै सर्पयागाग्नौ स होष्यति रुषान्वितः ॥३६॥

जनमेजयः त्वां विदित्वा तक्षकात् निधनं गतं सर्पान् वै सर्पयाग अग्नौ स होष्यति रुषा अन्वितः ॥३६॥

त्वां तक्षकात्	तुम्हें तक्षक द्वारा	वै सर्पान्	निश्चय सर्पोंको
निधनं गतं	मृत्युप्राप्त	सर्पयाग अग्नौ	सर्पयज्ञकी अग्निमें
विदित्वा	जानकर	स	वे
जनमेजयः	जनमेजय	होष्यति	हवन कर देंगे ॥३६॥
रुषा अन्वितः	क्रोधपूर्वक		

कावषेयं पुरोधाय तुरं तुरगमेधयाट् ।
समन्तात् पृथिवीं सर्वां जित्वा यक्ष्यति चाध्वरैः ॥३७॥

कावषेयं पुरः आधाय तुरं तुरगमेधयाट् समन्तात् पृथिवीं सर्वां जित्वा यक्ष्यति च अध्वरैः ॥३७॥

तुरगमेधयाट्	अश्वमेध-यज्ञ करनेके लिए	सर्वां पृथिवीं	सम्पूर्ण पृथ्वीको
		जित्वा	जीतकर
कावषेयं	कावषेय गोत्रीय	अध्वरैः च	यज्ञों द्वारा ही
तुरं	तुरको	यक्ष्यति	(भगवानकी) आराधना करेगा ॥३७॥
पुरः आधाय	पुरोहित बनाकर		
समन्तात्	चारों ओरसे		

तस्य पुत्रः शतानीको याज्ञवल्क्यात् त्रयीं पठन् ।
अस्त्रज्ञानं क्रियाज्ञानं शौनकात् परमेष्यति ॥३८॥

तस्य पुत्रः शतानीकः याज्ञवल्क्यात् त्रयीं पठन् अस्त्रज्ञानं क्रियाज्ञानं शौनकात् परम् एष्यति ॥३८॥

तस्य पुत्रः	उसका पुत्र	याज्ञवल्क्यात्	याज्ञवल्क्यसे
शतानीकः	शतानीक	त्रयीं	वेदत्रयी और

क्रियाज्ञानं पठन्	क्रियाज्ञान पढ़कर	शौनकात्	शौनकसे
अस्त्रज्ञानं	(कृपाचार्यसे) अस्त्र-ज्ञान	परम्	आत्मज्ञान
		एष्यति	प्राप्त करेगा ॥३८॥

सहस्रानीकस्तत्पुत्रस्ततश्चैवाश्वमेधजः ।
असीमकृष्णस्तस्यापि नेमिचक्रस्तु तत्सुतः ॥३९॥

सहस्रानीकः तत् पुत्रः ततः च एव अश्वमेधजः असीमकृष्णः तस्य अपि नेमिचक्रः तु तत्सुतः ॥३९॥

तत् पुत्रः	उसका पुत्र	असीमकृष्णः	असीमकृष्ण
सहस्रानीकः	सहस्रानीक	तत्सुतः तु	उसका पुत्र तो
ततः च	उससे भी	नेमिचक्रः	नेमिचक्र होगा ॥३९॥
अश्वमेधजः	अश्वमेधज		
तस्य अपि	उसका भी		

गजाह्वये हृते नद्या कौशाम्ब्यां साधु वत्स्यति ।
उक्तस्ततश्चित्ररथस्तस्मात् कविरथः सुतः ॥४०॥

गजाह्वये हृते नद्या कौशाम्ब्यां साधु वत्स्यति उक्तः ततः चित्ररथः तस्मात् कविरथः सुतः ॥४०॥

गजाह्वये	हस्तिनापुरके	ततः	उसका पुत्र
नद्या	गंगा नदी द्वारा	चित्ररथः उक्तः	चित्ररथ कहा गया है,
हृते	हरण कर लेनेपर		
कौशाम्ब्यां	कौशाम्बीमें	तस्मात् सुतः	उसका पुत्र
साधु	भली प्रकार	कविरथः	कविरथ होगा ॥४०॥
वत्स्यति	जा बसेगा,		

तस्माच्च वृष्टिमांस्तस्य सुषेणोऽथ महीपति ।
सुनीथस्तस्य भविता नृचक्षुर्यत् सुखीनलः ॥४१॥

तस्मात् च वृष्टिमान् तस्य सुषेणः अथ महीपति सुनीथः तस्य भविता नृचक्षुः यत् सुखीनलः ॥४१॥

तस्मात् च	उससे तो
वृष्टिमान्	वृष्टिमान्
तस्य अथ	उससे फिर
महीपतिः	पृथ्वीपति
सुषेणः	सुषेण,
तस्य सुनीथः	उसका सुनीथ
भविता नृचक्षुः	उससे होगा नृचक्षु
यत्	जिससे
सुखीनलः	सुखीनल होगा ॥४१॥

परिप्लवः सुतस्तस्मान्मेधावी सुनयात्मजः ।
नृपञ्जयस्ततो दूर्वस्तिमिस्तस्माज्जनिष्यति ॥४२॥

परिप्लवः सुतः तस्मात् मेधावी सुनय आत्मजः नृपञ्जयः ततः दूर्वः तिमिः तस्मात् जनिष्यति ॥४२॥

सुतः	उसका पुत्र
परिप्लवः	परिप्लव,
तस्मात्	उससे
मेधावी	मेधावी,
आत्मजः	उसका पुत्र
सुनय	सुनय,
नृपञ्जयः	(उससे) नृपञ्जय
ततः दूर्वः	उससे दूर्व
तस्मात् तिमिः	उससे तिमि
जनिष्यति	उत्पन्न होगा ॥४२॥

तिमेर्बृहद्रथस्तस्माच्छतानीकः सुदासजः ।
शतानीकाद् दुर्दमनस्तस्यापत्यं वहीनरः ॥४३॥

तिमेः बृहद्रथः तस्मात् शतानीकः सुदासजः शतानीकात् दुर्दमनः तस्य अपत्यं वहीनरः ॥४३॥

तिमेः बृहद्रथः	तिमिसे बृहद्रथ,
तस्मात्	उससे
सुदासजः	सुदाससे उत्पन्न
शतानीकः	शतानीक,
शतानीकात्	शतानीकसे
दुर्दमनः	दुर्दमन
तस्य अपत्यं	उसका पुत्र
वहीनरः	वहीनर होगा ॥४३॥

दण्डपाणिर्निमिस्तस्य क्षेमको भविता नृपः ।
ब्रह्मक्षत्रस्य वै प्रोक्तो वंशो देवर्षिसत्कृतः ॥४४॥

दण्डपाणिः निमिः तस्य क्षेमकः भविता नृपः ब्रह्मक्षत्रस्य वै प्रोक्तः वंशः देव ऋषि सत् कृतः ॥४४॥

दण्डपाणिः	उसका दण्डपाणि,	ऋषि	ऋषियों द्वारा
तस्य निमिः	उसका निमि,	सत्कृतः	सम्मानित
भविता	होगा (उससे)	ब्रह्म शत्रस्य	वृहत् क्षत्रका
नृपः क्षेमकः	राजा क्षेमक,	वंशः प्रोक्तः	वंश वर्णन किया ॥४४॥
वै	निश्चय		
देव	देवताओं और		

क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ।
अथ मागधराजानो भवितारो वदामि ते ॥४५॥

क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ अथ मागध राजानः भवितारः वदामि ते ॥४५॥

क्षेमकं राजानं	क्षेमकके राजा	अथ भवितारः	अब होनेवाले
प्राप्य वै	होनेपर निश्चय	मागध	मगधके
कलौ	कलियुगमें	राजानः	राजाओंका
संस्थां प्राप्स्यति	(यह वंश) समाप्त हो जायगा,	ते वदामि	तुमसे वर्णन करता हूँ ॥४५॥

भविता सहदेवस्य मार्जारिर्यत् श्रुतश्रवाः ।
ततोऽयुतायुस्तस्यापि निरमित्रोऽथ तत्सुतः ॥४६॥

भविता सहदेवस्य मार्जारिः यत श्रुतश्रवाः ततः अयुतायुः तस्य अपि निरमित्रः अथ तत् सुतः ॥४६॥

सहदेवस्य	(जरासंध पुत्र) सहदेवका	भविता	होगा,
मार्जारि	(पुत्र) मार्जारि	यत्	जिससे
		श्रुतश्रवाः	श्रुतश्रवा होगा,

तत् श्रुतायुः	उससे श्रुतायु,	अथ तत् सुतः	फिर उसका पुत्र
तस्य अपि	उसका भी		॥४६॥
निरमित्रः	निरमित्र,		

सुनक्षत्रः सुनक्षत्राद् बृहत्सेनोऽथ कर्मजित् ।
ततः सृतञ्जयाद् विप्रः शुचिस्तस्य भविष्यति ॥४७॥

सुनक्षत्रः सुनक्षत्रात् बृहत्सेनः अथ कर्मजित् ततः सृतञ्जयात् विप्रः शुचिः तस्य भविष्यति ॥४७॥

सुनक्षत्रः	सुनक्षत्र,	सृतञ्जयात्	सृतञ्जयसे
सुनक्षत्रात्	सुनक्षत्रसे	विप्रः	विप्र,
बृहत्सेनः	बृहत्सेन,	तस्य शुचिः	उससे शुचि
अथ कर्मजित्	फिर कर्मजित्	भविष्यति	उत्पन्न होगा ॥४७॥
ततः	उससे		

क्षेमोऽथ सुव्रतस्तस्माद् धर्मसूत्रः शमस्ततः ।
द्युमत्सेनोऽथ सुमतिः सुबलो जनिता ततः ॥४८॥

क्षेमः अथ सुव्रतः तस्मात् धर्मसूत्रः शमः ततः द्युमत्सेनः अथ सुमतिः सुबलः जनिता ततः ॥४८॥

क्षेमः	उससे क्षेम,	द्युमत्सेनः	द्युमत्सेन
अथ सुव्रतः	फिर सुव्रत,	अथ सुमतिः	फिर सुमति
तस्मात्	उससे	जनिता	उससे उत्पन्न होगा
धर्मसूत्रः	धर्मसूत्र,	सुबलः	सुबल
शमः	(उससे) शम	ततः	उससे ॥४८॥
ततः	उससे		

सुनीथः सत्यजिदथ विश्वजिद् यद् रिपुञ्जयः ।
बार्हद्रथाश्च भूपाला भाव्याः साहस्रवत्सरम् ॥४९॥

सुनीथः सत्यजित् अथ विश्वजित् यत् रिपुञ्जयः बार्हद्रथाः च भूपाला भाव्याः साहस्र वत्सरम् ॥४९॥

सुनीथः	सुनीथ	बार्हद्रथाः	ये वृहद्रथके वंशमें उत्पन्न
सत्यजित्	(उससे) सत्यजित्		
अथ	फिर	भूपालाः च	राजा लोग भी
विश्वजित्	विश्वजित्	साहस्र	एक सहस्र
यत् रिपुञ्जयः	जिससे रिपुञ्जय होगा,	वत्सरं	वर्षके भीतर
		भाव्याः	होंगे ॥४६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे द्वाविंशोऽध्यायः ॥२२॥

अथ त्रयोविंशोऽध्यायः

श्रीशुक उवाच

अनोः सभानरश्चक्षुः परोक्षश्च त्रयः सुताः ।
सभानरात् कालनरः सृञ्जयस्तत्सुतस्ततः ॥१॥

अनोः सभानरः चक्षुः परोक्षः च त्रयः सुताः सभानरात् कालनरः सृञ्जयः तत् सुतः ततः ॥१॥

अनोः	(ययाति पुत्र) अनुके	सभानरात्	सभानरसे
सभानरः चक्षुः	सभानर, चक्षु,	कालनरः	कालनर,
च परोक्षः	और परोक्ष	तत् सृञ्जयः	उससे सृञ्जय,
त्रयः सुताः	ये तीन पुत्र थे,	ततः सुतः	उसका पुत्र ॥१॥

जनमेजयस्तस्य पुत्रो महाशीलो महामनाः ।
उशीनरस्तितिक्षुश्च महामनस आत्मजौ ॥२॥

जनमेजयः तस्य पुत्रः महाशीलः महामनाः उशीनरः तितिक्षुः च महामनस आत्मजौ ॥२॥

जनमेजयः	जनमेजय,	महामनस	महामनाके
तस्य पुत्रः	उसका पुत्र	आत्मजौ	दो पुत्र
महाशीलः	महाशील,	उशीनरः च	उशीनर और
महामनाः	(उसका) महामना,	तितिक्षुः	तितिक्षु हुए ॥२॥

शिबिर्वनः शमिर्दक्षश्चत्वारोशीनरात्मजाः ।
वृषादर्भः सुवीरश्च मद्रः कैकेय आत्मजाः ॥३॥

शिबिः वनः शमिः दक्षः चत्वारः उशीनर आत्मजाः वृषादर्भः सुवीरः च मद्रः कैकेय आत्मजाः ॥३॥

शिबिः वनः	शिबि, वन,	वृषादर्भः	वृषादर्भ
शमिः दक्षः	शमी और दक्ष,	सुवीरः मद्रः	सुवीर, मद्र,
चत्वारः	ये चार	च कैकय	और कैकय
उशीनर	उशीनरके	आत्मजाः	ये पुत्र हुए ॥३॥
आत्मजाः	पुत्र हुए ।		

शिबेश्चत्वार एवासंस्तितिक्षोश्च रुशद्रथः ।
ततो हेमोऽथ सुतपा बलिः सुतपसोऽभवत् ॥४॥

शिबेः चत्वार एव आसन् तितीक्षोः च रुशद्रथः ततः हेमः अथ सुतपा बलिः सुतपसः अभवत् ॥४॥

शिबेः चत्वार	शिबिके ये चार	ततः हेमः	उससे हेम,
एव आसन्	ही हुए,	अथ सुतपा	फिर सुतपा
च तितीक्षोः	और तितीक्षुसे	सुतपसः	सुतपासे
रुशद्रथः	रुशद्रथ,	बलिः अभवत्	बलि हुआ ॥४॥

अंगबंगकलिंगाद्याः सुह्मपुण्ड्रान्ध्रसंज्ञिताः ।
जज्ञिरे दीर्घतमसो बलेः क्षेत्रे महीक्षितः ॥५॥

अंग बंग कलिंग आद्याः सुह्म पुण्ड्र आन्ध्र संज्ञिताः जज्ञिरे तमसः बलेः क्षेत्रे महीक्षितः ॥५॥

महीक्षितः बलेः	राजा बलिकी	सुह्म पुण्ड्र	सुह्म, पुण्ड्र,
क्षेत्रे	पत्नीमें	आन्ध्र आद्याः	आन्ध्र आदि
दीर्घतमसः	दीर्घतमा मुनिसे	संज्ञिताः	नामवाले
अंग बंग	अंग, बंग,	जज्ञिरे	उत्पन्न हुए ॥५॥
कलिंग	कलिंग,		

चक्रुः स्वनाम्ना विषयान् षडिमान् प्राच्यकांश्च ते ।
खनपानोऽङ्गतो जज्ञे तस्माद् दिविरथस्ततः ॥६॥

चक्रुः स्वनाम्ना विषयान् षट् इमान् प्राच्यकान् च ते खनपानः अंगतः जज्ञे तस्मात् दिविरथः ततः ॥६॥

च ते	और उन	खनपानः जज्ञे	खनपान उत्पन्न हुआ,
इमान् षट्	इन छ ने	तस्मात्	उससे
प्राच्यकान्	पूर्व देशके	दिविरथः	दिविरथ
स्वनाम्ना	अपने नामवाले	ततः	उससे ॥६॥
विषयान् चक्रुः	प्रदेश बसाये		
अंगतः	अंगसे		

सुतो धर्मरथो यस्य जज्ञे चित्ररथोऽप्रजाः ।
रोमपाद इति ख्यातस्तस्मै दशरथः सखा ॥७॥

सुतः धर्मरथः यस्य जज्ञे चित्ररथः अप्रजाः रोमपाद इति ख्यातः तस्मै दशरथः सखा ॥७॥

सुतः धर्मरथः	उसका पुत्र धर्मरथ	रोमपाद इति	रोमपाद इस
यस्य अप्रजाः	जिससे सन्तानहीन	ख्यातः तस्मै	नामसे प्रसिद्ध उसे
चित्ररथः	चित्ररथ	सखा	उसके मित्र
जज्ञे	उत्पन्न हुआ,	दशरथः	दशरथने ॥७॥

शान्तां स्वकन्यां प्रायच्छदृष्यश्रृंग उवाह ताम् ।
देवेऽवर्षति यं रामा आनिन्युर्हरिणीसुतम् ॥८॥

शान्तां स्वकन्यां प्रायच्छत् ऋष्यशृंग उवाह तां देवे अवर्षति यं रामा आनिन्युः हरिणी सुतम् ॥८॥

स्वकन्यां	अपनी पुत्री	सुतं	पुत्रको
शान्तां	शान्ता	देवे अवर्षति	देवके वर्षा न करने-
प्रायच्छत्	(गोद) दे दी,		पर
तां ऋष्यशृंग	उसे शृष्यशृंगने	रामा	स्त्रियां ले
उवाह	विवाह कर लिया,	आनिन्युः	आयी थीं ॥८॥
यं हरिणी	जिन हरिणीके		

नाट्यसंगीतवादित्रैर्विभ्रमालिंगनार्हणैः ।
स तु राज्ञोऽनपत्यस्य निरूप्येष्टिं मरुत्वतः ॥९॥

नाट्य संगीत वादित्रैः विभ्रम आलिंगन अर्हणैः स तु राज्ञः अनपत्यस्य निरूप्य इष्टिं मरुत्वतः ॥९॥

नाट्य संगीत	नृत्य, संगीत,	स तु	उन्होंने ही
वादित्रैः विभ्रम	बाद्य, हावभाव,	अनपत्यस्य	सन्तानहीन
आलिंगन	आलिंगन तथा	राज्ञः	राजा (दशरथा) से
अर्हणैः	उपहारोंसे (ले आयी थीं)	मरुत्वतः इष्टिं	इन्द्रयाग
		निरूप्य	करवा कर ॥९॥

प्रजामदाद् दशरथो येन लेभेऽप्रजाः प्रजाः ।
चतुरंगो रोमपादात् पृथुलाक्षस्तु तत्सुतः ॥१०॥

प्रजां अदात् दशरथः येन लेभे अप्रजाः प्रजाः चतुरंगः रोमपादात् पृथुलाक्षः तु तत् सुतः ॥१०॥

प्रजां अदात्	पुत्र दिया,	रोमपादात्	रोमपादसे
येन अप्रजाः	जिससे सन्तानहीन	चतुरंगः	चतुरंग,
दशरथः	महाराज दशरथने	तत् सुतः तु	उसका पुत्र तो
प्रजाः लेभे	पुत्र पाये,	पृथुलाक्षः	पृथुलाक्ष हुआ ॥१०॥

बृहद्रथो बृहत्कर्मा बृहद्भानुश्च तत्सुताः ।
आद्याद् बृहन्मनास्तस्माज्जयद्रथ उदाहृतः ॥११॥

बृहद्रथः बृहत्कर्मा बृहद्भानुः च तत् सुताः आद्यात् बृहन्मनाः तस्मात् जयद्रथ उदाहृतः ॥११॥

तत् सुताः	उसके पुत्र	आद्यात्	उनमें पहिले (बृहद्रथ) से
बृहद्रथ	बृहद्रथ,	बृहन्मनाः	बृहन्मना
बृहत्कर्मा	बृहत्कर्मा,	तस्मात् जयद्रथ	उससे जयद्रथ
च बृहद्भानुः	तथा बृहद्भानु हुए,	उदाहृतः	कहा गया हैं ॥११॥

विजयस्तस्य सम्भूत्यां ततो धृतिरजायत ।
ततो धृतव्रतस्तस्य सत्कर्माधिरथस्ततः ॥१२॥

विजयः तस्य सम्भूत्यां ततः धृतिः अजायत ततः धृतव्रतः तस्य सत्कर्मा अधिरथः ततः ॥१२॥

तस्य	उसकी	ततः धृतव्रतः	उससे धृतव्रत,
सम्भूत्यां	संभूति नामक पत्नीसे	तस्य सत्कर्मा	उसके सत्कर्मा
विजयः	विजय	ततः	उससे
ततः धृतिः	उससे धृति	अधिरथः	अधिरथ हुआ ॥१२॥
अजायत	उत्पन्न हुआ,		

योऽसौ गंगातटे क्रीडन् मञ्जूषान्तर्गतं शिशुम् ।
कुन्त्यापविद्धं कानीनमनपत्योऽकरोत् सुतम् ॥१३॥

यः असौ गंगातटे क्रीडन् मञ्जूषा अन्तर्गतं शिशुं कुन्त्या अपविद्धं कानीनं अनपत्यः अकरोत् सुतम् ॥१३॥

कुन्त्या	कुन्ती द्वारा	गंगातटे	गंगा किनारे
कानीनं	कन्यावस्थामें उत्पन्न	क्रीडन्	खेलते समय (पाकर)
अपविद्धं	त्यागे हुए	अनपत्यः	सन्तानहीन होनेके कारण
मञ्जूषा	पेटिकाके	सुतं	अपना पुत्र
अन्तर्गतं	भीतर रखे	अकरोत्	बना लिया ॥१३॥
शिशुं	बालकको		
असौ यः	इन जिन्होंने		

वृषसेनः सुतस्तस्य कर्णस्य जगतीपतेः ।
द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः ॥१४॥

वृषसेनः सुतः तस्य कर्णस्य जगतीपतेः द्रुह्युः च तनयः बभ्रुः सेतुः तस्य आत्मजः ततः ॥१४॥

तस्य	उस	द्रुह्युः	(ययाति पुत्र) द्रुह्यु का
जगतीपतेः	पृथ्वीपति	तनयः बभ्रुः	पुत्र बभ्रु हुआ,
कर्णस्य तनयः	कर्णका पुत्र	तस्य आत्मजः	उसका पुत्र
वृषसेनः	वृषसेन,	सेतुः	सेतु हुआ,
च	और	ततः	उससे ॥१४॥

आरब्धस्तस्य गान्धारस्तस्य धर्मस्ततो धृतः ।
धृतस्य दुर्मनास्तस्मात् प्रचेताः प्राचेतसं शतम् ॥१५॥

आरब्धः तस्य गान्धारः तस्य धर्मः ततः धृतः धृतस्य दुर्मनाः तस्मात् प्रचेताः प्राचेतसं शतम् ॥१५॥

आरब्धः	आरब्ध,	तस्मात्	उससे
तस्य गान्धारः	उसका गान्धार	प्रचेताः	प्रचेता,
तस्य धर्मः	उसका धर्म	प्राचेतसं	प्रचेताके
ततः धृतः	उसका पुत्र धृत,	शतं	सौ पुत्र हुए ॥१५॥
धृतस्य दुर्मनाः	धृतका दुर्मना,		

म्लेच्छाधिपतयोऽभूवन्नुदीचीं दिशमाश्रिताः ।
तुर्वसोश्च सुतो वह्निर्वह्नेर्भर्गोऽथ भानुमान् ॥१६॥

म्लेच्छ अधिपतयः अभूवन् उदीचीं दिशं आश्रिताः तुर्वसोः च सुतः वह्निः वह्नेः भर्गः अथ भानुमान् ॥१६॥

उदीचीं दिशं	उत्तर दिशामें	सुतः च	पुत्र तो
आश्रिताः	रहनेवाले (ये सब)	वह्निः	वह्नि हुआ,
म्लेच्छ	म्लेच्छोंके	वह्नेः भर्गः	वह्निसे भर्ग
अधिपतयः	अधिपति	अथ	फिर उससे
अभूवन्	हुए,	भानुमान्	भानुमान हुआ
तुर्वसोः	(ययाति-पुत्र) तुर्वसु का		॥१६॥

त्रिभानुस्तत्सुतोऽस्यापि करन्धम उदारधीः ।
मरुतस्तत्सुतोऽपुत्रः पुत्रं पौरवमन्वभूत् ॥१७॥

त्रिभानुः तत् सुतः अस्य अपि करन्धम उदारधीः मरुतः तत् सुतः अपुत्रः पुत्रं पौरवं अनु अभूत् ॥१७॥

तत् सुतः	उसका पुत्र	अस्य अपि	इसका भी
त्रिभानुः	त्रिभानु,	उदारधीः	उदार बुद्धि

करन्धम	करन्धम हुआ,	पौरवं	पुरुवंशी
तत् सुतः	उसका पुत्र	पुत्रं	(दुष्यन्त) के पुत्र
मरुतः	मरुत	अनु अभूत्	अनुको किया
अपुत्रः	पुत्रहीन हुआ,		(बनाया) ॥१७॥

दुष्यन्तः स पुनर्भेजे स्वं वंशं राज्यकामुकः ।
ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशं नरर्षभ ॥१८॥

दुष्यन्तः स पुनः भेजे स्वं वंशं राज्यकामुकः ययातेः ज्येष्ठ पुत्रस्य यदोः वंशं नर ऋषभ ॥१८॥

राज्यकामुकः	राज्यकामुक	ऋषभ	परीक्षित,
स दुष्यन्तः	वह दुष्यन्त	ययातेः	ययातिके
पुनः स्वं वंशं	फिर अपने वंशमें	ज्येष्ठ पुत्रस्य	बड़े पुत्र
भेजे	चला गया ।	यदोः वंशं	यदुका वंश ॥१८॥
नर	पुरुष श्रेष्ठ		

वर्णयामि महापुण्यं सर्वपापहरं नृणाम् ।
यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते ॥१९॥

वर्णयामि महापुण्यं सर्वपापहरं नृणां यदोः वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते ॥१९॥

महापुण्यं	परम पवित्र	वंशं	वंशका
नृणां	मनुष्योंका	श्रुत्वा	श्रवण करके
सर्वपापहरं	सर्वपापहारी	सर्वपापैः	सब पापोंसे
वर्णयामि	वर्णन करता हूँ,	प्रमुच्यते	छूट जाता है ॥१९॥
नरः यदोः	मनुष्य यदु		

यत्रावतीर्णो भगवान् परमात्मा नराकृतिः ।
यदोः सहस्रजित्क्रोष्टा नलो रिपुरिति श्रुताः ॥२०॥

यत्र अवतीर्णः भगवान् परमात्मा नर आकृतिः यदोः सहस्रजित् क्रोष्टा नलः रिपुः इति श्रुताः ॥२०॥

यत्र	जिस वंशमें
भगवान्	भगवान्
परमात्मा	परमात्मा
नर आकृतिः	मनुष्य रूपमें
अवतीर्णः	अवतरित हुए,
यदोः	यदुके
सहस्रजित्	सहस्रजित्
क्रोष्टा नलः	क्रोष्टा, नल,
रिपुः इति	रिपु ये
श्रुताः	विख्यात हैं ॥२०॥

चत्वारः सूनवस्तत्र शतजित् प्रथमात्मजः ।
महाहयो वेणुहयो हैहयश्चेति तत्सुताः ॥२१॥

चत्वारः सूनवः तत्र शतजित् प्रथम आत्मजः महाहयः वेणुहयः हैहयः च इति तत् सुताः ॥२१॥

चत्वारः	ये चार
सूनवः	पुत्र हुए,
तत्र प्रथम	उनमें पहिले (सहस्रजित्) का
आत्मजः	पुत्र
शतजित्	शतजित्
तत् सुताः	उसके पुत्र
महाहयः	महाहय,
वेणुहयः	वेणुहय
च हैहयः	तथा हैहय
इति	ये हुए ॥२१॥

धर्मस्तु हैहयसुतो नेत्रः कुन्तेः पिता ततः ।
सोहञ्जिरभवत् कुन्तेर्महिष्मान् भद्रसेनकः ॥२२॥

धर्मः तु हैहय सुतः नेत्रः कुन्तेः पिता ततः सोहञ्जिः अभवत् कुन्तेः महिष्मान् भद्रसेनकः ॥२२॥

हैहय तु	हैहयसे तो
धर्मः	धर्म,
सुतः	उसका पुत्र
कुन्तेः पिता	कुन्तिका पिता
नेत्रः	नेत्र,
ततः कुन्तेः	फिर कुन्तिसे
सोहञ्जिः	सोहञ्जि
अभवत्	हुआ
महिष्मान्	(उससे) महिष्मान्
भद्रसेनकः	(उससे) भद्रसेनक हुआ ॥२२॥

दुर्मदो भद्रसेनस्य धनकः कृतवीर्यसूः ।
कृताग्निः कृतवर्मा च कृतौजा धनकात्मजाः ॥२३॥

दुर्मदः भद्रसेनस्य धनकः कृतवीर्यसूः कृताग्निः कृतवर्मा च कृतौजा धनक आत्मजाः ॥२३॥

भद्रसेनस्य	भद्रसेनके	आत्मजाः	(दूसरे) पुत्र
दुर्मदः	दुर्मद और	कृताग्निः	कृताग्नि,
कृतवीर्यसूः	कृतवीर्यको उत्पन्न करनेवाला	कृतवर्मा	कृतवर्मा
		च कृतौजा	तथा कृतौजा हुए ॥२३॥
धनकः	धनक हुआ,		
धनक	धनकके		

अर्जुनः कृतवीर्यस्य सप्तद्वीपेश्वरोऽभवत् ।
दत्तात्रेयाद्धरेरंशात् प्राप्तयोगमहागुणः ॥२४॥

अर्जुनः कृतवीर्यस्य सप्तद्वीप ईश्वरः अभवत् दत्तात्रेयात् हरेः अंशात् प्राप्त योग महागुणः ॥२४॥

कृतवीर्यस्य	कृतवीर्यका (पुत्र)	दत्तात्रेयात्	दत्तात्रेयसे
अर्जुनः	अर्जुन	योग	योगकी
सप्तद्वीप	सातों द्वीपोंका	महागुणः	महासिद्धियां
ईश्वरः अभवत्	स्वामी हुआ,	प्राप्त	प्राप्त कीं ॥२४॥
हरेः अंशात्	श्रीहरिके अंश		

न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः ।
यज्ञदानतपोयोगश्रुतवीर्यजयादिभिः ॥२५॥

न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः यज्ञ दान तपः योग श्रुत वीर्य जय आदिभिः ॥२५॥

पार्थिवाः नूनं	राजा लोग निश्चय	तपः योग	तपस्या, योग,
यज्ञ दान	यज्ञ, दान,	श्रुत वीर्य	यश, पराक्रम,

जय आदिभिः	विजय आदि द्वारा	गतिं न	पदको नहीं
कार्तवीर्यस्य	कृतवीर्यके पुत्र सहस्रार्जुनके	यास्यन्ति	पा सकेंगे ॥२५॥

पञ्चाशीतिसहस्राणि ह्यव्याहतबलः समाः ।
अनष्टवित्तस्मरणो बुभुजेऽक्षय्यषड्वसु ॥२६॥

पञ्च अशीति सहस्राणि हि अव्याहत बलः समाः अनष्ट वित्त स्मरणः बुभुजे अक्षय्य षट्वसु ॥२६॥

हि	क्योंकि	अनष्ट वित्त	बिना धन नष्ट
पञ्च अशीति	पञ्चासी	स्मरणः	होनेका स्मरण किये
सहस्राणि	सहस्र	अक्षय्य	अक्षय धनवान
समाः	वर्षों तक	बसु	रहकर
अव्याहत	अप्रतिहत	षट्	छहो इन्द्रियोंके
बलः	शरीर-बल,	बुभुजे	भोग भोगे ॥२६॥

तस्य पुत्रसहस्रेषु पञ्चैवोर्वरिता मृधे ।
जयध्वजः शूरसेनो वृषभो मधुरूर्जितः ॥२७॥

तस्य पुत्र सहस्रेषु पञ्च एव उर्वरिता मृधे जयध्वजः शूरसेनः वृषभः मधुः ऊर्जितः ॥२७॥

तस्य	उसके	मधु ऊर्जितः	मधु और ऊर्जित
पुत्र सहस्रेषु	सहस्र पुत्रोंमें	पञ्च एव	ये पांच ही
जयध्वजः	जय ध्वज,	मृधे	(परशुरामसे) युद्धमें
शूरसेनः	शूरसेन,	उर्वरिता	बच गये थे ॥२७॥
वृषभः	वृषभ,		

जयध्वजात् तालजंघस्तस्य पुत्रशतं त्वभूत् ।
क्षत्रं यत् तालजंघाख्यमौर्वतेजोपसंहृतम् ॥२८॥

जयध्वजात् तालजंघः तस्य पुत्रशतं तु अभूत् क्षत्रं यत् तालजंघाख्यं और्वतेज उपसंहृतम् ॥२८॥

जयध्वजात्	जयध्वजसे
तालजंघः	तालजंघ
तस्य तु	उसके तो
पुत्रशतं	सौ
अभूत्	हुए,
यत्	जिन
तालजंघाख्यं	तालजंघ नामक
क्षत्रं	क्षत्रियोंको
और्वतेज	और्व ऋषिके प्रभावसे
उपसंहृतं	(सगरने) समाप्त कर दिया ॥२८॥

तेषां ज्येष्ठो वीतिहोत्रो वृष्णिः पुत्रो मधोः स्मृतः ।
तस्य पुत्रशतं त्वासीद् वृष्णिज्येष्ठं यतः कुलम् ॥२९॥

तेषां ज्येष्ठः वीतिहोत्रः वृष्णिः पुत्रः मधोः स्मृतः तस्य पुत्रशतं तु आसीत् वृष्णि ज्येष्ठं यतः कुलम् ॥२९॥

तेषां ज्येष्ठः	उन (सौ पुत्रों) में बड़ा
वीतिहोत्रः	वीतिहोत्र था
पुत्रः मधोः	उसका पुत्र मधु
वृष्णिः	उसका वृष्णि
स्मृतः	कहा गया है,
तस्य पुत्रशतं आसीत्	उस (मधु) के सौ पुत्र थे,
वृष्णिः	उनमें वृष्णि
ज्येष्ठं	सबसे बड़ा था
यतः कुलं	जिससे यह कुल ॥२९॥

माधवा वृष्णयो राजन् यादवाश्चेति संज्ञिताः ।
यदुपुत्रस्य च क्रोष्टोः पुत्रो वृजिनवांस्ततः ॥३०॥

माधवा वृष्णयः राजन् यादवाः च इति संज्ञिताः यदुपुत्रस्य च क्रोष्टोः पुत्रः वृजिनवान् ततः ॥३०॥

राजन्	राजन् !
माधवा	माधव,
वृष्णयः	वार्ष्णेय,
च यादवाः	तथा यादव
इति संज्ञिताः	इन नामोंसे कहा गया ।
यदुपुत्रस्य क्रोष्टोः च पुत्रः	यदुके पुत्र क्रोष्टाके भी पुत्र
वृजिनवान्	वृजिनवान,
ततः	उससे ॥३०॥

श्वाहिस्ततो रुशेकुर्वै तस्य चित्ररथस्ततः ।
शशबिन्दुर्महायोगी महाभोजो महानभूत् ॥३१॥

श्वाहिः ततः रुशेकुः वै तस्य चित्ररथः ततः शशविन्दुः महायोगी महाभोजः महान् अभूत् ॥३१॥

श्वाहिः ततः	श्वाहि, उससे	महाभोजः	महाभोगी
वै रुशेकुः	निश्चय रुशेकु हुआ,	महान्	महान्
तस्य चित्ररथः	उसका चित्ररथ,	शशविन्दुः	शशविन्दु
ततः	उससे	अभूत्	उत्पन्न हुआ ॥३१॥
महायोगी	महायोगी		

चतुर्दशमहारत्नश्चक्रवर्त्यपराजितः ।
तस्य पत्नीसहस्राणां दशानां सुमहायशाः ॥३२॥

चतुर्दश महारत्न चक्रवर्ति अपराजितः तस्य पत्नी सहस्राणां दशानां सुमहायशाः ॥३२॥

चतुर्दश	चौदहो	सुमहायशाः	उस महायशस्वीके
महारत्न	महारत्नों* वाला	दशानां	दस
चक्रवर्ति	चक्रवर्ती	सहस्राणां	सहस्र
अपराजितः	अपराजित था,	पत्नी	पत्नियां थीं ॥३२॥

दशलक्षसहस्राणि पुत्राणां तास्वजीजनत् ।
तेषां तु षट्प्रधानानां पृथुश्रवस आत्मजः ॥३३॥

दशलक्ष सहस्राणि पुत्राणां तासु अजीजनत् तेषां तु षट् प्रधानानां पृथुश्रवस आत्मजः ॥३३॥

तासु	उनमें	सहस्राणि	सहस्र (दस करोड़)
दशलक्ष	दस लाख	पुत्राणां	पुत्र

* १-हाथी २-घोड़ा ३-रथ ४-स्त्री ५-वाण ६-कोश ७-माला ८-वस्त्र ९-वृक्ष १०-शक्ति ११-पाश १२-मणि १३-छत्र १४-विमान, इनमें सर्वोत्तम महारत्न होते हैं ।

अजोजनत्	उत्पन्न किये,
तेषां तु	उनमें भी
षट् प्रधानानां	छ प्रधानोंमें-से
पृथुश्रवस आत्मजः	पृथुश्रवाका पुत्र ॥३३॥

धर्मो नामोशना तस्य हयमेधशतस्य याट् ।
तत्सुतो रुचकस्तस्य पञ्चासन्नात्मजाः शृणु ॥३४॥

धर्मः नाम उशना तस्य हयमेध शतस्य याट् तत् सुतः रुचकः तस्य पञ्च आसन् आत्मजाः शृणु ॥३४॥

धर्मः नाम	धर्म नामक हुआ
तस्य	उसका पुत्र
शतस्य	सौ
हयमेध याट्	अश्वमेध यज्ञ करने-वाला
उशना	उशना हुआ ।
तत् सुतः	उसका पुत्र
रुचकः	रुचक
तस्य आत्मजाः	उसके पुत्र
पञ्च आसन्	पांच थे,
शृणु	(उनके नाम) सुनो ॥३४॥

पुरुजिद्रुक्मरुक्मेषुपृथुज्यामघसंज्ञिताः ।
ज्यामघस्त्वप्रजोऽप्यन्यां भार्यां शैब्यापतिर्भयात् ॥३५॥

पुरुजित् रुक्म रुक्मेषु पृथु ज्यामघ संज्ञिताः ज्यामघः तु अप्रजः अपि अन्यां भार्यां शैब्या पतिः भयात् ॥३५॥

पुरुजित्	पुरुजित,
रुक्म तक्मेषु	रुक्म, रुक्मेषु,
पृथु ज्यामघ	पृथु, ज्यामघ
संज्ञिताः	नामवाले थे,
ज्यामघः तु	ज्यामघने तो
अप्रजः अपि	सन्तानहीन होनेपर भी
शैब्या	पत्नी शैब्याके
भयात् पतिः	भयसे उसके पतिने
अन्यां भार्यां	दूसरी पत्नी ॥३५॥

नाविन्दच्छत्रुभवनाद् भोज्यां कन्यामहारषीत् ।
रथस्थां तां निरीक्ष्याह शैब्या पतिमर्मषिता ॥३६॥

न अविन्दत शत्रु भवनात् भोज्यां कन्यां अहारषीत् रथस्थां तां निरीक्ष्य आह शैब्या पतिं अमर्षिता ॥३६॥

अविन्दत न	फिर नहीं पा सका,	तां रथस्थां	उसे रथपर बैठी
शत्रु	(यद्यपि) शत्रुके	निरीक्ष्य	देखकर
भवनात्	भवनसे	अमर्षिता	असहनशीलता वश
भोज्यां	भोज्या नामकी	पतिं शैब्या	पतिसे शैव्याने
कन्यां	कन्या	आह	कहा ॥३६॥
अहारषीत्	हरण कर ली; किन्तु		

केयं कुहक मत्स्थानं रथमारोपितेति वै ।
स्नुषा तवेत्यभिहिते स्मयन्ती पतिमब्रवीत् ॥३७॥

क इयं कुहक मत् स्थानं रथं आरोपिता इति वै स्नुषा तव इति अभिहिते स्मयन्ती पतिं अब्रवीत् ॥३७॥

कुहक	'अरे कपटी,		'तुम्हारी पुत्रबधू हैं !'
मत् स्थानं	मेरे स्थानपर	स्मयन्ती	(तब) मुस्कराती हुई
इयं क	यह किसे	पतिं अब्रवीत्	पतिसे बोली ॥३७॥
रथं आरोपिता	रथमें बैठाया है ?'		
तव स्नुषा	(डरकर वह बोला)		

अहं वन्ध्यासपत्नी च स्नुषा मे युज्यते कथम् ।
जनयिष्यसि यं राज्ञि तस्येयमुपयुज्यते ॥३८॥

अहं वन्ध्या असपत्नी च स्नुषा मे युज्यते कथं जनयिष्यसि यं राज्ञि तस्य इयं उपयुज्यते ॥३८॥

अहं वन्ध्या	'मैं तो बन्ध्या हूँ'	जनयिष्यसि	उत्पन्न करेंगी,
च असपत्नी	तथा सौतहीन हूँ,	तस्य इयं	उसके यह
मे स्नुषा	मेरी पुत्रवधू	उपयुज्यते	उपयोगमें आवेगी
कथं युज्यते	कैसे हो सकती है ?'		॥३८॥
राज्ञि यं	(वह बोला) 'महा-		
	राजी जिसे		

अन्वमोदन्त तद्विश्वेदेवाः पितर एव च ।
शैब्या गर्भमधात् काले कुमारं सुषुवे शुभम् ।
स विदर्भ इति प्रोक्त उपयेमे स्नुषां सतीम् ॥३९॥

अन्वमोदन्त तत् विश्वेदेवाः पितर एव च शैब्या गर्भं अधात् काले कुमारं सुषुवे शुभं स विदर्भ इति प्रोक्तः उपयेमे स्नुषां सतीम् ॥३६॥

तत्	उसका
विश्वेदेवाः	विश्वेदेवा
च पितर एव	तथा पितरोंने भी
अन्वमोदन्त	अनुमोदन कर दिया,
शैब्या	शैव्याने
गर्भं अधात्	गर्भ धारण किया
काले शुभं	समयपर शुभ
कुमारं सुषुवे	कुमार उत्पन्न किया,
स विदर्भ	वह विदर्भ
इति प्रोक्तः	इस नामसे कहा गया,
सतीं	उस सती
स्नुषां	पुत्रवधूसे
उपयेमे	(उसने) विवाह किया ॥३६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे यदुवंशानुवर्णने त्रयोविंशोऽध्यायः ॥२३॥

अथ चतुर्विंशोऽध्यायः

श्रीशुक उवाच

तस्यां विदर्भोऽजनयत् पुत्रौ नाम्ना कुशक्रथौ ।
तृतीयं रोमपादं च विदर्भकुलनन्दनम् ॥१॥

तस्यां विदर्भः अजनयत् पुत्रौ नाम्ना कुश क्रथौ तृतीयं रोमपादं च विदर्भ कुलनन्दनम् ॥१॥

तस्यां	उस (भोज्या) से	तृतीयं	तीसरा
विदर्भः	विदर्भने	रोमपादं	रोमपाद
कुश क्रथौ च	कुश, क्रुथु और	नाम्ना पुत्रौ	नामक पुत्र
विदर्भ	विदर्भके	अजनयत्	उत्पन्न किया ॥१॥
कुलनन्दन	कुलको आनन्दित करनेवाला		

रोमपादसुतो बभ्रुर्बभ्रोः कृतिरजायत ।
उशिकस्तत्सुतस्तस्माच्चेदिश्चैद्यादयो नृप ॥२॥

रोमपाद सुतः बभ्रुः बभ्रोः कृतिः अजायत उशिकः तत् सुतः तस्मात् चेदिः चैद्य आदयः नृप ॥२॥

रोमपाद	रोमपादका	उशिकः	उशिक
सुतः बभ्रुः	पुत्र बभ्रु	तस्मात् चेदिः	उससे चेदि
बभ्रोः कृतिः	बभ्र से कृति	चैद्य आदयः	(उससे) चैद्य आदि
अजायत	उत्पन्न हुआ,	नृप	राजा हुए ॥२॥
तत् सुतः	उसका पुत्र		

क्रथस्य कुन्तिः पुत्रोऽभूद् धृष्टिस्तस्याथ निर्वृतिः ।
ततो दशार्हो नाम्नाभूत् तस्य व्योमः सुतस्ततः ॥३॥

क्रथस्य कुन्तिः पुत्रः अभूत् धृष्टिः तस्य अथ निर्वृतिः ततः दशार्हः नाम्ना अभूत् तस्य व्योमः सुतः ततः ॥३॥

क्रथस्य	क्रथका	ततः दशार्हः	उससे दशार्ह
पुत्रः कुन्तिः	पुत्र कुन्ति	नाम्ना अभूत	नामक पुत्र हुआ,
अभूत्	हुआ,	तस्य	उसका
तस्य धृष्टिः	उसका धृष्टि,	व्योमः सुतः	पुत्र व्योम हुआ
अथ निर्वृतिः	फिर उससे निर्वृति,	ततः	उससे ॥३॥

जीमूतो विकृतिस्तस्य यस्य भीमरथः सुतः ।
ततो नवरथः पुत्रो जातो दशरथस्ततः ॥४॥

जीमूतः विकृतिः तस्य यस्य भीमरथः सुतः ततः नवरथः पुत्रः जातः दशरथः ततः ॥४॥

जीमूतः	जीमूत,	ततः पुत्रः	उसका पुत्र
तस्य विकृतिः	उसका विकृति,	नवरथः	नवरथ,
यस्य सुतः	जिसका पुत्र	ततः दशरथः	उससे दशरथ
भीमरथः	भीमरथ हुआ,	जातः	उत्पन्न हुआ ॥४॥

करम्भिः शकुनेः पुत्रो देवरातस्तदात्मजः ।
देवक्षत्रस्ततस्तस्य मधुः कुरुवशादनुः ॥५॥

करम्भिः शकुनेः पुत्रः देवरातः तत् आत्मजः देवक्षत्रः ततः तस्य मधुः कुरुवशात् अनुः ॥५॥

शकुनेः	(दशरथके पुत्र) शकुनिका	देवक्षत्रः	देवक्षत्र,
		ततः मधुः	उससे मधु,
पुत्रः	पुत्र	तस्य	उसके
करम्भिः	करम्भि,	कुरुवशात्	कुरुवशसे
तत् देवरातः	उससे देवरात,	अनुः	अनु हुआ ॥५॥
आत्मजः	उसका पुत्र		

पुरुहोत्रस्त्वनोः पुत्रस्तस्यायुः सात्वतस्ततः ।
भजमानो भजिर्दिव्यो वृष्णिर्देवावृधोऽन्धकः ॥६॥

पुरुहोत्रः तु अनोः पुत्रः तस्य आयुः सात्वतः ततः भजमानः भजिः दिव्यः वृष्णिः देवावृधः अन्धकः ॥६॥

अनोः पुत्रः तु	अनुका पुत्र तो	भजिः दिव्यः	भजि, दिव्य,
पुरुहोत्रः	पुरुहोत्र हुआ,	वृष्णिः	वृष्णि,
तस्य आयुः	उसका आयु,	देवावृधः	देवावृध,
ततः सात्वतः	उससे सात्वत,	अन्धकः	अन्धक ॥६॥
भजमानः	भजमान,		

सात्वतस्य सुताः सप्त महाभोजश्च मारिष ।
भजमानस्य निम्लोचिः किंकिणो धृष्टिरेव च ॥७॥

सात्वतस्य सुताः सप्त महाभोजः च मारिष भजमानस्य निम्लोचिः किङ्किणः धृष्टिः एव च ॥७॥

मारिष	आर्य परीक्षित !	निम्लोचिः	निम्लोचि,
च महाभोजः	और महाभोज ये	किङ्किणः	किङ्किण
सात्वतस्य	सात्वतके	च धृष्टिः	और धृष्टि भी
सप्त सुताः	सात पुत्र हुए,	एव	हुआ ॥७॥
भजमानस्य	(इनमें) भजमानके		

एकस्यामात्मजाः पत्न्यामन्यस्यां च त्रयः सुताः ।
शताजिच्च सहस्राजिदयुताजिदिति प्रभो ॥८॥

एकस्यां आत्मजाः पत्न्यां अन्यस्यां च त्रयः सुताः शतजित् च सहस्राजित् अयुताजित् इति प्रभुः ॥८॥

एकस्यां	एकमें तो	शतजित्	शतजित्,
आत्मजाः	(ये तीन) पुत्र हुए,	सहस्राजित्	सहस्राजित,
च अन्यस्यां	और दूसरी भी	च अयुताजित्	तथा अयुताजित्
पत्न्यां	पत्नीसे	इति त्रयः सुताः	ये तीन पुत्र हुए ॥८॥
प्रभुः	उस समर्थके		

बभ्रुर्देवावृधसुतस्तयोः श्लोकौ पठन्त्यम् ।
यथैव शृणुमो दूरात् सम्पश्यामस्तथान्तिकात् ॥९॥

बभ्रुः देवावृध सुतः तयोः श्लोकौ पठन्ति अमू यथा एव शृणुमः दूरात् सम्पश्यामः तथा अन्तिकात् ॥९॥

देवावृध	देवावृधका
सुतः बभ्रुः	पुत्र बभ्रु था,
तयोः	उन (पिता पुत्र) दोनोंके
अमू	सम्बन्धमें ये
श्लोकौ पठन्ति	दो श्लोक कहे जाते हैं,
यथा एव	जैसाकि
दूरात् शृणुमः	दूरसे हमने सुना था
तथा	वैसा ही
अन्तिकात्	समीप आकर
सम्पश्यामः	देखते हैं ॥९॥

बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः ।
पुरुषाः पञ्चषष्टिश्च षट् सहस्राणि चाष्ट च ॥१०॥

बभ्रुः श्रेष्ठः मनुष्याणां देवैः देवावृधः समः पुरुषाः पञ्चषष्टिः च षट् सहस्राणि च अष्ट च ॥१०॥

मनुष्याणां	मनुष्योंमें
बभ्रुः श्रेष्ठः	बभ्रु श्रेष्ठ है और
देवावृधः	देवावृध
देवैः	देवताओंके
समः	समान हैं,
षट् सहस्राणि च	छ सहस और
अष्ट	आठ (चौदह सहस्र)
च पञ्चषष्टि	तथा पैंसठ
पुरुषाः	मनुष्य ॥१०॥

येऽमृतत्वमनुप्राप्ता बभ्रोर्देवावृधादपि ।
महाभोजोऽपि धर्मात्मा भोजा आसंस्तदन्वये ॥११॥

ये अमृतत्त्वं अनुप्राप्ता बभ्रोः देवावृधात् अपि महाभोजः अपि धर्मात्मा भोजा आसन् तत् अन्वये ॥११॥

बभ्रोः	बभ्रुसे
देवावृधत् अपि	देवावृधसे भी
ये	(उपदेश पाकर) जो
अमृतत्त्वं	अमर पद
अनुप्राप्ता	प्राप्त हो गये ।
महाभोजः अपि	महाभोज भी
धर्मात्मा	धर्मात्मा थे,
तत् अन्वये	उनके वंशमें
भोजा आसन्	भोजवंशी यादव हुए ॥११॥

वृष्णेः सुमित्रः पुत्रोऽभूद् युधाजिच्च परंतप ।
शिनिस्तस्यानमित्रश्च निम्नोऽभूदनमित्रतः ॥१२॥

वृष्णेः सुमित्रः पुत्रः अभूत् युधाजित् च परंतप शिनिः तस्य अनमित्रः च निम्नः अभूत् अनमित्रतः ॥१२॥

परंतप	शत्रुसंतापक परीक्षित !	**तस्य**	उस (युधाजित) के
वृष्णेः पुत्रः	वृष्णिके पुत्र	**शिनिः**	शिनि
सुमित्रः	सुमित्र	**च अनमित्रः**	और अनमित्र हुए,
च युधाजित्	तथा युधाजित्	**अनमित्रतः**	अनमित्रसे
अभूत्	हुए,	**निम्नः अभूत्**	निम्न हुआ ॥१२॥

सत्राजितः प्रसेनश्च निम्नस्याप्यासतुः सुतौ ।
अनमित्रसुतो योऽन्यः शिनिस्तस्याथ सत्यकः ॥१३॥

सत्राजितः प्रसेनः च निम्नस्य अपि आसतुः सुतौ अनमित्र सुतः यः अन्यः शिनिः तस्य अथ सत्यकः ॥१३॥

निम्नस्य सुतौ	निम्नके दो पुत्र	**यः अन्यः**	जो दूसरा
सत्राजितः	सत्राजित	**सुतः शिनिः**	शिनि था
च प्रसेनः	तथा प्रसेन	**अथ तस्य**	फिर उसका
अपि आसतुः	भी थे,	**सत्यकः**	सत्यक हुआ ॥१३॥
अनमित्र	अनमित्रका		

युयुधानः सात्यकिर्वै जयस्तस्य कुणिस्ततः ।
युगन्धरोऽनमित्रस्य वृष्णिः पुत्रोऽपरस्ततः ॥१४॥

युयुधानः सात्यकिः वै जयः तस्य कुणिः ततः युगन्धरः अनमित्रस्य वृष्णिः पुत्रः अपरः ततः ॥१४॥

वै	(सत्यकका पुत्र) निश्चय	**सात्यकिः**	ही सात्यकि था,
युयुधानः	युयुधान	**तस्य जयः**	उसका जय,
		ततः कुणिः	उससे कुणि

युगन्धरः	(उससे) युगन्धर हुआ,	अपरः पुत्रः	दूसरा एक पुत्र
अनमित्रस्य	अनमित्रका	वृष्णिः ततः	वृष्णि था, उससे ॥१४॥

श्वफल्कश्चित्ररथश्च गान्दिन्यां च श्वफल्कतः ।
अक्रूरप्रमुखा आसन् पुत्रा द्वादश विश्रुताः ॥१५॥

श्वफल्कः चित्ररथः च गान्दिन्यां च श्वफल्कतः अक्रूर प्रमुखा आसन् पुत्रा द्वादश विश्रुताः ॥१५॥

श्वफल्कः	श्वफल्क	अक्रूर प्रमुखा	अक्रूर प्रधान
च चित्ररथः	तथा चित्ररथ हुए	द्वादश विश्रुताः	बारह प्रसिद्ध
श्वफल्कतः च	श्वफल्कसे तो	पुत्रा आसन्	पुत्र थे ॥१५॥
गान्दिन्यां	गान्दिनी नामक पत्नीसे		

आसंगः सारमेयश्च मृदुरो मृदुविद् गिरिः ।
धर्मवृद्धः सुकर्मा च क्षेत्रोपेक्षोऽरिमर्दनः ॥१६॥

आसंगः सारमेयः च मृदुरः मृदुवित् गिरिः धर्मवृद्धः सुधर्मा च क्षेत्रोपेक्षः अरिमर्दनः ॥१६॥

आसंगः	आसंग,	धर्मवृद्धः	धर्मवृद्ध,
सारमेयः	सारमेय,	च सुकर्मा	तथा सुकर्मा
च मृदुरः	तथा मृदुर,	क्षेत्रोपेक्षः	क्षेत्रोपेक्ष
मृदुवित्	मृदुवित्,	अरिमर्दनः	अरिमर्दन ॥१६॥
गिरिः	गिरि,		

शत्रुघ्नो गन्धमादश्च प्रतिबाहुश्च द्वादश ।
तेषां स्वसा सुचीराख्या द्वावक्रूरसुतावपि ॥१७॥

शत्रुघ्नः गन्धमादः च प्रतिबाहुः च द्वादश तेषां स्वसा सुचीरा आख्या द्वाः अक्रूर सुताः अपि ॥१७॥

शत्रुघ्नः	शत्रुघ्न और
गन्धमादः	गन्धमाद
च प्रतिबाहुः	तथा प्रतिबाहु
द्वादश	ये बारह थे,
तेषां स्वसा	उनकी बहिन
सुचीरा	सुचीरा
आख्या	नामक थी;
अक्रूर सुताः	अक्रूरके पुत्र
अपि द्वाः	भी दो थे ॥१७॥

देववानुपदेवश्च तथा चित्ररथात्मजाः ।
पृथुर्विदूरथाद्याश्च बहवो वृष्णिनन्दनाः ॥१८॥

देववान् उपदेवः च तथा चित्ररथ आत्मजाः पृथुः विदूरथ आद्याः च बहवः वृष्णिनन्दनाः ॥१८॥

देववान्	देववान्
च उपदेवः	तथा उपदेव
तथा	ऐसे ही
चित्ररथ	(श्वफल्कके भाई) चित्ररथके
बहवः	बहुतसे
आत्मजाः	पुत्र
वृष्णिनन्दनाः	वृष्णिवंशी थे ॥१८॥

कुकुरो भजमानश्च शुचिः कम्बलबर्हिषः ।
कुकुरस्य सुतो वह्निर्विलोमा तनयस्ततः ॥१९॥

कुकुरः भजमानः च शुचिः कम्बलबर्हिषः कुकुरस्य सुतः वह्निः विलोमा तनयः ततः ॥१९॥

कुकुरः	(सात्वत पुत्र अन्धकके) कुकुर,
भजमानः	भजमान,
शुचिः च	शुचि और
कम्बलबर्हिषः	कम्बलबर्हि हुए
कुकुरस्य	कुकुरका
सुतः वह्निः	पुत्र वह्नि,
तनयः	उसका पुत्र
विलोमा	विलोमा,
ततः	उससे ॥१९॥

कपोतरोमा तस्यानुः सखा य य च तुम्बुरुः ।
अन्धको दुन्दुभिस्तस्मादरिद्योतः पुनर्वसुः ॥२०॥

कपोतरोमा तस्य अनुः सखा यस्य च तुम्बुरुः अन्धकः दुन्दुभिः तस्मात् अरिद्योतः पुनर्वसुः ॥२०॥

कपोतरोमा	कपोतरोमा,
तस्य अनुः	उसका अनु
यस्य च	जिसका तो
सखा	सखा
तुम्बुरुः	तुम्बुरू गन्धर्व था,
अन्धकः	उसका अन्धक,
तस्मात्	उससे
दुन्दुभिः	दुन्दुभि
अरिद्योतः	(उसका) अरिद्योत,
पुनर्वसुः	(उससे) पुनर्वसु हुआ ॥२०॥

तस्याहुकश्चाहुकी च कन्या चैवाहुकात्मजौ ।
देवकश्चोग्रसेनश्च चत्वारो देवकात्मजाः ॥२१॥

तस्य आहुकः च आहुकी च कन्या च एव आहुक आत्मजौ देवकः च उग्रसेनः च चत्वारः देवक आत्मजाः ॥२१॥

तस्य च	उसके भी
आहुकः च	आहुक तथा
आहुकी कन्या	आहुकी नामक कन्या
एव च	भी हुई,
आहुक	आहुकके
आत्मजौ	पुत्र
देवकः च	देवक तथा
उग्रसेनः	उग्रसेन हुए
देवक च	देवकके भी
आत्मजाः	पुत्र
चत्वारः	चार हुए ॥२१॥

देववानुपदेवश्च सुदेवो देववर्धनः ।
तेषां स्वसारः सप्तासन् धृतदेवादयो नृप ॥२२॥

देववान् उपदेवः च सुदेवः देववर्धनः तेषां स्वसारः सप्त आसन् धृतदेवा आदयः नृप ॥२२॥

नृप	राजन् !
देववान्	देववान्,
उपदेवः	उपदेव,
सुदेवः च	सुदेव तथा
देववर्धनः	देववर्धन,
तेषां स्वसारः	उनकी बहिनें
धृतदेवा	धृतदेवा
आदयः	आदि
सप्त आसन्	सात थीं ॥२२॥

शान्तिदेवोपदेवा च श्रीदेवा देवरक्षिता ।
सहदेवा देवकी च वसुदेव उवाह ताः ॥२३॥

शान्तिदेवा उपदेवा च श्रीदेवा देवरक्षिता सहदेवा देवकी च वसुदेव उवाह ताः ॥२३॥

शान्तिदेवा	शान्तिदेवा,	सहदेवा च	सहदेवा तथा
च उपदेवा	तथा उपदेवा,	देवकी	देवकी
श्रीदेवा	श्रीदेवा,	ताः वसुदेव	उनसे वसुदेवने
देवरक्षिता	देवरक्षिता	उवाह	विवाह किया ॥२३॥

कंसः सुनामा न्यग्रोधः कंकः शंकुः सुहूस्तथा ।
राष्ट्रपालोऽथ सृष्टिश्च तुष्टिमानौग्रसेनयः ॥२४॥

कंसः सुनामा न्यग्रोधः कङ्कः शंकुः सुहुः तथा राष्ट्रपालः अथ सृष्टिः च तुष्टिमान् औग्रसेनयः ॥२४॥

कंसः सुनामा	कंस, सुनामा,	अथ सृष्टिः	और सृष्टि,
न्यग्रोधः कङ्कः	न्यग्रोध, कंक,	च तुष्टिमान्	एवं तुष्टिमान्,
शंकुः सुहुः	शंकु, सुहु,	औग्रसेनयः	उग्रसेनके पुत्र
तथा	तथा		थे ॥२४॥
राष्ट्रपालः	राष्ट्रपाल,		

कंसा कंसवती कंका शूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रियः ॥२५॥

कंसा कंसवती कङ्का शूरभू राष्ट्रपालिका उग्रसेन दुहितरः वसुदेव अनुजः स्त्रियः ॥२५॥

कंसा कंसवती	कंसा, कंसवती,	दुहितरः	पुत्रियां
कङ्का शूरभू	कंका, शूरभू,	वसुदेव	वसुदेवजीके
राष्ट्रपालिका	राष्ट्रपालिका ये	अनुजः	छोटे भाइयोंकी
उग्रसेन	उग्रसेनकी	स्त्रियः	स्त्रियां थीं ॥२५॥

शूरो विदूरथादासीद् भजमानः सुतस्ततः ।
शिनिस्तस्मात् स्वयम्भोजो हृदीकस्तत्सुतो मतः ॥२६॥

शूरः विदूरथात् आसीत् भजमानः सुतः ततः शिनिः तस्मात् स्वयंभोजः हृदीकः तत् सुतः मतः ॥२६॥

विदूरथात्	(चित्ररथके पुत्र) विदूरथसे	ततः शिनिः	उसका शिनि,
शूरः आसीत्	शूर हुआ था,	तस्मात्	उससे
सुतः	उसका पुत्र	स्वयंभोजः	स्वयंभोज,
भजमानः	भजमान,	तत् मतः सुतः	उसका प्रिय पुत्र
		हृदीकः	हृदीक हुआ ॥२६॥

देवबाहुः शतधनुः कृतवर्मेति तत्सुताः ।
देवमीढस्य शूरस्य मारिषा नाम पत्न्यभूत् ॥२७॥

देवबाहुः शतधनुः कृतवर्मा इति तत् सुताः देवमीढस्य शूरस्य मारिषा नाम पत्नि अभूत् ॥२७॥

तत् सुताः	उसके पुत्र	देवमीढस्य	देवमीढके पुत्र
देवबाहुः	देवबाहु	शूरस्य	शूरकी
शतधनुः	शतधन्वा	मारिषा नाम	मारिषा नामकी
कृतवर्मा	कृतवर्मा	पत्नि अभूत्	पत्नी थी ॥२७॥
इति	इस प्रकार (तीन) थे ।		

तस्यां स जनयामास दश पुत्रानकल्मषान् ।
वसुदेवं देवभागं देवश्रवसमानकम् ॥२८॥

तस्यां स जनयामास दश पुत्रान् अकल्मषान् वसुदेवं देवभागं देवश्रवसं आनकम् ॥२८॥

स तस्यां	उन्होंने उसमें	वसुदेवं	वसुदेव,
अकल्मषान्	निष्पाप	देवभागं	देवभाग,
दश पुत्रान्	दस पुत्र	देवश्रवसं	देवश्रव
जनयामास	उत्पन्न किये,	आनकं	आनक ॥२८॥

सृञ्जयं श्यामकं कंकं शमीकं वत्सकं वृकम् ।
देवदुन्दुभयो नेदुरानका यस्य जन्मनि ॥२९॥

सृञ्जयं श्यामकं कङ्कं शमीकं वत्सकं वृकं देवदुन्दुभयः नेदुः आनका यस्य जन्मनि ॥२६॥

सृञ्जयं	सृञ्जय,
श्यामकं	श्यामक
कङ्कं शमीकं	कंक, शमीक,
वत्सकं वृकं	वत्सक और वृक,
यस्य जन्मनि	जिसके जन्मके समय
देव-	देवताओंकी
दुन्दुभयः	दुन्दुभियां और
आनका नेदुः	नौबत बजने लगी थी ॥२६॥

वसुदेवं हरेः स्थानं वदन्त्यानकदुन्दुभिम् ।
पृथा च श्रुतदेवा च श्रुतकीर्तिः श्रुतश्रवाः ॥३०॥

वसुदेवं हरेः स्थानं वदन्ति आनकदुन्दुभिं पृथा च श्रुतदेवा च श्रुतिकीर्तिः श्रुतश्रवाः ॥३०॥

हरेः	श्रीहरिके
स्थानं	जन्मस्थान रूप
वसुदेवं	वसुदेवजीको
आनकदुन्दुभिं	आनकदुन्दुभि
वदन्ति	कहते हैं
पृथा च	पृथा और
श्रुतदेवा	श्रुतदेवा,
च श्रुतकीर्तिः	तथा श्रुतकीर्ति,
श्रुतश्रवाः	श्रुतश्रवा ॥३०॥

राजाधिदेवी चैतेषां भगिन्यः पञ्च कन्यकाः ।
कुन्तेः सख्युः पिता शूरो ह्यपुत्रस्य पृथामदात् ॥३१॥

राजाधिदेवी च एतेषां भगिन्यः पञ्च कन्यकाः कुन्तेः सख्युः पिता शूरः हि अपुत्रस्य पृथां अदात् ॥३१॥

च	और
राजाधिदेवी	राजाधिदेवी
पञ्च कन्यकाः	ये पांच कन्याएँ
एतेषां	इन (वसुदेव आदि) की
भगिन्यः	बहिनें थीं
पिता शूरः	इनके पिता शूरने
सख्युः	अपने सखा
कुन्तेः	कुन्तिभोजको
हि	क्योंकि वे
अपुत्रस्य	पुत्रहीन थे
पृथां	पृथाको
अदात्	(गोद) दे दिया ॥३१॥

साऽऽप दुर्वाससो विद्यां देवहूतीं प्रतोषितात् ।
तस्या वीर्यपरीक्षार्थमाजुहाव रविं शुचिम् ॥३२॥

स आप दुर्वाससः विद्यां देवहूतीं प्रतोषितात् तस्या वीर्य परीक्षार्थं आजुहाव रविं शुचिम् ॥३२॥

प्रतोषितात्	सन्तुष्ट किए हुए	तस्या वीर्य	उस (विद्या) के प्रभावका
दुर्वाससः	दुर्वासा ऋषिसे	परीक्षार्थं	परीक्षण करनेके लिए
स	उसने	शुचिं	शुद्ध स्वरूप
देवहूतिं	देवताओंको बुलाने-वाला	रविं	सूर्यका
विद्यां आप	विद्या प्राप्त की,	आजुहाव	आवाहन किया ॥३२॥

तदैवोपागतं देवं वीक्ष्य विस्मितमानसा ।
प्रत्ययार्थं प्रयुक्ता मे याहि देव क्षमस्व मे ॥३३॥

तत् एव उप आगतं देवं वीक्ष्य विस्मित मानसा प्रत्यय अर्थं प्रयुक्ता मे याहि देव क्षमस्व मे ॥३३॥

तत् एव	उसी समय	क्षमस्व	क्षमा करें और
उप आगतं	समीप आये	याहि	चले जायँ,
देवं वीक्ष्य	सूर्यदेवको देखकर	मे प्रत्यय अर्थं	मैंने परीक्षाके लिए
विस्मित	चकित	प्रयुक्ता	(विद्याका) प्रयोग किया' ॥३३॥
मानसा	चित्त बोली		
देव मे	'देव' मुझे		

अमोघं दर्शनं देवि आधित्से त्वयि चात्मजम् ।
योनिर्यथा न दुष्येत कर्ताहं ते सुमध्यमे ॥३४॥

अमोघं दर्शनं देवि आधित्से त्वयि च आत्मजं योनिः यथा न दुष्येत कर्ता अहं ते सुमध्यमे ॥३४॥

देवि	(सूर्यने कहा) देवि,!	दुष्येत न	दूषित न हो,
दर्शनं	मेरा दर्शन	अहं कर्ता	मैं उस प्रकार करके
अमोघं	अव्यर्थ होता है,	त्वयि आत्मजं	तुममें पुत्र
सुमध्यमे	(अतः) सुन्दरी !	आधित्से	आधान करूँगा'
यथा ते योनिः	जैसे तुम्हारी योनि		॥३४॥

इति तस्यां स आधाय गर्भं सूर्यो दिवं गतः ।
सद्यः कुमारः संजज्ञे द्वितीय इव भास्करः ॥३५॥

इति तस्यां स आधाय गर्भं सूर्यः दिवं गतः सद्यः कुमारः सञ्जज्ञे द्वितीय इव भास्करः ॥३५॥

इति	इस प्रकार कहकर	द्वितीय	दूसरे
स सूर्यः	वे सूर्यदेव	भास्करः	सूर्यके
तस्यां	उसमें	इव कुमारः	समान कुमार
गर्भं आधाय	गर्भाधान करके	सद्यः सञ्जज्ञे	तुरन्त उत्पन्न हुआ
दिवं गतः	स्वर्ग चले गये,		॥३५॥

तं सात्यजन्नदीतोये कृच्छ्राल्लोकस्य बिभ्यती ।
प्रपितामहस्तामुवाह पाण्डुर्वै सत्यविक्रमः ॥३६॥

तं सा अत्यजन् नदी तोये कृच्छ्रात् लोकस्य बिभ्यती प्रपितामहः तां उवाह पाण्डुः वै सत्यविक्रमः ॥३६॥

सा तं	उसने उस (बालक) को	वै	निश्चय
		सत्यविक्रमः	सत्य-पराक्रम
लोकस्य	लोकलज्जासे	प्रपितामहः	तुम्हारे प्रपितामह
विभ्यती	डरकर	पाण्डुः	पाण्डुने
कृच्छ्रात्	बड़े कष्टसे	तां	उससे
नदी तोये	नदीके जलमें	उवाह	विवाह किया ॥३६॥
अत्यजन्	त्याग दिया		

श्रुतदेवां तु कारूषो वृद्धशर्मा समग्रहीत् ।
यस्यामभूद् दन्तवक्त्र ऋषिशप्तो दितेः सुतः ॥३७॥

श्रुतदेवां तु कारूषः वृद्धशर्मा समग्रहीत् यस्यां अभूत् दन्तवक्त्र ऋषिशप्तः दितेः सुतः ॥३७॥

कारूषः	करूष नरेश
वृद्धशर्मा तु	वृद्धशर्माने तो
श्रुतदेवां	श्रुतदेवाको
समग्रहीत्	ग्रहण किया,
यस्यां	जिसमें
ऋषिशप्तः	(पूर्व जन्ममें सनकादि) ऋषियोंसे प्रशप्त
दितेः सुतः	दितिपुत्र (हिरण्याक्ष)
दन्तवक्त्र अभूत्	दन्तवक्त्र उत्पन्न हुआ ॥३७॥

कैकेयो धृष्टकेतुश्च श्रुतकीर्तिमविन्दत ।
सन्तर्दनादयस्तस्य पञ्चासन् कैकयाः सुताः ॥३८॥

कैकेयः धृष्टकेतुः च श्रुतिकीर्तिम् अविन्दत सन्तर्दन आदयः तस्य पञ्च आसन् कैकयाः सुताः ॥३८॥

कैकयः	कैकय नरेश
धृष्टकेतुः च	धृष्टकेतुने तो
श्रुतिकीर्तिम्	श्रुतिकीर्तिको
अविन्दत	प्राप्त किया
तस्य	उसके
सन्तर्दन आदयः	सन्तर्दन आदि
पञ्च सुताः	पांच पुत्र
कैकयाः आसन्	कैकय-कुमार हुए ॥३८॥

राजाधिदेव्यामावन्त्यौ जयसेनोऽजनिष्ट ह ।
दमघोषश्चेदिराजः श्रुतश्रवसमग्रहीत् ॥३९॥

राजाधिदेव्यां आवन्त्यौ जयसेनः अजनिष्ट ह दमघोषः चेदिराजः श्रुतश्रवसं अग्रहीत् ॥३९॥

राजाधिदेव्यां	राजाधिदेवीसे
जयसेनः ह	जयसेनने तो
आवन्त्यौ	अवन्ति नरेश (विन्द-अनुविन्द) दो
अजनिष्ट	उत्पन्न किये,
चेदिराजः	चेदिदेश-नरेश
दमघोषः	दमघोषने
श्रुतश्रवसं	श्रुतश्रवाका
अग्रहीत्	पाणिग्रहण किया ॥३९॥

शिशुपालः सुतस्तस्याः कथितस्तस्य सम्भवः ।
देवभागस्य कंसायां चित्रकेतुवृहद्बलौ ॥४०॥

शिशुपालः सुतः तस्याः कथितः तस्य सम्भवः देवभागस्य कंसायां चित्रकेतुः वृहद्बलौ ॥४०॥

तस्याः सुतः	उसका पुत्र	देवभागस्य	देवभागके
शिशुपालः	शिशुपाल था,	कंसायां	कंसासे
तस्य सम्भवः	उसका जन्म वृत्तान्त	चित्रकेतुः	चित्रकेतु तथा
कथितः	पहिले कह चुके हैं, (वसुदेवानुज)	वृहद्बलौ	वृहद्बल हुए ॥४०॥

कंसवत्यां देवश्रवसः सुवीर इषुमांस्तथा ।
कंकायामानकाज्जातः सत्यजित् पुरुजित् तथा ॥४१॥

कंसवत्यां देवश्रवसः सुवीर इषुमान् तथा कङ्कायां आनकात् जातः सत्यजित् पुरुजित् तथा ॥४१॥

देवश्रवसः	देवश्रवाने	आनकात्	आनकसे
कंसवत्यां	कंसवतीसे	कङ्कायां	कंकामें
सुवीर	सुवीर	सत्यजित्	सत्यजित्
इषुमान्	इषुमान्	तथा पुरुजि	और पुरुजित्
तथा	इसी प्रकार	जातः	उत्पन्न हुए ॥४१॥

सृञ्जयो राष्ट्रपाल्यां च वृषदुर्मर्षणादिकान् ।
हरिकेशहिरण्याक्षौ शूरभूम्यां च श्यामकः ॥४२॥

सृञ्जयः राष्ट्रपाल्यां च वृष दुर्मर्षण आदिकान् हरिकेश हिरण्याक्षौ शूरभूम्यां च श्यामकः ॥४२॥

सृञ्जयः	सृञ्जयने	श्यामकः	श्यामकने
राष्ट्रपाल्यां	राष्ट्रपालिकासे	शूरभूम्यां	शूरभूसे
वृष च	वृष और	हरिकेश	हरिकेश,
दुर्मर्षण	दुर्मर्षण	हिरण्याक्षौ	हिरण्याक्षको उत्पन्न किया ॥४२॥
आदिकान्	आदिको और		

मिश्रकेश्यामप्सरसि वृकादीन् वत्सकस्तथा ।
तक्षपुष्करशालादीन् दुर्वाक्ष्यां वृक आदधे ॥४३॥

मिश्रकेश्यां अप्सरसि वृक आदीन् वत्सकः तथा तक्ष पुष्कर शाल आदीन् दुर्वाक्ष्यां वृक आदधे ॥४३॥

वत्सकः	वत्सकने	वृक	वृकने
मिश्रकेश्यां	मिश्रकेशी	तक्ष पुष्कर	तक्ष, पुष्कर,
अप्सरसि	अप्सरासे	शाल आदीन्	शाल आदिको
वृक आदीन्	वृक आदिको	आदधे	आधान (उत्पन्न)
तथा	इसी प्रकार		किया ॥४३॥
दुर्वाक्ष्यां	दूर्वाक्षीसे		

सुमित्रार्जुनपालादीञ्छमीकात्तु सुदामिनी ।
कंकश्च कर्णिकायां वै ऋतधामजयावपि ॥४४॥

सुमित्र अर्जुनपाल आदीन् शमीकात् तु सुदामिनी कङ्कः च कर्णिकायां वै ऋतधाम जयाः अपि ॥४४॥

शमीकात्	शमीकसे	च कङ्कः	और कंकने
सुदामिनी	सुदामिनीने	वै कर्णिकायां	निश्चय कर्णिकासे
सुमित्र	सुमित्र,	ऋतधाम	ऋतधाम एवं
अर्जुनपाल	अर्जुनपाल	जयाः अपि	जयको भी
आदीन्	आदिको		उत्पन्न किया ॥४४॥

पौरवी रोहिणी भद्रा मदिरा रोचना इला ।
देवकीप्रमुखा आसन् पत्न्य आनकदुन्दुभेः ॥४५॥

पौरवी रोहिणी भद्रा मदिरा रोचना इला देवकी प्रमुखा आसन् पत्न्य आनक दुन्दुभेः ॥४५॥

आनक	आनक	पौरवी राहिणी	पौरवी, रोहिणी,
दुन्दुभेः	दुन्दुभि वसुदेवजीकी	भद्रा मदिरा	भद्रा, मदिरा,
पत्न्य	पत्नियां	रोचना इला	रोचना, इला आदि
देवकी	जिनमें देवकी	आसन्	थीं ॥४५॥
प्रमुखा	मुख्य थीं		

बलं गदं सारणं च दुर्मदं विपुलं ध्रुवम् ।
वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ॥४६॥

बलं गदं सारणं च दुर्मदं विपुलं ध्रुवं वसुदेवः तु रोहिण्यां कृत आदीन् उदपादयत् ॥४६॥

वसुदेवः तु	वसुदेवजीने तो	विपुलं ध्रुवं	विपुल, ध्रुव,
रोहिण्यां	रोहिणीसे	च कृत	तथा कृत
बलं गदं	बल, गद,	आदीन्	आदिको
सारणं दुर्मदं	सारण, दुर्मद,	उदपादयत्	उत्पन्न किया ॥४६॥

सुभद्रो भद्रबाहश्च दुर्मदो भद्र एव च ।
पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन् ॥४७॥

सुभद्रः भद्रबाहः च दुर्मदः भद्र एव च पौरव्याः तनया हि एते भूत आद्या द्वादशा अभवन् ॥४७॥

सुभद्रः	सुभद्र	भूत आद्या	भूत आदि
भद्रबाहः	भद्रवाह	एते हि द्वादशा	ये सब बारह
च दुर्मदः	तथा दुर्मन	पौरव्या तनया	पौरवीके पुत्र
च भद्र एव	और भद्र भी	अभवन्	हुए ॥४७॥

नन्दोपनन्दकृतकशूराद्या मदिरात्मजाः ।
कौसल्या केशिनं त्वेकमसूत कुलनन्दनम् ॥४८॥

नन्द उपनन्द कृतक शूर आद्या मदिरा आत्मजाः कौसल्या केशिनं तु एकं असूत कुलनन्दनम् ॥४८॥

नन्द उपनन्द	नन्द उपनन्द	कौसल्या तु	कौसल्याने तो
कृतक शूर	कृतक शूर	कुलनन्दनं	कुलको आनन्दित करनेवाला
आद्या	आदि	एकं केशिनं	एक केशीको ही
मदिरा	मदिराके	असूत	उत्पन्न किया ॥४८॥
आत्मजाः	पुत्र हुए		

रोचनायामतो जाता हस्तहेमाङ्गदादयः ।
इलायामुरुवल्कादीन् यदुमुख्यानजीजनत् ॥४९॥

रोचनायां अतः जाता हस्त हेमांगद आदयः इलायां उरु वल्क आदीन् यदुमुख्यान् अजीजनत् ॥४९॥

अतः रोचनायां	फिर रोचनासे
हस्त हेमांगद	हस्त, हेमाङ्गद
आदयः जाता	आदि उत्पन्न हुए
इलायां	इलासे
उरु वल्क	उरु, वल्क
आदीन्	आदि
यदुमुख्यान्	यादव प्रमुखोंको
अजीजनत्	उत्पन्न किया ॥४९॥

विपृष्ठो धृतदेवायामेक आनकदुन्दुभेः ।
शान्तिदेवात्मजा राजञ्छ्रुमप्रतिश्रुतादयः ॥५०॥

विपृष्ठः धृतदेवायां एक आनक दुन्दुभेः शान्तिदेवा आत्मजा राजन् श्रुम प्रतिश्रुत आदयः ॥५०॥

राजन्	राजन्
आनक दुन्दुभेः	वसुदेवजीके
धृतदेवायां	धृतदेवासे
एक विपृष्ठः	अकेला विपृष्ट हुआ
शान्तिदेवा	शान्तिदेवाके
आत्मजा	पुत्र
श्रुम प्रतिश्रुत	श्रुम, प्रतिश्रुत
आदयः	आदि थे ॥५०॥

राजानः कल्पवर्षाद्या उपदेवासुता दश ।
वसुहंससुवंशाद्याः श्रीदेवायास्तु षट् सुताः ॥५१॥

राजानः कल्पवर्ष आद्याः उपदेवा सुता दश वसु हंस सुवंश आद्याः श्रीदेवायाः तु षट् सुताः ॥५१॥

कल्पवर्ष	कल्प, वर्ष
आद्याः राजानः	आदि राजा
उपदेवा	उपदेवाके
दश सुता	दस पुत्र थे
श्रीदेवायाः	श्रीदेवाके
वसु हंस	वसु, हंस
सुवंश आद्याः	सुवंश आदि
षट् सुताः	छः पुत्र हुए ॥५१॥

देवरक्षितया लब्धा नव चात्र गदादयः ।
वसुदेवः सुतानष्टावादधे सहदेवया ॥५२॥

देवरक्षितया लब्धा नव च अत्र गद आदयः वसुदेवः सुतान् अष्टा: आदधे सहदेवया ॥५२॥

देवरक्षितया	देवरक्षिताने	वसुदेवः	वसुदेवजीने
अत्र नव	यहाँ नौ	सहदेवया	सहदेवीमें
गद आदयः	गद आदि	अष्टान् सुतान्	आठ पुत्रोंको
लब्धा	पुत्र पाये	आदधे	उत्पन्न किया ॥५२॥

पुरुविश्रुतमुख्यांस्तु साक्षाद् धर्मो वसूनिव ।
वसुदेवस्तु देवक्यामष्ट पुत्रानजीजनत् ॥५३॥

पुरु विश्रुत मुख्यान् तु साक्षात् धर्मः वसून् इव वसुदेवः तु देवक्यां अष्ट पुत्रान् अजीजनत् ॥५३॥

साक्षात् धर्मः	साक्षात् धर्मसे	वसुदेवः तु	वसुदेवजीने तो
वसून् इव	(आठ) वसुओंकी भांति	देवक्यां	देवकीसे
		अष्ट पुत्रान्	आठ पुत्रोंको
पुरु विश्रुत	पुरु, विश्रुत	अजीजनत्	उत्पन्न किया ॥५३॥
मुख्यान् तु	प्रमुखोंको		

कीर्तिमन्तं सुषेणं च भद्रसेनमुदारधीः ।
ऋजुं सम्मर्दनं भद्रं संकर्षणमहीश्वरम् ॥५४॥

कीर्तिमन्तं सुषेणं च भद्रसेनं उदारधीः ऋजुं सम्मर्दनं भद्रं संकर्षणं महीश्वरम् ॥५४॥

कीर्तिमन्तं	कीर्तिमान,	सम्मर्दनं	सम्मर्दन
सुषेणं	सुषेण	भद्रं	भद्र
उदारधीः	उदार बुद्धि	च महीश्वरं	तथा पृथ्वीश्वर
भद्रसेनं	भद्रसेन	सङ्कर्षणं	संकर्षण को ॥५४॥
ऋजुं	ऋजु		

अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल ।
सुभद्रा च महाभागा तव राजन् पितामही ॥५५॥

अष्टमः तु तयोः आसीत् स्वयं एव हरिः किल सुभद्रा च महाभागा तव राजन् पितामही ॥५५॥

तयोः	उनमें
अष्टमः तु	आठवें तो
किल स्वयं एव	अहो स्वयं ही
हरिः आसीत्	श्रीहरि हो गये,
राजन् तव	राजन् तुम्हारी
पितामही	पितामही
महा भागा	महाभागा
सुभद्रा च	सुभद्रा भी (देवकीसे) हुईं ॥५५॥

यदा यदेह धर्मस्य क्षयो वृद्धिश्च पाप्मनः ।
तदा तु भगवानीश आत्मानं सृजते हरिः ॥५६॥

यदा यदा इह धर्मस्य क्षयः वृद्धिः च पाप्मनः तदा तु भगवान् ईशः आत्मानं सृजते हरिः ॥५६॥

इह यदा यदा	इस संसारमें जब-जब
धर्मस्य क्षयः	धर्मका ह्रास
च पाप्मनः	तथा पापकी
वृद्धिः	वृद्धि होती है
तदा तु	तभी ही
ईशः भगवान्	सर्व समर्थ भगवान
हरिः आत्मानं	श्रीहरि अपनेको
सृजते	प्रकट करते हैं ॥५६॥

न ह्यस्य जन्मनो हेतुः कर्मणो वा महीपते ।
आत्ममायां विनेशस्य परस्य द्रष्टुरात्मनः ॥५७॥

न हि अस्य जन्मनः हेतुः कर्मणः वा महीपते आत्ममायां विना ईशस्य परस्य द्रष्टुः आत्मनः ॥५७॥

महीपते	पृथ्वीपते
ईशस्य द्रष्टुः	सर्वनियन्ता साक्षी
आत्मनः	अन्तरात्मा स्वरूप
हि अस्य	क्योंकि इन
परस्य	परमात्माका
आत्ममायां	अपनी मायाको
विना	छोड़कर
जन्मनः	जन्मका
वा कर्मणः	अथवा कर्मका
हेतुः न	कोई कारण नहीं है ॥५७॥

यन्मायाचेष्टितं पुंसः स्थित्युत्पत्त्यप्ययाय हि ।
अनुग्रहस्तन्निवृत्तेरात्मलाभाय चेष्यते ॥५८॥

यत् माया चेष्टितं पुंसः स्थिति उत्पत्ति अप्ययाय हि अनुग्रहः तत् निवृत्तेः आत्मलाभाय च ईष्यते ॥५८॥

यत् माया	जिनकी मायाका	निवृत्तः च	मुक्तिका और
चेष्टितं पुंसः	विलास जीवकी	आत्मलाभाय	आत्म-स्वरूपकी प्राप्ति का
स्थिति उत्पत्ति	स्थिति जन्म	ईष्यते	हेतु होता है ॥५८॥
अप्ययाय हि	मरणका भी हेतु है		
तत् अनुग्रहः	उन्हीं का अनुग्रह		

अक्षौहिणीनां पतिभिरसुरैर्नृपलाञ्छनैः ।
भुव आक्रम्यमाणाया अभाराय कृतोद्यमः ॥५९॥

अक्षौहिणीनां पतिभिः असुरैः नृपलाञ्छनैः भुव आक्रम्यमाणाया अभाराय कृतः उद्यमः ॥५९॥

अक्षौहिणीनां	अनेक अक्षौहिणी सेनाके	आक्रम्यमाणाया	आक्रान्त होनेपर
		अभाराय	इसे भारहीन करनेका
पतिभिः	स्वामियों		
नृपलाञ्छनैः	राजचिह्नधारी	उद्यमः	(भगवानने) प्रयत्न
असुरैः	असुरों द्वारा	कृतः	किया ॥५९॥
भुव	पृथ्वीके		

कर्माण्यपरिमेयाणि मनसापि सुरेश्वरैः ।
सहसंकर्षणश्चक्रे भगवान् मधुसूदनः ॥६०॥

कर्माणि अपरिमेयाणि मनसा अपि सुरेश्वरैः सह सङ्कर्षणः चक्रे भगवान् मधुसूदनः ॥६०॥

सुरेश्वरैः	देवेश्वर गणों द्वारा	भगवान्	भगवान
मनसा अपि	मनसे भी	मधुसूदनः	मधुसूदनने
अपरिमेयाणि	अनुमानसे परे	सह संकर्षणः	संकर्षणजीके साथ
कर्माणि	कर्मोंको	चक्रे	किया ॥६०॥

कलौ जनिष्यमाणानां दुःखशोकतमोनुदम् ।
अनुग्रहाय भक्तानां सुपुण्यं व्यतनोद् यशः ॥६१॥

कलौ जनिष्यमाणानां दुःख शोक तमः नुदं अनुग्रहाय भक्तानां सुपुण्यं व्यतनोत् यशं ॥६१॥

कलौ	कलियुगमें	नुदं	नाशक
जनिष्यमाणानां	उत्पन्न होनेवाले	सुपुण्यं	अपने अत्यन्त पवित्र
भक्तानां	भक्तोंपर	यशः	यशका
अनुग्रहाय	अनुग्रह करके	व्यतनोत्	विस्तार किया ॥६१॥
दुःख शोक	दुःख, शोक,		
तमः	तथा अज्ञानका		

यस्मिन् सत्कर्णपीयूषे यशस्तीर्थवरे सकृत् ।
श्रोत्राञ्जलिरुपस्पृश्य धुनुते कर्मवासनाम् ॥६२॥

यस्मिन् सत् कर्ण पीयूषे यशः तीर्थवरे सकृत् श्रोत अञ्जलिः उपस्पृश्य धुनुते कर्मवासनाम् ॥६२॥

सत्	सत्पुरुषोंके	कर्ण	कानरूपी
कर्ण	कानोंके लिए	अञ्जलिः	अञ्जलिसे
पीयूषे	अमृतके समान	उपस्पृश्य	पान करके
यस्मिन्	जिस	कर्मवासनां	(मनुष्य) कर्मवासना-को
यशः	यशरूपी		
तीर्थवरे	तीर्थ-श्रेष्ठमें	धुनुते	नष्ट कर देता है ॥६२॥
सकृत्	एक बार भी		

भोजवृष्ण्यन्धकमधुशूरसेनदशार्हकैः ।
श्लाघनीयेहितः शश्वत् कुरुसृञ्जयपाण्डुभिः ॥६३॥

भोज वृष्णि अन्धक मधु शूरसेन दशार्हकैः श्लाघनीय ईहितः शश्वत् कुरु सृञ्जय पाण्डुभिः ॥६३॥

भोज वृष्णि	भोज, वृष्णि,	शूरसेन	शूरसेन,
अन्धक मधु	अन्धक, मधु,	दशार्हकैः	दशार्हों द्वारा तथा

कुरु सृञ्जय	कुरु, सृञ्जय	शश्वत्	निरन्तर
पाण्डुभिः	पाण्डुवंशीयों द्वारा भी	श्लाघनीय	प्रशंसित होती थीं ॥६३॥
ईहितः	(जिनकी) लीलायें		

स्निग्धस्मितेक्षितोदारैर्वाक्यैर्विक्रमलीलया ।
नृलोकं रमयामास मूर्त्या सर्वाङ्गरम्यया ॥६४॥

स्निग्ध स्मित् ईक्षित उदारैः वाक्यैः विक्रम लीलया नृलोकं रमयामास मूर्त्या सर्वाङ्ग रम्यया ॥६४॥

स्निग्ध	प्रेम भरी	सर्वांग	सर्वाङ्ग
स्मित्	मुसुकान,	रम्यया	रमणीय
उदारैः	कृपापूर्ण	मूर्त्या	अपने स्वरूपसे
ईक्षित	दृष्टि,	नृलोकं	मानव-समाजको
वाक्यैः	अपने वचनों,	रमयामास	आनन्दित किया ॥६४॥
विक्रम	पराक्रम,		
लीलया	चरित तथा		

यस्याननं मकरकुण्डलचारुकर्ण-
भ्राजत्कपोलसुभगं सविलासहासम् ।
नित्योत्सवं न ततृपुर्दृशिभिः पिबन्त्यो
नार्यो नराश्च मुदिताः कुपिता निमेश्च ॥६५॥

यस्य आननं मकर कुण्डल चारुकर्ण भ्राजत् कपोल सभगं सविलास हासं नित्य उत्सवं न ततृपुः दृशिभिः पिबन्त्यः नार्यः नराः च मुदिताः कुपिता निमेः च ॥६५॥

मकर-	मकरा कृति	सविलास	उत्तम विलासपूर्ण
कुण्डल	कुण्डलोंसे युक्त	हासं	हास्यवाले
चारुकर्ण	सुन्दर कर्णों,	नित्य उत्सवं	नित्य प्रफुल्लित
भ्राजत् कपोल	कान्तिमय कपोलोंसे	यस्य आननं	जिनके श्रीमुखको
सुभगं	सुशोभित	दृशिभिः	आँखोंसे

पिबन्त्यः	पीते हुए	च	और (पलक गिरनेके कारण)
नार्यः च	स्त्रियां और		
नराः	पुरुष सब	निमेः	निमिपर
ततृपुः न	तृप्त नहीं होते थे,	कुपिता	बहुत क्रोध करते ये ॥६५॥
मुदिताः	अनन्दित होते थे		

जातो गतः पितृगृहाद् व्रजमेधितार्थो
हत्वारिपून् सुतशतानि कृतोरुदारः ।
उत्पाद्य तेषु पुरुषः क्रतुभिः समीजे
आत्मानमात्मनिगमं प्रथयञ्जनेषु ॥६६॥

जातः गतः पितृ गृहात् व्रजं एधित अर्थः हत्वा रिपून् सुत शतानि कृत उरुदारः उत्पाद्य तेषु पुरुषः क्रतुभिः सम ईजे आत्मानं आत्म निगमं प्रथयन् जनेषु ॥६६॥

जातः	उत्पन्न होकर	उत्पाद्य	उत्पन्न करके
पितृ गृहात्	पिताके घरसे	जनेषु	लोगोंमें
व्रजं गतः	व्रज चले गये	आत्म	अपने
अर्थः	प्रयोजनवश	निगमं	वेदोंकी मर्यादा
एधित	वहां बड़े हुए,	प्रथयन्	स्थापित करते हुए
रिपून् हत्वा	शत्रुओंको मारकर	क्रतुभिः	यज्ञोंके द्वारा
उरुदारः कृत	बहुत-सी पत्नियाँ बनायी	आत्मानं	अपना ही
		सम	भली प्रकार
तेषु	उनमें	ईजे	यजन किया ॥६६॥
सुत शतानि	सैकड़ों पुत्र		

पृथ्व्याः स वै गुरुभरं क्षपयन् कुरूणा-
मन्तः समुत्थकलिना युधि भूपचम्वः ।
दृष्ट्वा विधूय विजये जयमुद्घिघोष्य
प्रोच्योद्धवाय च परं समगात् स्वधाम ॥६७॥

पृथ्व्याः स वै गुरुभरं क्षपयन् कुरुणां अन्तः समुत्थ कलिना युधि भूप चम्वः दृष्ट्या विधूय विजये जयं उद्विघोष्य प्रोच्य उद्धवाय च परं सम अगात् स्वधाम ॥६७॥

वै स	निश्चय उन्होंने	दृष्ट्या	सौभाग्य वश
पृथ्व्याः	पृथ्वीके	विधूय	विध्वंस कराके
गुरुभरं	भारी भारको	विजये जयं	अर्जुनकी विजय
क्षपयन्	दूर करनेके लिए	उद् विघोष्य	घोषणा करके
कुरूणां	कुरुवंशियोंके	च उद्धवाय	तथा उद्धवको
अन्तः	भीतर	परं	परम-तत्त्वका
समुत्थ	उठे हुए	प्रोच्य	उपदेश करके
कलिना	झगड़ेके द्वारा	स्वधाम	अपने धाम
युधि भूप	युद्धमें राजाओंकी	सम अगात्	चले गये ॥६७॥
चम्वः	सेनाका		

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां नवमस्कन्धे चतुर्विंशोऽध्यायः ॥२४॥

॥ नवमस्कन्धः समाप्तः ॥